मनुम् एकाग्रम् आसीनम् अभिगम्य महर्षयः। प्रतिपूज्य यथान्यायम् इदं वचनम् अब्रुवन्॥ १-०१

भगवन् सर्ववर्णानां यथावद् अनुपूर्वशः। अन्तरप्रभवानां च धर्मान् नो वक्तुम् अर्हसि ॥ १-०२

त्वम् एको ह्यस्य सर्वस्य विधानस्य स्वयंभुवः। अचिन्त्यस्य-अप्रमेयस्य कार्यतत्त्वार्थवित् प्रभो ॥ १-०३

स तैः पृष्टस् तथा सम्यग् अमित-ओजा महात्मभिः। प्रत्युवाच-अर्च्य तान् सर्वान् महर्षीन् - श्रूयताम् इति ॥ १-०४

आसीद् इदम् तमोभूतम् अप्रज्ञातम् अलक्षणम्। अप्रतर्क्यम् अविज्ञेयं प्रसुप्तम् इव सर्वतः ॥ १-०५

ततः स्वयंभूर् भगवान् अव्यक्तो व्यञ्जयन्न् इदम्। महाभूतादि वृत्त-ओजाः प्रादुर् आसीत् तमोनुदः ॥ १-०६

यो असाव् अतीन्द्रियग्राह्यः सूक्ष्मो अव्यक्तः सनातनः। सर्वभूतमयो अचिन्त्यः स एव स्वयम् उद्बभौ ॥ । १-०७

सो अभिध्याय शरीरात् स्वात् सिसृक्षुर् विविधाः प्रजाः। अप एव ससर्ज-अदौ तासु वीर्यम् अवासृजत्॥ १-०८

तद् अण्डम् अभवद् हैमं सहस्रांशुसम-प्रभम्। तस्मिञ् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥ १-०९

आपो नरा इति प्रोक्ता आपो वै नरसूनवः। ता यद् अस्यायनं पूर्वं तेन नारायणः स्मृतः ॥ १-१०

यत् तत् कारणम् अव्यक्तं नित्यं सद्-असद्-अत्मकं। तद्-विसृष्टः स पुरुषो लोके ब्रह्मा-इति कीर्त्यते ॥ १-११

तस्मिन्न् अण्डे स भगवान् उषित्वा परिवत्सरम्। स्वयम् एवात्मनो ध्यानात् तद् अण्डम् अकरोद् द्विधा ॥ १-१२

ताभ्यां स शकलाभ्यां च दिवं भूमिं च निर्ममे। मध्ये व्योम दिशश् च-अष्टाव् अपां स्थानं च शाश्वतं ॥ १-१३

उद्बबर्ह-अत्मनश् च-एव मनः सद्-असद्-अत्मकम्। मनसश् च-अप्यहंकारम् अभिमन्तारम् ईश्वरम् ॥ १-१४

महान्तम् एव च-अत्मानं सर्वाणि त्रि-गुणानि च। विषयाणां ग्रहीतृणि शनैः पञ्च-इन्द्रियाणि च ॥ १-१५

तेषां त्व् अवयवान् सूक्ष्मान् षण्णाम् अप्यमित-ओजसाम्। संनिवेश्य-अत्ममात्रासु सर्वभूतानि निर्ममे ॥ १-१६

यन् मूर्ति-अवयवाः सूक्ष्मास् तानि-इमान्याश्रयन्ति षट्। तस्मात् - शरीरम् इत्याहुस् तस्य मूर्तिं मनीषिणः ॥ १-१७

तद् आविशन्ति भूतानि महान्ति सह कर्मभिः। मनश् च-अवयवैः सूक्ष्मैः सर्वभूतकृद् अव्ययम्॥ १-१८

तेषाम् इदं तु सप्तानां पुरुषाणां महा-ओजसाम्। सूक्ष्माभ्यो मूर्तिमात्राभ्यः संभवत्यव्ययाद् व्ययम्॥ १-१९

आद्याद्यस्य गुणं त्व् एषाम् अवाप्नोति परः परः। यो यो यावतिथश् च-एषां स स तावद् गुणः स्मृतः ॥ १-२०

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्। वेदशब्देभ्य एव-अदौ पृथक् संस्थाश् च निर्ममे ॥ १-२१

कर्मात्मनां च देवानां सो असृजत् प्राणिनां प्रभुः। साध्यानां च गणं सूक्ष्मं यज्ञं च-एव सनातनम्॥ १-२२

अग्नि-वायु-रविभ्यस् तु त्रयं ब्रह्म सनातनम्। दुदोह यज्ञसिद्धि-अर्थम् ऋच-यजुस्-साम-लक्षणम्॥ १-२३

कालं कालविभक्तीश् च नक्षत्राणि ग्रहांस् तथा। सरितः सागरान् - शैलान् समानि विषमानि च॥ १-२४

तपो वाचं रतिं च-एव कामं च क्रोधम् एव च। सृष्टिं ससर्ज च-एव-इमां स्रष्टुम् इच्छन्न् इमाः प्रजाः॥ १-२५

कर्मणां च विवेकार्थं धर्म-अधर्मौ व्यवेचयत्। द्वन्द्वैर् अयोजयच् च-इमाः सुख-दुःखादिभिः प्रजाः॥ १-२६

अण्व्यो मात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः। ताभिः सार्धम् इदं सर्वं संभवत्यनुपूर्वशः॥ १-२७

यं तु कर्मणि यस्मिन् स न्ययुङ्क्त प्रथमं प्रभुः। स तद् एव स्वयं भेजे सृज्यमानः पुनः पुनः॥ १-२८

हिंस्र-अहिंस्रे मृदु-क्रूरे धर्म-अधर्माव् ऋत-अनृते। यद् यस्य सो अदधात् सर्गे तत् तस्य स्वयम् आविशत्॥ १-२९

यथा-ऋतु-लिङ्गान्यृतवः स्वयम् एव-ऋतुपर्यये। स्वानि स्वान्यभिपद्यन्ते तथा कर्माणि देहिनः॥ १-३०

लोकानां तु विवृद्धि-अर्थं मुख-बाहु-ऊरु-पादतः। ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयत्॥ १-३१

द्विधा कृत्वा-अत्मनो देहम् अर्धेन पुरुषो अभवत्। अर्धेन नारी तस्यां स विराजम् असृजत् प्रभुः॥ १-३२

तपस् तप्त्वा-असृजद् यं तु स स्वयं पुरुषो विराट्। तं मां वित्त-अस्य सर्वस्य स्रष्टारं द्विजसत्तमाः॥ १-३३

अहं प्रजाः सिसृक्षुस् तु तपस् तप्त्वा सु-दुश्चरम्। पतीन् प्रजानाम् असृजं महर्षीन् आदितो दश।१-३४

मरीचिम् अत्रि-अङ्गिरसौ पुलस्त्यं पुलहं क्रतुम्। प्रचेतसं वसिष्ठं च भृगुं नारदम् एव च॥ १-३५

एते मनूंस् तु सप्तान् यान् असृजन् भूरितेजसः। देवान् देवनिकायांश् च महर्षींश् च-अमित-ओजसः॥ १-३६

यक्ष-रक्षस्-पिशाचांश् च गन्धर्व-अप्सरसो असुरान्। नागान् सर्पान् सुपर्णांश् च पितृणांश् च पृथग्गणम्॥ १-३७

विद्युतो अशनि-मेघांश् च रोहित-इन्द्रधनूंषि च। उल्का-निर्घात-केतूंश् च ज्योतींष्युच्चावचानि च॥ १-३८

किन्नरान् वानरान् मत्स्यान् विविधांश् च विहङ्गमान्। पशून् मृगान् मनुष्यांश् च व्यालांश् च-उभयतोदतः॥ १-३९

कृमि-कीट-पतङ्गांश् च यूका-मक्षिक-मत्कुणम्। सर्वं च दंश-मशकं स्थावरं च पृथग्विधम्॥ १-४०

एवम् एतैर् इदं सर्वं मद्-नियोगान् महात्मभिः। यथाकर्म तपोयोगात् सृष्टं स्थावर-जङ्गमम्॥ १-४१

येषां तु यादृषं कर्म भूतानाम् इह कीर्तितम्। तत् तथा वो अभिधास्यामि क्रमयोगं च जन्मनि॥ १-४२

पशवश् च मृगाश् च-एव व्यालाश् च-उभयतोदतः। रक्षांसि च पिशाचाश् च मनुष्याश् च जरायुजाः॥ १-४३

अण्डाजाः पक्षिणः सर्पा नक्रा मत्स्याश् च कच्चपाः। यानि च-एवं-प्रकाराणि स्थलजान्यौदकानि च॥ १-४४

स्वेदजं दंश-मशकं यूका-मक्षिक-मत्कुणम्। ऊष्मणश् च-उपजायन्ते यच् च-अन्यत् किं चिद् ईद्दषम्॥ १-४५

उद्भिज्जाः स्थावराः सर्वे बीज-काण्डप्ररोहिणः। ओषध्यः फलपाकान्ता बहु-पुष्प-फल-उपगाः॥ १-४६

अपुष्पाः फलवन्तो ये ते वनस्पतयः स्मृताः। पुष्पिणः फलिनश् च-एव वृक्षास् तु-उभयतः स्मृताः॥ १-४७

गुच्च-गुल्मं तु विविधं तथा-एव तृणजातयः। बीज-काण्डरुहाण्येव प्रताना वल्ल्य एव च॥ १-४८

तमसा बहु-रूपेण वेष्टिताः कर्महेतुना। अन्तः-संज्ञा भवन्त्येते सुख-दुःख-समन्विताः॥ १-४९

एतद्-अन्तास् तु गतयो ब्रह्माद्याः समुदाहृताः। घोरे अस्मिन् भूतसंसारे नित्यं सततयायिनि॥ १-५०

एवं सर्वं स सृष्ट्वा-इदं मां च-अचिन्त्य-पराक्रमः। आत्मन्यन्तर्दधे भूयः कालं कालेन पीडयन्॥ १-५१

यदा स देवो जागर्ति तद् एवं चेष्टते जगत्। यदा स्वपिति शान्त-अत्मा तदा सर्वं निमीलति॥ १-५२

तस्मिन् स्वपिति तु स्वस्थे कर्म-अत्मानः शरीरिणः। स्वकर्मभ्यो निवर्तन्ते मनश् च ग्लानिम् ऋच्चति॥ १-५३

युगपत् तु प्रलीयन्ते यदा तस्मिन् महात्मनि। तदा-अयं सर्वभूतात्मा सुखं स्वपिति निर्वृतः॥ १-५४

तमो अयं तु समाश्रित्य चिरं तिष्ठति स-इन्द्रियः। न च स्वं कुरुते कर्म तदा-उत्क्रामति मूर्तितः॥ १-५५

यदा-अणुमात्रिको भूत्वा बीजं स्थास्नु चरिष्णु च। समाविशति संसृष्टस् तदा मूर्तिं विमुञ्चति॥ १-५६

एवं स जाग्रत् - स्वप्नाभ्याम् इदं सर्वं चर-अचरम्। संजीवयति च-अजस्रं प्रमापयति च-अव्ययः॥ १-५७

इदं शास्त्रं तु कृत्वा-असौ माम् एव स्वयम् आदितः। विधिवद् ग्राहयाम् आस मरीचि-अदींस् त्व् अहं मुनीन्॥ १-५८

एतद् वो अयं भृगुः शास्त्रं श्रावयिष्यत्यशेसतः। एतद् हि मत्तो अधिजगे सर्वम् एषो अखिलं मुनिः॥ १-५९

ततस् तथा स तेन-उक्तो महर्षि-मनुना भृगुः। तान् अब्रवीद् ऋषीन् सर्वान् प्रीतात्मा श्रूयताम् इति॥ १-६०

स्वायंभुवस्य-अस्य मनोः षड्वंश्या मनवो अपरे। सृष्टवन्तः प्रजाः स्वाः स्वा महात्मानो महा-ओजसः॥ १-६१

स्वारोचिषश् च-उत्तमश् च तामसो रैवतस् तथा। चाक्षुषश् च महातेजा विवस्वत् - सुत एव च॥ १-६२

स्वायंभुव-अद्याः सप्त-एते मनवो भूरितेजसः। स्वे स्वे अन्तरे सर्वम् इदम् उत्पाद्य-अपुश् चर-अचरम्॥ १-६३

निमेषा दश च-अष्टौ च काष्ठा त्रिंशत् तु ताः कला। त्रिंशत् कला मुहूर्तः स्याद् अहोरात्रं तु तावतः॥ १-६४

अहोरात्रे विभजते सूर्यो मानुष-दैविके। रात्रिः स्वप्नाय भूतानां चेष्टायै कर्मणाम् अहः॥ १-६५

पित्र्ये रात्रि-अहनी मासः प्रविभागस् तु पक्षयोः। कर्म-चेष्टास्व् अहः कृष्णः शुक्लः स्वप्नाय शर्वरी॥ १-६६

दैवे रात्रि-अहनी वर्षं प्रविभागस् तयोः पुनः। अहस् तत्र-उदगयनं रात्रिः स्याद् दक्षिणायनम्॥ १-६७

ब्राह्मस्य तु क्षपाहस्य यत् प्रमाणं समासतः। एकैकशो युगानां तु क्रमशस् तन् निबोधत॥ १-६८

चत्वार्याहुः सहस्राणि वर्साणां तत् कृतं युगम्। तस्य तावत्- शती संध्या संध्यांशश् च तथाविधः॥ १-६९

इतरेषु स-संध्येषु स-संध्यांशेषु च त्रिषु। एकापायेन वर्तन्ते सहस्राणि शतानि च ॥ १-७०

यद् एतत् परिसंख्यातम् आदाव् एव चतुर्युगम्। एतद् द्वादशसाहस्रं देवानां युगम् उच्यते॥ १-७१

दैविकानां युगानां तु सहस्रं परिसंख्यया। ब्राह्मम् एकम् अहर् ज्ञेयं तावतीं रात्रिम् एव च॥ १-७२

तद् वै युगसहस्रान्तं ब्राह्मं पुण्यम् अहर् विदुः। रात्रिं च तावतीम् एव ते अहोरात्रविदो जनाः॥ १-७३

तस्य सो अह-र्निशस्य-अन्ते प्रसुप्तः प्रतिबुध्यते। प्रतिबुद्धश् च सृजति मनः सद्-असद्-अत्मकम्॥ १-७४

मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया। आकाशं जायते तस्मात् तस्य शब्दं गुणं विदुः॥ १-७५

आकाशात् तु विकुर्वाणात् सर्वगन्धवहः शुचिः। बलवाञ् जायते वायुः स वै स्पर्श-गुणो मतः॥ १-७६

वायोर् अपि विकुर्वाणाद् विरोचिष्णु तमोनुदम्। ज्योतिर् उत्पद्यते भास्वत् तद् रूप-गुणम् उच्यते॥ १-७७

ज्योतिषश् च विकुर्वाणाद् आपो रस-गुणाः स्मृताः। अद्भ्यो गन्ध-गुणा भूमिर् इत्येषा सृष्टिर् आदितः॥ १-७८

यद् प्राग् द्वादशसाहस्रम् उदितं दैविकं युगम्। तद् एकसप्तति-गुणं मन्वन्तरम् इह-उच्यते॥ १-७९

मन्वन्तराण्यसंख्यानि सर्गः संहार एव च। क्रीडन्न् इव-एतत् कुरुते परमेष्ठी पुनः पुनः॥ १-८०

चतुष्पात् सकलो धर्मः सत्यं च-एव कृते युगे। न-अधर्मेण-अगमः कश् चिन् मनुष्यान् प्रति वर्तते॥ १-८१

इतरेष्व् आगमाद् धर्मः पादशस् त्व् अवरोपितः। चौरिक-अनृत-मायाभिर् धर्मश् च-अपैति पादशः॥ १-८२

अरोगाः सर्वसिद्धार्थाश् चतुर्वर्षशत-अयुषः। कृते त्रेतादिषु ह्येषां आयुर् ह्रसति पादशः॥ १-८३

वेद-उक्तम् आयुर् मर्त्यानाम् आशिषश् च-एव कर्मणाम्। फलन्त्यनुयुगं लोके प्रभावश् च शरीरिणाम्॥ १-८४

अन्ये कृतयुगे धर्मास् त्रेतायां द्वापरे अपरे। अन्ये कलियुगे नृणां युगह्रासानुरूपतः॥ १-८५

तपः परं कृतयुगे त्रेतायां ज्ञानम् उच्यते। द्वापरे यज्ञम् एवाहुर् दानम् एकं कलौ युगे॥ १-८६

सर्वस्य-अस्य तु सर्गस्य गुप्ति-अर्थं स महा-द्युतिः। मुख-बाहु-ऊरु-पज्जानां पृथक्कर्माण्यकल्पयत्॥ १-८७

अध्यापनम् अध्ययनं यजनं याजनं तथा। दानं प्रतिग्रहं च-एव ब्राह्मणानाम् अकल्पयत्॥ १-८८

प्रजानां रक्षणं दानम् इज्या-अध्ययनम् एव च। विषयेष्व् अप्रसक्तिश् च क्षत्रियस्य समासतः ॥ १-८९

पशूनां रक्षणं दानम् इज्या-अध्ययनम् एव च। वणिक्पथं कुसीदं च वैश्यस्य कृषिम् एव च॥ १-९०

एकम् एव तु शूद्रस्य प्रभुः कर्म समादिशत्। एतेषाम् एव वर्णानां शुश्रूषाम् अनसूयया॥ १-९१

ऊर्ध्वं नाभेर् मेध्यतरः पुरुषः परिकीर्तितः। तस्मान् मेध्यतमं त्व् अस्य मुखम् उक्तं स्वयंभुवा॥ १-९२

उत्तमाङ्ग-उद्भवाज् ज्येष्ठ्याद् ब्रह्मणश् च-एव धारणात्। सर्वस्य-एव-अस्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः॥ १-९३

तं हि स्वयंभूः स्वाद् आस्यात् तपस् तप्त्वा-अदितो असृजत्। हव्य-कव्याभिवाह्याय सर्वस्य-अस्य च गुप्तये॥ १-९४

यस्य-अस्येन सदा-अश्नन्ति हव्यानि त्रिदिव-ओकसः। कव्यानि च-एव पितरः किं भूतम् अधिकं ततः॥ १-९५

भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः। बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः॥ १-९६

ब्राह्मणेषु च विद्वांसो विद्वत्सु कृत-बुद्धयः। कृत-बुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः॥ १-९७

उत्पत्तिर् एव विप्रस्य मूर्तिर् धर्मस्य शाश्वती। स हि धर्मार्थम् उत्पन्नो ब्रह्मभूयाय कल्पते॥ १-९८

ब्राह्मणो जायमानो हि पृथिव्याम् अधिजायते। ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये॥ १-९९

सर्वं स्वं ब्राह्मणस्य-इदं यत् किं चित् - जगतीगतं। श्रैष्ठ्येन-अभिजनेन-इदं सर्वं वै ब्राह्मणो अर्हति॥ १-१००

स्वम् एव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च। आनृशंस्याद् ब्राह्मणस्य भुञ्जते हि-इतरे जनाः॥ १-१०१

तस्य कर्मविवेक-अर्थं शेषाणाम् अनुपूर्वशः। स्वायंभुवो मनुर् धीमान् इदं शास्त्रम् अकल्पयत्॥ १-१०२

विदुषा ब्राह्मणेन-इदम् अध्येतव्यं प्रयत्नतः। शिश्येभ्यश् च प्रवक्तव्यं सम्यङ् न-अन्येन केन चित्॥ १-१०३

इदं शास्त्रम् अधीयानो ब्राह्मणः शंसित-व्रतः। मनस्-वाच्-देहजैर् नित्यं कर्मदोषैर् न लिप्यते॥ १-१०४

पुनाति पङ्क्तिं वंश्यांश् च सप्त-सप्त पर-अवरान्। पृथिवीम् अपि च-एव-इमां कृत्स्नाम् एको अपि सो अर्हति॥ १-१०५

इदं स्वस्त्ययनं श्रेष्ठम् इदं बुद्धिविवर्धनम्। इदं यशस्यम् आयुष्यम् इदं निःश्रेयसं परम्॥ १-१०६

अस्मिन् धर्मो अखिलेन-उक्तो गुण-दोषौ च कर्मणाम्। चतुर्णाम् अपि वर्णानाम् आचारश् च-एव शाश्वतः॥ १-१०७

आचारः परमो धर्मः श्रुति-उक्तः स्मार्त एव च। तस्माद् अस्मिन् सदा युक्तो नित्यं स्याद् आत्मवान् द्विजः॥ १-१०८

आचाराद् विच्युतो विप्रो न वेदफलम् अश्नुते। आचारेण तु संयुक्तः सम्पूर्णफलभाज् भवेत्॥ १-१०९

एवम् आचारतो दृष्ट्वा धर्मस्य मुनयो गतिं। सर्वस्य तपसो मूलम् आचारं जगृहुः परम्॥ १-११०

जगतश् च समुत्पत्तिं संस्कारविधिम् एव च । व्रतचर्या-उपचारं च स्नानस्य च परं विधिम्॥ १-१११

दाराधिगमनं च-एव विवाहानां च लक्षणम्। महायज्ञविधानं च श्राद्धकल्पं च शाश्वतम्॥ १-११२

वृत्तीनां लक्षणं च-एव स्नातकस्य व्रतानि च। भक्ष्य-अभक्ष्यं च शौचं च द्रव्याणां शुद्धिम् एव च ॥ १-११३

स्त्रीधर्म-योगं तापस्यं मोक्षं संन्यासम् एव च। राज्ञश् च धर्मम् अखिलं कार्याणां च विनिर्णयम्॥ १-११४

साक्षिप्रश्न-विधानं च धर्मं स्त्री-पुंसयोर् अपि। विभागधर्मं द्यूतं च कण्टकानां च शोधनम्॥ १-११५

वैश्य-शूद्र-उपचारं च संकीर्णानां च संभवम्। आपद्-धर्मं च वर्णानां प्रायश्चित्त-विधिं तथा ॥ १-११६

संसारगमनं च-एव त्रिविधं कर्म-संभवम्। निःश्रेयसं कर्मणां च गुण-दोषपरीक्षणम्॥ १-११७

देशधर्मान् - जातिधर्मान् कुलधर्मांश् च शाश्वतान्। पाषण्ड-गणधर्मांश् च शास्त्रे अस्मिन्न् उक्तवान् मनुः ॥ १-११८

यथा-इदम् उक्तवान् - शास्त्रं पुरा पृष्टो मनुर् मया। तथा-इदं यूयम् अप्यद्य मत् - सकाशात् - निबोधत ॥ १-११९

विद्वद्भिः सेवितः सद्भिर् नित्यम् अद्वेष-रागिभिः। हृदयेन-अभ्यनुज्ञातो यो धर्मस् तं निबोधत ॥ २-०१

कामात्मता न प्रशस्ता न च-एव-इह-अस्त्यकामता। काम्यो हि वेदाधिगमः कर्मयोगश् च वैदिकः ॥ २-०२

संकल्प-मूलः कामो वै यज्ञाः संकल्प-संभवाः। व्रतानि यमधर्माश् च सर्वे संकल्पजाः स्मृताः॥ २-०३

अकामस्य क्रिया का चिद् दृश्यते न-इह कर्हि चित्। यद् यद् हि कुरुते किं चित् तत् तत् कामस्य चेष्टितम्॥ २-०४

तेषु सम्यग् वर्तमानो गच्चत्यमरलोकताम्। यथा संकल्पितांश् च-इह सर्वान् कामान् समश्नुते॥ २-०५

वेदो अखिलो धर्ममूलं स्मृति-शीले च तद्विदाम्। आचारश् च-एव साधूनाम् आत्मनस् तुष्टिर् एव च ॥ २-०६

यः कश् चित् कस्य चिद् धर्मो मनुना परिकीर्तितः। स सर्वो अभिहितो वेदे सर्वज्ञानमयो हि सः ॥ २-०७

सर्वं तु समवेक्ष्य-इदं निखिलं ज्ञानचक्षुषा। श्रुतिप्रामाण्यतो विद्वान् स्वधर्मे निविशेत वै ॥ २-०८

श्रुति-स्मृति-उदितं धर्मम् अनुतिष्ठन् हि मानवः। इह कीर्तिम् अवाप्नोति प्रेत्य च-अनुत्तमं सुखम्॥ २-०९

श्रुतिस् तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः। ते सर्वार्थेष्व् अमीमांस्ये ताभ्यां धर्मो हि निर्बभौ ॥ २-१०

यो अवमन्येत ते मूले हेतुशास्त्राश्रयाद् द्विजः। स साधुभिर् बहिष्कार्यो नास्तिको वेदनिन्दकः ॥ २-११

वेदः स्मृतिः सदाचारः स्वस्य च प्रियम् आत्मनः। एतच् चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम्॥ २-१२

अर्थ-कामेष्व् असक्तानां धर्मज्ञानं विधीयते। धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः ॥ २-१३

श्रुतिद्वैधं तु यत्र स्यात् तत्र धर्माव् उभौ स्मृतौ। उभाव् अपि हि तौ धर्मौ सम्यग् उक्तौ मनीषिभिः॥ २-१४

उदिते अनुदिते च-एव समयाध्युषिते तथा। सर्वथा वर्तते यज्ञ इति-इयं वैदिकी श्रुतिः॥ २-१५

निषेक-अदि-श्मशान-अन्तो मन्त्रैर् यस्य-उदितो विधिः। तस्य शास्त्रे अधिकारो अस्मिञ् ज्ञेयो न-अन्यस्य कस्य चित्॥ २-१६

सरस्वती-दृशद्वत्योर् देवनद्योर् यद् अन्तरम्। तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते॥ २-१७

तस्मिन् देशे य आचारः पारम्पर्यक्रमागतः। वर्णानां स-अन्तरालानां स सदाचार उच्यते॥ २-१८

कुरुक्षेत्रं च मत्स्याश् च पञ्चालाः शूरसेनकाः। एष ब्रह्मर्षिदेशो वै ब्रह्मावर्ताद् अनन्तरः॥ २-१९

एतद् देशप्रसूतस्य सकाशाद् अग्रजन्मनः। स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥ २-२०

हिमवद्-विन्ध्ययोर् मध्यं यत् प्राग् विनशनाद् अपि। प्रत्यग् एव प्रयागाच् च मध्यदेशः प्रकीर्तितः॥ २-२१

आ समुद्रात् तु वै पूर्वाद् आ समुद्राच् च पश्चिमात्। तयोर् एव-अन्तरं गिर्योर् आर्यावर्तं विदुर् बुधाः॥ २-२२

कृष्णसारस् तु चरति मृगो यत्र स्वभावतः। स ज्ञेयो यज्ञियो देशो म्लेच्चदेशस् त्व् अतः परः॥ २-२३

एताण् द्विजातयो देशान् संश्रयेरन् प्रयत्नतः। शूद्रस् तु यस्मिन् कस्मिन् वा निवसेद् वृत्तिकर्शितः॥ २-२४

एषा धर्मस्य वो योनिः समासेन प्रकीर्तिता। संभवश् च-अस्य सर्वस्य वर्णधर्मान् निबोधत॥ २-२५

वैदिकैः कर्मभिः पुण्यैर् निषेकादिर् द्विजन्मनाम्। कार्यः शरीरसंस्कारः पावनः प्रेत्य च-इह च॥ २-२६

गार्भैर् होमैर् जातकर्म-चौड-मौञ्जी-निबन्धनैः। बैजिकं गार्भिकं च-एनो द्विजानाम् अपमृज्यते॥ २-२७

स्वाध्यायेन व्रतैर् होमैस् त्रैविद्येन-इज्यया सुतैः। महायज्ञैश् च यज्ञैश् च ब्राह्मी-इयं क्रियते तनुः॥ २-२८

प्राङ् नाभिवर्धनात् पुंसो जातकर्म विधीयते। मन्त्रवत् प्राशनं च-अस्य हिरण्य-मधु-सर्पिषाम्॥ २-२९

नामधेयं दशम्यां तु द्वादश्यां वा-अस्य कारयेत्। पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते॥ २-३०

मङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम्। वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम्॥ २-३१

शर्मवद् ब्राह्मणस्य स्याद् राज्ञो रक्षासमन्वितम्। वैश्यस्य पुष्टि-संयुक्तं शूद्रस्य प्रेष्यसंयुतम्॥ २-३२

स्त्रीणां सुख-उद्यम् अक्रूरं विस्पष्ट-अर्थं मनोहरम्। मङ्गल्यं दीर्घवर्ण-अन्तम् आशीर्वाद-अभिधानवत्॥ २-३३

चतुर्थे मासि कर्तव्यं शिशोर् निष्क्रमणं गृहात्। षष्ठे अन्नप्राशनं मासि यद् वा-इष्टं मङ्गलं कुले॥ २-३४

चूडाकर्म द्विजातीनां सर्वेषाम् एव धर्मतः। प्रथमे अब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्॥ २-३५

गर्भाष्टमे अब्दे कुर्वीत ब्राह्मणस्य-उपनायनम्। गर्भाद् एकादशे राज्ञो गर्भात् तु द्वादशे विशः॥ २-३६

ब्रह्मवर्चस-कामस्य कार्यो विप्रस्य पञ्चमे। राज्ञो बल-अर्थिनः षष्ठे वैश्यस्य-इह-अर्थिनो अष्टमे॥ २-३७

आ षोदशाद् ब्राह्मणस्य सावित्री न-अतिवर्तते। आ द्वाविंशात् क्षत्रबन्धोर् आ चतुर्विंशतेर् विशः॥ २-३८

अत ऊर्ध्वं त्रयो अप्येते यथाकालम् असंस्कृताः। सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः॥ २-३९

न-एतैर् अपूतैर् विधिवद् आपद्यपि हि कर्हि चित्। ब्राह्मान् यौनांश् च संबन्धान् न-अचरेद् ब्राह्मणः सह॥ २-४०

कार्ष्ण-रौरव-बास्तानि चर्माणि ब्रह्मचारिणः। वसीरन्न् आनुपूर्व्येण शाण-क्षौम-अविकानि च॥ २-४१

मौञ्जी त्रिवृत् समा श्लक्ष्णा कार्या विप्रस्य मेखला। क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी॥ २-४२

मुञ्जालाभे तु कर्तव्याः कुश-अश्मन्तक-बल्वजैः। त्रिवृता ग्रन्थिना-एकेन त्रिभिः पञ्चभिर् एव वा॥ २-४३

कार्पासम् उपवीतं स्याद् विप्रस्य-ऊर्ध्ववृतं त्रिवृत्। शण-सूत्रमयं राज्ञो वैश्यस्य-अविकसौत्रिकम्॥ २-४४

ब्राह्मणो बैल्व-पालाशौ क्षत्रियो वाट-खादिरौ। पैलव-अदुम्बरौ वैश्यो दण्डान् अर्हन्ति धर्मतः॥ २-४५

केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः। ललाटसम्मितो राज्ञः स्यात् तु नासान्तिको विशः॥ २-४६

ऋजवस् ते तु सर्वे स्युर् अव्रणाः सौम्य-दर्शनाः। अनुद्वेगकरा नृणां स-त्वचो अनग्निदूषिताः॥ २-४७

प्रतिगृह्य-ईप्सितं दण्डम् उपस्थाय च भास्करम्। प्रदक्षिणं परीत्य-अग्निं चरेद् भैक्षं यथाविधि॥ २-४८

भवत् - पूर्वं चरेद् भैक्षम् उपनीतो द्विजोत्तमः। भवन् - मध्यं तु राजन्यो वैश्यस् तु भवद्-उत्तरम्।२-४९

मातरं वा स्वसारं वा मातुर् वा भगिनीं निजाम्। भिक्षेत भिक्षाम् प्रथमं या च-एनं न-अवमानयेत्॥ २-५०

समाहृत्य तु तद् भैक्षं यावदन्नम् अमायया। निवेद्य गुरवे अश्नीयाद् आचम्य प्राङ्मुखः शुचिः॥ २-५१

आयुष्यं प्राङ्-मुखो भुङ्क्ते यशस्यं दक्षिणा-मुखः। श्रियं प्रत्यङ्-मुखो भुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्-मुखः॥ २-५२

उपस्पृश्य द्विजो नित्यम् अन्नम् अद्यात् समाहितः। भुक्त्वा च-उपस्पृशेत् सम्यग् अद्भिः खानि च संस्पृशेत्॥ २-५३

पूजयेद् अशनं नित्यम् अद्याच् च-एतद् अकुत्सयन्। दृष्ट्वा हृष्येत् प्रसीदेच् च प्रतिनन्देच् च सर्वशः॥ २-५४

पूजितं ह्यशनं नित्यं बलम् ऊर्जं च यच्छति। अपूजितं तु तद् भुक्तम् उभयं नाशयेद् इदम्॥ २-५५

न-उच्छिष्टं कस्य चिद् दद्यान् न-अद्याद् एतत् तथा-अन्तरा। न च-एव-अत्यशनं कुर्यान् न च-उच्छिष्टः क्व चिद् व्रजेत्॥ २-५६

अन् - आरोग्यम् अनायुष्यम् अस्वर्ग्यं च-अतिभोजनम्। अपुण्यं लोकविद्विष्टं तस्मात् तत् परिवर्जयेत्॥ २-५७

ब्राह्मेण विप्रस् तीर्थेन नित्यकालम् उपस्पृशेत्। काय-त्रैदशिकाभ्यां वा न पित्र्येण कदा चन॥ २-५८

अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते। कायम् अङ्गुलिमूले अग्रे देवं पित्र्यं तयोर् अधः॥ २-५९

त्रिर् आचामेद् अपः पूर्वं द्विः प्रमृज्यात् ततो मुखम्। खानि च-एव स्पृशेद् अद्भिर् आत्मानं शिर एव च॥ २-६०

अन् - उष्णाभिर् अफेनाभिर् अद्भिस् तीर्थेन धर्मवित्। शौच-ईप्सुः सर्वदा-अचामेद् एकान्ते प्राग्-उदङ्-मुखः॥ २-६१

हृद्गाभिः पूयते विप्रः कण्ठगाभिस् तु भूमिपः। वैश्यो अद्भिः प्राशिताभिस् तु शूद्रः स्पृष्टाभिर् अन्ततः॥ २-६२

उद्धृते दक्षिने पाणाव् उपवीती-उच्यते द्विजः। सव्ये प्राचीनावीती निवीती कण्ठसज्जने॥ २-६३

मेखलाम् अजिनं दण्डम् उपवीतं कमण्डलुम्। अप्सु प्रास्य विनष्टानि गृह्णीत-अन्यानि मन्त्रवत्॥ २-६४

केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते। राजन्यबन्धोर् द्वाविंशे वैश्यस्य द्व्यधिके मतः॥ २-६५

अमन्त्रिका तु कार्या-इयं स्त्रीणाम् आवृद् अशेषतः। संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्॥ २-६६

वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः। पतिसेवा गुरौ वासो गृहार्थो अग्नि-परिक्रिया॥ २-६७

एष प्रोक्तो द्विजातीनाम् औपनायनिको विधिः। उत्पत्ति-व्यञ्जकः पुण्यः कर्मयोगं निबोधत॥ २-६८

उपनीय गुरुः शिष्यं शिक्षयेत् - शौचम् आदितः। आचारम् अग्निकार्यं च संध्या-उपासनम् एव च॥ २-६९

अध्येष्यमाणस् त्व् आचान्तो यथाशास्त्रम् उदङ्-मुखः। ब्रह्माञ्जलि-कृतो अध्याप्यो लघु-वासा जित-इन्द्रियः॥ २-७०

ब्रह्मारम्भे अवसाने च पादौ ग्राह्यौ गुरोः सदा। संहत्य हस्ताव् अध्येयं स हि ब्रह्माञ्जलिः स्मृतः॥ २-७१

व्यत्यस्त-पाणिना कार्यम् उपसंग्रहणं गुरोः। सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन च दक्षिणः॥ २-७२

अध्येष्यमाणं तु गुरुर् नित्यकालम् अतन्द्रितः। अधीष्व भो इति ब्रूयाद् विरामो अस्त्व् इति च-अरमेत्॥ २-७३

ब्रह्मनः प्रणवं कुर्याद् आदाव् अन्ते च सर्वदा। स्रवत्यनोंकृतं पूर्वं परस्ताच् च विशीर्यति॥ २-७४

प्राव-कूलान् पर्युपासीनः पवित्रैश् च-एव पावितः। प्राणायामैस् त्रिभिः पूतस् तत ओं-कारम् अर्हति॥ २-७५

अकारं च-अप्यु-कारं च म-कारं च प्रजापतिः। वेदत्रयात् - निरदुहद् भूर् भुवः स्वर् इति-इति च॥ २-७६

त्रिभ्य एव तु वेदेभ्यः पादं पादम् अदूदुहत्। तद् इत्यृचो अस्याः सावित्र्याः परमेष्ठी प्रजापतिः॥ २-७७

एतद् अक्षरम् एतां च जपन् व्याहृति-पूर्विकाम्। संध्ययोर् वेदविद् विप्रो वेदपुण्येन युज्यते॥ २-७८

सहस्रकृत्वस् त्व् अभ्यस्य बहिर् एतत् त्रिकं द्विजः। महतो अप्येनसो मासात् त्वचा-इव-अहिर् विमुच्यते॥ २-७९

एतया-ऋचा विसंयुक्तः काले च क्रियया स्वया। ब्रह्म-क्षत्रिय-विश्-योनिर् गर्हणां याति साधुषु॥ २-८०

ओं-कार-पूर्विकास् तिस्रो महाव्याहृतयो अव्ययाः। त्रि-पदा च-एव सावित्री विज्ञेयं ब्रह्मणो मुखम्॥ २-८१

यो अधीते अहन्यहन्येतां त्रीणि वर्षाण्यतन्द्रितः। स ब्रह्म परम् अभ्येति वायुभूतः ख-मूर्तिमान्॥ २-८२

एकाक्षरं परं ब्रह्म प्राणायामः परं तपः। सावित्र्यास् तु परं न-अस्ति मौनात् सत्यं विशिष्यते॥ २-८३

क्षरन्ति सर्वा वैदिक्यो जुहोति-यजति-क्रियाः। अक्षरं दुष्करं ज्ञेयं ब्रह्म च-एव प्रजापतिः॥ २-८४

विधियज्ञाज् जपयज्ञो विशिष्टो दशभिर् गुणैः। उपांशुः स्यात् - शतगुणः साहस्रो मानसः स्मृतः॥ २-८५

ये पाकयज्ञास् चत्वारो विधियज्ञसमन्विताः। सर्वे ते जपयज्ञस्य कलां न-अर्हन्ति षोडशीम्॥ २-८६

जप्येन-एव तु संसिध्येद् ब्राह्मणो न-अत्र संशयः। कुर्याद् अन्यन् न वा कुर्यान् मैत्रो ब्राह्मण उच्यते॥ २-८७

इन्द्रियाणां विचरतां विषयेष्व् अपहारिषु। संयमे यत्नम् आतिष्ठेद् विद्वान् यन्ता-इव वाजिनाम्॥ २-८८

एकादश-इन्द्रियाण्याहुर् यानि पूर्वे मनीषिणः। तानि सम्यक् प्रवक्ष्यामि यथावद् अनुपूर्वशः॥ २-८९

श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका च-एव पञ्चमी। पायु-उपस्थं हस्त-पादं वाक् च-एव दशमी स्मृता।२-९०

बुद्धीन्द्रियाणि पञ्च-एषां श्रोत्रादीन्यनुपूर्वशः। कर्म-इन्द्रियाणि पञ्च-एषां पायु-अदीनि प्रचक्षते॥ २-९१

एकादशं मनो ज्ञेयं स्वगुणेन-उभय-अत्मकम्। यस्मिन् जिते जिताव् एतौ भवतः पञ्चकौ गणौ॥ २-९२

इन्द्रियाणां प्रसङ्गेन दोषम् ऋच्छत्यसंशयम्। संनियम्य तु तान्येव ततः सिद्धिं निगच्छति॥ २-९३

न जातु कामः कामानाम् उपभोगेन शाम्यति। हविषा कृष्णवर्त्मा-इव भूय एव-अभिवर्धते॥ २-९४

यश् च-एतान् प्राप्नुयात् सर्वान् यश् च-एतान् केवलांस् त्यजेत्। प्रापणात् सर्वकामानां परित्यागो विशिष्यते।२-९५

न तथा-एतानि शक्यन्ते संनियन्तुम् असेवया। विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः॥ २-९६

वेदास् त्यागश् च यज्ञाश् च नियमाश् च तपांसि च। न विप्रदुष्ट-भावस्य सिद्धिं गच्छति कर्हि चित्॥ २-९७

श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः। न हृष्यति ग्लायति वा स विज्ञेयो जित-इन्द्रियः॥ २-९८

इन्द्रियाणां तु सर्वेषां यद्येकं क्षरति-इन्द्रियम्। तेन-अस्य क्षरति प्रज्ञा दृतेः पादाद् इव-उदकम्॥ २-९९

वशे कृत्वा-इन्द्रियग्रामं संयम्य च मनस् तथा। सर्वान् संसाधयेद् अर्थान् अक्षिण्वन् योगतस् तनुम्॥ २-१००

पूर्वां संध्यां जपांस् तिष्ठेत् सावित्रीम् आ-अर्कदर्शनात्। पश्चिमां तु समासीनः सम्यग् ऋक्षविभावनात्॥ २-१०१

पूर्वां संध्यां जपंस् तिष्ठन् नैशम् एनो व्यपोहति। पश्चिमाम् तु समासीनो मलं हन्ति दिवाकृतम्॥ २-१०२

न तिष्ठति तु यः पूर्वां न-उपास्ते यश् च पश्चिमाम्। स शूद्रवद् बहिष्कार्यः सर्वस्माद् द्विजकर्मणः॥ २-१०३

अपां समीपे नियतो नैत्यकं विधिम् आस्थितः। सावित्रीम् अप्यधीयीत गत्वा-अरण्यं समाहितः॥ २-१०४

वेद-उपकरणे च-एव स्वाध्याये च-एव नैत्यके। न-अनुरोधो अस्त्यनध्याये होममन्त्रेषु च-एव हि॥ २-१०५

नैत्यके न-अस्त्यनध्यायो ब्रह्मसत्त्रं हि तत् स्मृतम्॥ ब्रह्माहुति-हुतं पुण्यम् अनध्याय-वषट्कृतम्॥ २-१०६

यः स्वाध्यायम् अधीते अब्दं विधिना नियतः शुचिः। तस्य नित्यं क्षरत्येष पयो दधि घृतं मधु॥ २-१०७

अग्नीन्धनं भैक्षचर्याम् अधःशय्यां गुरोर् हितम्। आ समावर्तनात् कुर्यात् कृत-उपनयनो द्विजः॥ २-१०८

आचार्यपुत्रः शुश्रूषुर् ज्ञानदो धार्मिकः शुचिः। आप्तः शक्तो अर्थदः साधुः स्वो अध्याप्या दश धर्मतः॥ २-१०९

न-अपृष्टः कस्य चिद् ब्रूयान् न च-अन्यायेन पृच्छतः। जानन्न् अपि हि मेधावी जडवल् लोक आचरेत्॥ २-११०

अधर्मेण च यः प्राह यश् च-अधर्मेण पृच्छति। तयोर् अन्यतरः प्रैति विद्वेषं वा-अधिगच्छति॥ २-१११

धर्म-अर्थौ यत्र न स्यातां शुश्रूषा वा-अपि तद्विधा। तत्र विद्या न वक्तव्या शुभं बीजम् इव-ऊषरे॥ २-११२

विद्यया-एव समं कामं मर्तव्यं ब्रह्मवादिना। आपद्यपि हि घोरायां न त्व् एनाम् इरिणे वपेत्॥ २-११३

विद्या ब्राह्मणम् एत्य-अह शेवधिस् ते अस्मि रक्ष माम्। असूयकाय मां मादास् तथा स्यां वीर्यवत्तमा॥ २-११४

यम् एव तु शुचिं विद्यान् नियत-ब्रह्मचारिणम्। तस्मै मां ब्रूहि विप्राय निधिपाय-अ-प्रमादिने।२-११५

ब्रह्म यस् त्व् अननुज्ञातम् अधीयानाद् अवाप्नुयात्। स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते। २-११६

लौकिकं वैदिकं वा-अपि तथा-अध्यात्मिकम् एव वा। आददीत यतो ज्ञानं तं पूर्वम् अभिवादयेत्॥ २-११७

सावित्रीमात्र-सारो अपि वरं विप्रः सुयन्त्रितः। न-अ-यन्त्रितस् त्रिवेदो अपि सर्वाशी सर्वविक्रयी॥ २-११८

शय्या-असने अध्याचरिते श्रेयसा न समाविशेत्। शय्या-असनस्थश् च-एव-एनं प्रत्युत्थाय-अभिवादयेत्॥ २-११९

ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति। प्रत्युत्थान-अभिवादाभ्यां पुनस् तान् प्रतिपद्यते॥ २-१२०

अभिवादन-शीलस्य नित्यं वृद्ध-उपसेविनः। चत्वारि तस्य वर्धन्ते आयुर् धर्मो यशो बलम्॥ २-१२१

अभिवादात् परं विप्रो ज्यायांसम् अभिवादयन्। असौ नाम-अहम् अस्मि-इति स्वं नाम परिकीर्तयेत्॥ २-१२२

नामधेयस्य ये के चिद् अभिवादं न जानते। तान् प्राज्ञो अहम् इति ब्रूयात् स्त्रियः सर्वास् तथा-एव च॥ २-१२३

भोःशब्दं कीर्तयेद् अन्ते स्वस्य नाम्नो अभिवादने। नाम्नाम् स्वरूप-भावो हि भो-भाव ऋषिभिः स्मृतः॥ २-१२४

आयुष्मान् भव सौम्य-इति वाच्यो विप्रो अभिवादने। अकारश् च-अस्य नाम्नो अन्ते वाच्यः पूर्वाक्षरः प्लुतः॥ २-१२५

यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम्। न-अभिवाद्यः स विदुषा यथा शूद्रस् तथा-एव सः॥ २-१२६

ब्राह्मणं कुशलं पृच्चेत् क्षत्रबन्धुम् अनामयम्। वैश्यं क्षेमं समागम्य शूद्रम् आरोग्यम् एव च॥ २-१२७

अवाच्यो दीक्षितो नाम्ना यवीयान् अपि यो भवेत्। भो-भवत् - पूर्वकं त्व् एनम् अभिभाषेत धर्मवित्॥ २-१२८

परपत्नी तु या स्त्री स्याद् असंबन्धा च योनितः। तां ब्रूयाद् भवति-इत्येवं सुभगे भगिनि-इति च॥ २-१२९

मातुलांश् च पितृव्यांश् च श्वशुरान् ऋत्विजो गुरून्। असाव् अहम् इति ब्रूयात् प्रत्युत्थाय यवीयसः॥ २-१३०

मातृश्वसा मातुलानी श्वश्रूर् अथ पितृश्वसा। संपूज्या गुरुपत्नीवत् समास् ता गुरुभार्यया॥ २-१३१

भ्रातुर् भार्या-उपसंग्राह्या स-वर्णा-अहन्यहन्यपि। विप्रोष्य तु-उपसंग्राह्या ज्ञाति-संबन्धि-योषितः॥ २-१३२

पितुर् भगिन्यां मातुश् च ज्यायस्यां च स्वसर्यपि। मातृवद् वृत्तिम् आतिष्ठेन् माता ताभ्यो गरीयसी॥ २-१३३

दशाब्द-अख्यं पौरसख्यं पञ्चाब्द-अख्यं कलाभृताम्। त्र्यब्दपूर्वं श्रोत्रियाणां स्वल्पेन-अपि स्वयोनिषु॥ २-१३४

ब्राह्मणं दशवर्षं तु शतवर्षं तु भूमिपम्। पिता-पुत्रौ विजानीयाद् ब्राह्मणस् तु तयोः पिता॥ २-१३५

वित्तं बन्धुर् वयः कर्म विद्या भवति पञ्चमी। एतानि मान्यस्थानानि गरीयो यद् यद् उत्तरम्॥ २-१३६

पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च। यत्र स्युः सो अत्र मान-अर्हः शूद्रो अपि दशमीं गतः॥ २-१३७

चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः। स्नातकस्य च राज्ञश् च पन्था देयो वरस्य च॥ २-१३८

तेषां तु समावेतानां मान्यौ स्नातक-पार्थिवौ। राज-स्नातकयोश् च-एव स्नातको नृपमानभाक्॥ २-१३९

उपनीय तु यः शिष्यं वेदम् अध्यापयेद् द्विजः। स-कल्पं स-रहस्यं च तम् आचार्यं प्रचक्षते॥ २-१४०

एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः। यो अध्यापयति वृत्त्यर्थम् उपाध्यायः स उच्यते॥ २-१४१

निषेक-अदीनि कर्माणि यः करोति यथाविधि। संभावयति च-अन्नेन स विप्रो गुरुर् उच्यते॥ २-१४२

अग्न्याधेयं पाकयज्ञान् अग्निष्टोम-अदिकान् मखान्। यः करोति वृतो यस्य स तस्य-ऋत्विग् इह-उच्यते॥ २-१४३

य आवृणोत्यवितथं ब्रह्मणा श्रवणाव् उभौ। स माता स पिता ज्ञेयस् तं न द्रुह्येत् कदा चन॥ २-१४४

उपाध्यायान् दश-अचार्य आचार्याणां शतं पिता। सहस्रं तु पितॄन् माता गौरवेण-अतिरिच्यते॥ २-१४५

उत्पादक-ब्रह्मदात्रोर् गरीयान् ब्रह्मदः पिता। ब्रह्मजन्म हि विप्रस्य प्रेत्य च-इह च शाश्वतम्॥ २-१४६

कामान् माता पिता च-एनं यद् उत्पादयतो मिथः। संभूतिं तस्य तां विद्याद् यद् योनाव् अभिजायते॥ २-१४७

आचार्यस् त्व् अस्य यां जातिं विधिवद् वेदपारगः। उत्पादयति सावित्र्या सा सत्या सा-अजरा-अमरा॥ २-१४८

अल्पं वा बहु वा यस्य श्रुतस्य-उपकरोति यः। तम् अपीह गुरुं विद्यात् - श्रुत-उपक्रियया तया॥ २-१४९

ब्राह्मस्य जन्मनः कर्ता स्वधर्मस्य च शासिता। बालो अपि विप्रो वृद्धस्य पिता भवति धर्मतः॥ २-१५०

अध्यापयाम् आस पितॄन् शिशुर् आङ्गिरसः कविः। पुत्रका इति ह-उवाच ज्ञानेन परिगृह्य तान्॥ २-१५१

ते तम् अर्थम् अपृच्छन्त देवान् आगत-मन्यवः। देवाश् च-एतान् समेत्य-ऊचुर् न्याय्यं वः शिशुर् उक्तवान्॥ २-१५२

अज्ञो भवति वै बालः पिता भवति मन्त्रदः। अज्ञं हि बालम् इत्याहुः पिता-इत्येव तु मन्त्रदम्॥ २-१५३

न हायनैर् न पलितैर् न वित्तेन न बन्धुभिः। ऋषयश् चक्रिरे धर्मं यो अनूचानः स नो महान्॥ २-१५४

विप्राणां ज्ञानतो ज्यैष्ठ्यं क्षत्रियाणां तु वीर्यतः। वैश्यानां धान्यधनतः शूद्राणाम् एव जन्मतः॥ २-१५५

न तेन वृद्धो भवति येनास्य पलितं शिरः। यो वै युवा-अप्यधीयानस् तं देवाः स्थविरं विदुः॥ २-१५६

यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः। यश् च विप्रो अन् - अधीयानस् त्रयस् ते नाम बिभ्रति॥ २-१५७

यथा षण्ढो अ-फलः स्त्रीषु यथा गौर् गवि च-अ-फला। यथा च-अज्ञे अ-फलं दानं तथा विप्रो अन् - ऋचो अ-फलः॥ २-१५८

अहिंसया-एव भूतानां कार्यं श्रेयो अनुशासनम्। वाक् च-एव मधुरा श्लक्ष्णा प्रयोज्या धर्मम् इच्छता॥ २-१५९

यस्य वाच्-मनसी शुद्धे सम्यग्गुप्ते च सर्वदा। स वै सर्वम् अवाप्नोति वेदान्त-उपगतं फलम्॥ २-१६०

न-अरुंतुदः स्याद् आर्तो अपि न परद्रोह-कर्म-धीः। यया-अस्य-उद्विजते वाचा न-अलोक्यां ताम् उदीरयेत्॥ २-१६१

सम्मानाद् ब्राह्मणो नित्यम् उद्विजेत विषाद् इव। अमृतस्य-इव च-अकाङ्क्षेद् अवमानस्य सर्वदा॥ २-१६२

सुखं ह्यवमतः शेते सुखं च प्रतिबुध्यते॥  सुखं चरति लोके अस्मिन्न् अवमन्ता विनश्यति॥ २-१६३

अनेन क्रमयोगेन संस्कृत-अत्मा द्विजः शनैः। गुरौ वसन् सञ्चिनुयाद् ब्रह्माधिगमिकं तपः॥ २-१६४

तपो-विशेषैर् विविधैर् व्रतैश् च विधिचोदितैः। वेदः कृत्स्नो अधिगन्तव्यः स-रहस्यो द्विजन्मना॥ २-१६५

वेदम् एव सदा-अभ्यस्येत् तपस् तप्स्यन् द्विजोत्तमः। वेदाभ्यासो हि विप्रस्य तपः परम् इह-उच्यते॥ २-१६६

आ ह-एव स नखाग्रेभ्यः परमं तप्यते तपः। यः स्रग्व्यपि द्विजो अधीते स्वाध्यायं शक्तितो अन्वहम्॥ २-१६७

यो अन् - अधीत्य द्विजो वेदम् अन्यत्र कुरुते श्रमम्। स जीवन्न् एव शूद्रत्वम् आशु गच्छति स-अन्वयः॥ २-१६८

मातुर् अग्रे अधिजननं द्वितीयं मौञ्जिबन्धने। तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात्॥ २-१६९

तत्र यद् ब्रह्मजन्म-अस्य मौञ्जीबन्धनचिह्नितम्। तत्र-अस्य माता सावित्री पिता त्व् आचार्य उच्यते॥ २-१७०

वेदप्रदानाद् आचार्यं पितरं परिचक्षते। न ह्यस्मिन् युज्यते कर्म किञ् चिद् आ मौञ्जिबन्धनात्॥ २-१७१

न-अभिव्याहारयेद् ब्रह्म स्वधानिनयनाद् ऋते। शूद्रेण हि समस् तावद् यावद् वेदे न जायते॥ २-१७२

कृत-उपनयनस्य-अस्य व्रतादेशनम् इष्यते। ब्रह्मणो ग्रहणं च-एव क्रमेण विधि-पूर्वकम्॥ २-१७३

यद्यस्य विहितं चर्म यत् सूत्रं या च मेखला। यो दण्डो यत् - च वसनं तत् तद् अस्य व्रतेष्व् अपि॥ २-१७४

सेवेत-इमांस् तु नियमान् ब्रह्मचारी गुरौ वसन्। सन्नियम्य-इन्द्रियग्रामं तपोवृद्धि-अर्थम् आत्मनः॥ २-१७५

नित्यं स्नात्वा शुचिः कुर्याद् देव-ऋषि-पितृतर्पणम्। देवताभ्यर्चनं च-एव समिदाधानम् एव च॥ २-१७६

वर्जयेन् मधु मांसं च गन्धं माल्यं रसान् स्त्रियः। शुक्तानि यानि सर्वाणि प्राणिनां च-एव हिंसनम्॥ २-१७७

अभ्यङ्गम् अञ्जनं चाक्ष्णोर् उपानह्-चत्रधारणम्। कामं क्रोधं च लोभं च नर्तनं गीतवादनम्॥ २-१७८

द्यूतं च जनवादं च परिवादं तथा-अनृतम्। स्त्रीणां च प्रेक्षणालम्भम् उपघातं परस्य च॥ ंअलम्भाव् २-१७९

एकः शयीत सर्वत्र न रेतः स्कन्दयेत् क्व चित्। कामाद् हि स्कन्दयन् रेतो हिनस्ति व्रतम् आत्मनः॥ २-१८०

स्वप्ने सित्तवा ब्रह्मचारी द्विजः शुक्रम् अकामतः। स्नात्वा-अर्कम् अर्चयित्वा त्रिः पुनर् माम् इत्यृचं जपेत्॥ २-१८१

उदकुम्भं सुमनसो गोशकृत् - मृत्तिका-कुशान्। आहरेद् यावद् अर्थानि भैक्षं च-अह-अहश् चरेत्॥ २-१८२

वेद-यज्ञैर् अहीनानां प्रशस्तानां स्वकर्मसु। ब्रह्मचार्याहरेद् भैक्षं गृहेभ्यः प्रयतो अन्वहम्॥ २-१८३

गुरोः कुले न भिक्षेत न ज्ञाति-कुल-बन्धुषु। अलाभे त्व् अन्यगेहानां पूर्वं पूर्वं विवर्जयेत्॥ २-१८४

सर्वं वापि चरेद् ग्रामं पूर्व-उक्तानाम् असंभवे। नियम्य प्रयतो वाचम् अभिशस्तांस् तु वर्जयेत्॥ २-१८५

दूराद् आहृत्य समिधः सन्निदध्याद् विहायसि। सायं-प्रातश् च जुहुयात् ताभिर् अग्निम् अतन्द्रितः॥ २-१८६

अकृत्वा भैक्षचरणम् असमिध्य च पावकं। अनातुरः सप्तरात्रम् अवकीर्णिव्रतं चरेत्॥ २-१८७

भैक्षेण वर्तयेन् नित्यं न-एकान्न-अदी भवेद् व्रती। भैक्षेण व्रतिनो वृत्तिर् उपवास-समा स्मृता॥ २-१८८

व्रतवद् देव-दैवत्ये पित्र्ये कर्मण्यथ-ऋषिवत्। कामम् अभ्यर्थितो अश्नीयाद् व्रतम् अस्य न लुप्यते॥ २-१८९

ब्राह्मणस्य-एव कर्म-एतद् उपदिष्टं मनीषिभिः। राजन्य-वैश्ययोस् त्व् एवं न-एतत् कर्म विधीयते॥ २-१९०

चोदितो गुरुणा नित्यम् अप्रचोदित एव वा। कुर्याद् अध्ययने यत्नम् आचार्यस्य हितेषु च॥ २-१९१

शरीरं च-एव वाचं च बुद्धीन्द्रिय-मनांसि च। नियम्य प्राञ्जलिस् तिष्ठेद् वीक्षमाणो गुरोर् मुखम्॥ २-१९२

नित्यम् उद्धृत-पाणिः स्यात् साधु-अचारः सु-संवृतः। आस्यताम् इति च-उक्तः सन्न् आसीत-अभिमुखं गुरोः॥
२-१९३

हीन-अन्न-वस्त्र-वेषः स्यात् सर्वदा गुरुसन्निधौ॥ उत्तिष्ठेत् प्रथमं चास्य चरमं च-एव संविशेत्॥ २-१९४

प्रतिश्रावण-संभाषे शयानो न समाचरेत्। न-असीनो न च भुञ्जानो न तिष्ठन् न पराङ्-मुखः॥ २-१९५

आसीनस्य स्थितः कुर्याद् अभिगच्छंस् तु तिष्ठतः। प्रत्युद्गम्य त्व् आव्रजतः पश्चाद् धावंस् तु धावतः॥ २-१९६

पराङ्-मुखस्य-अभिमुखो दूरस्थस्य-एत्य च-अन्तिकम्। प्रणम्य तु शयानस्य निदेशे च-एव तिष्ठतः॥ २-१९७

नीचं शय्या-असनं च-अस्य नित्यं स्याद् गुरुसन्निधौ। गुरोस् तु चक्षुर्विषये न यथा-इष्ट-असनो भवेत्॥ २-१९८

न-उदाहरेद् अस्य नाम परोक्षम् अपि केवलम्। न च-एव-अस्य-अनुकुर्वीत गति-भाषित-चेष्टितम्॥ २-१९९

गुरोर् यत्र परिवादो निन्दा वा-अपि प्रवर्तते। कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततो अन्यतः॥ २-२००

परीवादात् खरो भवति श्वा वै भवति निन्दकः। परिभोक्ता कृमिर् भवति कीटो भवति मत्सरी॥ २-२०१

दूरस्थो न-अर्चयेद् एनं न क्रुद्धो न-अन्तिके स्त्रियाः। यान-असनस्थश् च-एव-एनम् अवरुह्य-अभिवादयेत्॥ २-२०२

प्रतिवाते अनुवाते च न-असीत गुरुणा सह। असंश्रवे च-एव गुरोर् न किं चिद् अपि कीर्तयेत्॥ २-२०३

गो-अश्व-उष्ट्र-यान-प्रासाद-प्रस्तरेषु कटेषु च। आसीत गुरुणा सार्धं शिला-फलक-नौषु च॥ २-२०४

गुरोर् गुरौ सन्निहिते गुरुवद् वृत्तिम् आचरेत्। न च-अ-निसृष्टो गुरुणा स्वान् गुरून् अभिवादयेत्॥ २-२०५

विद्यागुरुष्व् एवम् एव नित्या वृत्तिः स्वयोनिषु। प्रतिषेधत्सु च-अधर्माद् हितं च-उपदिशत्स्व् अपि॥ २-२०६

श्रेयःसु गुरुवद् वृत्तिं नित्यम् एव समाचरेत्। गुरुपुत्रेषु च-आर्येषु गुरोश् च-एव स्वबन्धुषु॥ २-२०७

बालः समान-जन्मा वा शिष्यो वा यज्ञकर्मणि। अध्यापयन् गुरुसुतो गुरुवत् - मानम् अर्हति॥ २-२०८

उत्सादनं च गात्राणां स्नापन-उच्छिष्टभोजने। न कुर्याद् गुरुपुत्रस्य पादयोश् च-अवनेजनम्॥ २-२०९

गुरुवत् प्रतिपूज्याः स्युः स-वर्णा गुरुयोषितः। असवर्णास् तु सम्पूज्याः प्रत्युत्थान-अभिवादनैः॥ २-२१०

अभ्यञ्जनं स्नापनं च गात्र-उत्सादनम् एव च। गुरुपत्न्या न कार्याणि केशानां च प्रसाधनम्॥ २-२११

गुरुपत्नी तु युवतिर् न-अभिवाद्या-इह पादयोः। पूर्णविंशतिवर्षेण गुण-दोषौ विजानता॥ २-२१२

स्वभाव एष नारीणां नराणाम् इह दूषणम्। अतो अर्थान् न प्रमाद्यन्ति प्रमदासु विपश्चितः॥ २-२१३

अविद्वांसम् अलं लोके विद्वांसम् अपि वा पुनः। प्रमदा ह्युत्पथं नेतुं काम-क्रोधवशानुगम्॥ २-२१४

मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत्। बलवान् इन्द्रियग्रामो विद्वांसम् अपि कर्षति॥ २-२१५

कामं तु गुरुपत्नीनां युवतीनां युवा भुवि। विधिवद् वन्दनं कुर्याद् असाव् अहम् इति ब्रुवन्॥ २-२१६

विप्रोष्य पादग्रहणम् अन्वहं च-अभिवादनम्। गुरुदारेषु कुर्वीत सतां धर्मम् अनुस्मरन्॥ २-२१७

यथा खनन् खनित्रेण नरो वार्यधिगच्छति। तथा गुरुगतां विद्यां शुश्रूषुर् अधिगच्छति॥ २-२१८

मुण्डो वा जटिलो वा स्याद् अथ वा स्यात् - शिखा-जटः। न-एनं ग्रामे अभिनिम्लोचेत् सूर्यो न-अभ्युदियात् क्व चित्॥ २-२१९

तं चेद् अभ्युदियात् सूर्यः शयानं कामचारतः। निम्लोचेद् वा-अप्यविज्ञानाज् जपन्न् उपवसेद् दिनम्॥ २-२२०

सूर्येण ह्यभिनिर्मुक्तः शयानो अभ्युदितश् च यः। प्रायश्चित्तम् अकुर्वाणो युक्तः स्यान् महता-एनसा॥ २-२२१

आचम्य प्रयतो नित्यम् उभे संध्ये समाहितः। शुचौ देशे जपञ् जप्यम् उपासीत यथाविधि॥ २-२२२

यदि स्त्री यद्यवरजः श्रेयः किं चित् समाचरेत्। तत् सर्वम् आचरेद् युक्तो यत्र च-अस्य रमेन् मनः॥ २-२२३

धर्म-अर्थाव् उच्यते श्रेयः काम-अर्थौ धर्म एव च। अर्थ एव-इह वा श्रेयस् त्रिवर्ग इति तु स्थितिः॥ २-२२४

आचार्यश् च पिता च-एव माता भ्राता च पूर्वजः। न-आर्तेन-अप्यवमन्तव्या ब्राह्मणेन विशेषतः॥ २-२२५

आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः। माता पृथिव्या मूर्तिस् तु भ्राता स्वो मूर्तिर् आत्मनः॥ २-२२६

यं माता-पितरौ क्लेशं सहेते संभवे नृणाम्। न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैर् अपि॥ २-२२७

तयोर् नित्यं प्रियं कुर्याद् आचार्यस्य च सर्वदा। तेष्व् एव त्रिषु तुष्टेषु तपः सर्वं समाप्यते॥ २-२२८

तेषां त्रयाणां शुश्रूषा परमं तप उच्यते। न तैर् अनभ्यनुज्ञातो धर्मम् अन्यं समाचरेत्॥ २-२२९

त एव हि त्रयो लोकास् त एव त्रय आश्रमाः। त एव हि त्रयो वेदास् त एव-उक्तास् त्रयो अग्नयः॥ २-२३०

पिता वै गार्हपत्यो अग्निर् माता-अग्निर् दक्षिणः स्मृतः। गुरुर् आहवनीयस् तु सा-अग्नित्रेता गरीयसी॥ २-२३१

त्रिष्व् अप्रमाद्यन्न् एतेषु त्रीन् लोकान् विजयेद् गृही। दीप्यमानः स्ववपुषा देववद् दिवि मोदते॥ २-२३२

इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम्। गुरुशुश्रूषया त्व् एवं ब्रह्मलोकं समश्नुते॥ २-२३३

सर्वे तस्य-अदृता धर्मा यस्य-एते त्रय आदृताः। अनादृतास् तु यस्य-एते सर्वास् तस्य-अ-फलाः क्रियाः॥ २-२३४

यावत् त्रयस् ते जीवेयुस् तावत् - न-अन्यं समाचरेत्। तेष्व् एव नित्यं शुश्रूषां कुर्यात् प्रियहिते रतः॥ २-२३५

तेषाम् अनुपरोधेन पारत्र्यं यद् यद् आचरेत्। तत् तन् निवेदयेत् तेभ्यो मनो-वचन-कर्मभिः॥ २-२३६

त्रिष्व् एतेष्व् इतिकृत्यं हि पुरुषस्य समाप्यते। एष धर्मः परः साक्षाद् उपधर्मो अन्य उच्यते॥ २-२३७

श्रद्दधानः शुभां विद्याम् आददीत-अवराद् अपि। अन्याद् अपि परं धर्मं स्त्रीरत्नं दुष्कुलाद् अपि॥ २-२३८

विषाद् अप्यमृतं ग्राह्यं बालाद् अपि सुभाषितम्। अमित्राद् अपि सद्वृत्तम् अमेध्याद् अपि काञ्चनम्॥ २-२३९

स्त्रियो रत्नान्यथो विद्या धर्मः शौचं सुभाषितम्। विविधानि च शील्पानि समादेयानि सर्वतः॥ २-२४०

अब्राह्मणाद् अध्यायनम् आपत्काले विधीयते। अनुव्रज्या च शुश्रूषा यावद् अध्यायनं गुरोः॥ २-२४१

न-अ-ब्राह्मणे गुरौ शिष्यो वासम् आत्यन्तिकं वसेत्। ब्राह्मणे वा-अन् - अनूचाने काङ्क्षन् गतिम् अनुत्तमाम्॥
२-२४२

यदि त्व् आत्यन्तिकं वासं रोचयेत गुरोः कुले। युक्तः परिचरेद् एनम् आ शरीरविमोक्षणात्॥ २-२४३

आ समाप्तेः शरीरस्य यस् तु शुश्रूषते गुरुम्। स गच्चत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतम्॥ २-२४४

न पूर्वं गुरवे किं चिद् उपकुर्वीत धर्मवित्। स्नास्यंस् तु गुरुणा-अज्ञप्तः शक्त्या गुरु-अर्थम् आहरेत्॥ २-२४५

क्षेत्रं हिरण्यं गाम् अश्वं चत्र-उपानहम् आसनम्। धान्यं शाकं च वासांसि गुरवे प्रीतिम् आवहेत्। २-२४६

आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते। गुरुदारे सपिण्डे वा गुरुवद् वृत्तिम् आचरेत्। २-२४७

एतेष्व् अविद्यमानेषु स्थान-असन-विहारवान्। प्रयुञ्जानो अग्निशुश्रूषां साधयेद् देहम् आत्मनः॥ २-२४८

एवं चरति यो विप्रो ब्रह्मचर्यम् अविप्लुतः। स गच्चत्युत्तमस्थानं न च-इह जायते पुनः॥ २-२४९

षट्त्रिंशद्-अब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम्। तदर्धिकं पादिकं वा ग्रहणान्तिकम् एव वा॥ ३-०१

वेदान् अधीत्य वेदौ वा वेदं वा-अपि यथाक्रमम्। अविप्लुत-ब्रह्मचर्यो गृहस्थाश्रमम् आवसेत्॥ ३-०२

तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः। स्रग्विणं तल्प आसीनम् अर्हयेत् प्रथमं गवा॥ ३-०३

गुरुणानुमतः स्नात्वा समावृत्तो यथाविधि। उद्वहेत द्विजो भार्यां स-वर्णां लक्षणान्विताम्॥ ३-०४

असपिण्डा च या मातुर् असगोत्रा च या पितुः। सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने॥ ३-०५

महान्त्यपि समृद्धानि गो-अज-अवि-धन-धान्यतः। स्त्रीसंबन्धे दश-एतानि कुलानि परिवर्जयेत्॥ ३-०६

हीन-क्रियं निष्-पुरुषं निश-चन्दो रोमश-अर्शसम्। क्षय-अमयाव्य-अपस्मारि-श्वित्रि-कुष्ठि-कुलानि च॥ ३-०७

न-उद्वहेत् कपिलां कन्यां न-अधिकाङ्गीं न रोगिणीम्। न-अ-लोमिकां न-अति-लोमां न वाचाटां न पिङ्गलाम्॥ ३-०८

न- ऋक्ष-वृक्ष-नदी-नाम्नीं न-अन्त्य-पर्वत-नामिकाम्। न पक्षि-अहि-प्रेष्य-नाम्नीं न च भीषन-नामिकाम्॥ ३-०९

अव्यङ्ग-अङ्गीं सौम्य-नाम्नीं हंस-वारण-गामिनीम्। तनुलोम-केश-दशनां मृद्व्-अङ्गीम् उद्वहेत् स्त्रियम्॥ ३-१०

यस्यास् तु न भवेद् भ्राता न विज्ञायेत वा पिता। न-उपयच्चेत तां प्राज्ञः पुत्रिका-अधर्मशङ्कया॥ ३-११

सवर्णा-अग्रे द्विजातीनां प्रशस्ता दारकर्मणि। कामतस् तु प्रवृत्तानाम् इमाः स्युः क्रमशो अवराः॥ ३-१२

शूद्रा-एव भार्या शूद्रस्य सा च स्वा च विशः स्मृते। ते च स्वा च-एव राज्ञश् च ताश् च स्वा च-अग्र-जन्मनः॥ ३-१३

न ब्राह्मण-क्षत्रिययोर् आपद्यपि हि तिष्ठतोः। कस्मिंश् चिद् अपि वृत्तान्ते शूद्रा भार्या-उपदिश्यते॥ ३-१४

हीनजाति-स्त्रियं मोहाद् उद्वहन्तो द्विजातयः। कुलान्येव नयन्त्याशु स-सन्तानानि शूद्रताम्॥ ३-१५

शूद्रावेदी पतत्यत्रेर् उतथ्यतनयस्य च। शौनकस्य सुत-उत्पत्त्या तद्-अपत्यतया भृगोः॥ ३-१६

शूद्रां शयनम् आरोप्य ब्राह्मणो यात्यधोगतिम्। जनयित्वा सुतं तस्यां ब्राह्मण्याद् एव हीयते॥ ३-१७

दैव-पित्र्य-अतिथेयानि तत् - प्रधानानि यस्य तु। न-अश्नन्ति पितृ-देवास् तन् न च स्वर्गं स गच्चति॥ ३-१८

वृषलीफेन-पीतस्य निःश्वास-उपहतस्य च। तस्यां च-एव प्रसूतस्य निष्कृतिर् न विधीयते॥ ३-१९

चतुर्णाम् अपि वर्णानं प्रेत्य च-इह हित-अहितान्। अष्टाव् इमान् समासेन स्त्रीविवाहान् निबोधत॥ ३-२०

ब्राह्मो दैवस् तथा-एव-अर्षः प्राजापत्यस् तथा-असुरः। गान्धर्वो राक्षसश् च-एव पैशाचश् च-अष्टमो अधमः॥ ३-२१

यो यस्य धर्म्यो वर्णस्य गुण-दोषौ च यस्य यौ। तद् वः सर्वं प्रवक्ष्यामि प्रसवे च गुण-अगुणान्॥ ३-२२

षड् आनुपूर्व्या विप्रस्य क्षत्रस्य चतुरो अवरान्। विश-शूद्रयोस् तु तान् एव विद्याद् धर्म्यान् अराक्षसान्॥ ३-२३

चतुरो ब्राह्मणस्य-अद्यान् प्रशस्तान् कवयो विदुः। राक्षसं क्षत्रियस्य-एकम् आसुरं वैश्य-शूद्रयोः॥ ३-२४

पञ्चानां तु त्रयो धर्म्या द्वाव् अधर्म्यौ स्मृताव् इह। पैशाचश् च-असुरश् च-एव न कर्तव्यौ कदा चन॥ ३-२५

पृथक् पृथग् वा मिश्रौ वा विवाहौ पूर्वचोदितौ। गान्धर्वो राक्षसश् च-एव धर्म्यौ क्षत्रस्य तौ स्मृतौ॥ ३-२६

आच्छाद्य च-अर्चयित्वा च श्रुत-शीलवते स्वयम्। आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः॥ ३-२७

यज्ञे तु वितते सम्यग् ऋत्विजे कर्म कुर्वते। अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते॥ ३-२८

एकं गोमिथुनं द्वे वा वराद् आदाय धर्मतः। कन्याप्रदानं विधिवद् आर्षो धर्मः स उच्यते॥ ३-२९

सह-उभौ चरतां धर्मम् इति वाचा-अनुभाष्य च। कन्याप्रदानम् अभ्यर्च्य प्राजापत्यो विधिः स्मृतः॥ ३-३०

ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै च-एव शक्तितः। कन्याप्रदानं स्वाच्छन्द्याद् आसुरो धर्म उच्यते॥ ३-३१

इच्छया-अन्योन्यसंयोगः कन्यायाश् च वरस्य च। गान्धर्वः स तु विज्ञेयो मैथुन्यः काम-संभवः॥ ३-३२

हत्वा चित्त्वा च भित्त्वा च क्रोशन्तीं रुदन्तीं गृहात्। प्रसह्य कन्याहरणं राक्षसो विधिर् उच्यते॥ ३-३३

सुप्तां मत्तां प्रमत्तां वा रहो यत्र-उपगच्छति। स पापिष्ठो विवाहानां पैशाचश् च-अष्टमो अधमः॥ ३-३४

अद्भिर् एव द्विज-अग्र्याणां कन्यादानं विशिष्यते। इतरेषां तु वर्णानाम् इतरेतरकाम्यया॥ ३-३५

यो यस्य-एषां विवाहानां मनुना कीर्तितो गुणः। सर्वं शृणुत तं विप्राः सर्वं कीर्तयतो मम॥ ३-३६

दश पूर्वान् परान् वंश्यान् आत्मानं च-एकविंशकम्। ब्राह्मीपुत्रः सुकृतकृत् - मोचयत्येनसः पितॄन्॥ ३-३७

दैव-ऊढाजः सुतश् च-एव सप्त सप्त पर-अवरान्। आर्ष-ऊढाजः सुतस् त्रींस् त्रीन् षट् षट् काय-ऊढजः सुतः॥
३-३८

ब्राह्म-अदिषु विवाहेषु चतुर्ष्व् एव-अनुपूर्वशः। ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसम्मताः॥ ३-३९

रूप-सत्त्व-गुण-उपेता धनवन्तो यशस्विनः। पर्याप्त-भोगा धर्मिष्ठा जीवन्ति च शतं समाः॥ ३-४०

इतरेषु तु शिष्टेषु नृशंसा-अनृतवादिनः। जायन्ते दुर्विवाहेषु ब्रह्म-धर्म-द्विषः सुताः॥ ३-४१

अनिन्दितैः स्त्रीविवाहैर् अनिन्द्या भवति प्रजा। निन्दितैर् निन्दिता नृणां तस्मान् निन्द्यान् विवर्जयेत्॥ ३-४२

पाणिग्रहणसंस्कारः स-वर्णासु-उपदिश्यते। असवर्णास्व् अयं ज्ञेयो विधिर् उद्वाहकर्मणि॥ ३-४३

शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया। वसनस्य दशा ग्राह्या शूद्रया-उत्कृष्टवेदने॥ ३-४४

ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा। पर्ववर्जं व्रजेच् च-एनां तद्-व्रतो रतिकाम्यया॥ ३-४५

ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः। चतुर्भिर् इतरैः सार्धम् अहोभिः सद्विगर्हितैः॥ ३-४६

तासाम् आद्याश् चतस्रस् तु निन्दिता-एकादशी च या। त्रयोदशी च शेषास् तु प्रशस्ता दशरात्रयः॥ ३-४७

युग्मासु पुत्रा जायन्ते स्त्रियो अयुग्मासु रात्रिषु। तस्माद् युग्मासु पुत्रार्थी संविशेद् आर्तवे स्त्रियम्॥ ३-४८

पुमान् पुंसो अधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः। समे अपुमान् पुं-स्त्रियौ वा क्षीणे अल्पे च विपर्ययः॥ ३-४९

निन्द्यास्व् अष्टासु च-अन्यासु स्त्रियो रात्रिषु वर्जयन्। ब्रह्मचार्येव भवति यत्र तत्र-अश्रमे वसन्॥ ३-५०

न कन्यायाः पिता विद्वान् गृह्णीयात् - शुल्कम् अणु-अपि। गृह्णन् - शुल्कं हि लोभेन स्यान् नरो अपत्यविक्रयी॥ ३-५१

स्त्रीधनानि तु ये मोहाद् उपजीवन्ति बान्धवाः। नारी यानानि वस्त्रं वा ते पापा यान्त्यधोगतिम्॥ ३-५२

आर्षे गोमिथुनं शुल्कं के चिद् आहुर् मृषा-एव तत्। अल्पो अप्येवं महान् वा-अपि विक्रयस् तावद् एव सः॥ ३-५३

यासां न-अददते शुल्कं ज्ञातयो न स विक्रयः। अर्हणं तत् कुमारीणाम् आनृशंस्यं च केवलम्॥ ३-५४

पितृभिर् भ्रातृभिश् च-एताः पतिभिर् देवरैस् तथा। पूज्या भूषयितव्याश् च बहुकल्याणम् ईप्सुभिः॥ ३-५५

यत्र नार्यस् तु पूज्यन्ते रमन्ते तत्र देवताः। यत्र-एतास् तु न पूज्यन्ते सर्वास् तत्र-अ-फलाः क्रियाः॥ ३-५६

शोचन्ति जामयो यत्र विनश्यत्याशु तत् कुलम्। न शोचन्ति तु यत्र-एता वर्धते तद् हि सर्वदा॥ ३-५७

जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः॥ तानि कृत्याहतानि-इव विनश्यन्ति समन्ततः॥ ३-५८

तस्माद् एताः सदा पूज्या भूषण-अचादन-अशनैः। भूति-कामैर् नरैर् नित्यं सत्करेषु-उत्सवेषु च।।३-५९

संतुष्टो भार्यया भर्ता भर्त्रा भार्या तथ-एव च। यस्मिन्न् एव कुले नित्यं कल्याणं तत्र वै ध्रुवम्॥ ३-६०

यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत्। अप्रमोदात् पुनः पुंसः प्रजनं न प्रवर्तते॥ ३-६१

स्त्रियां तु रोचमानायां सर्वं तद् रोचते कुलं। तस्यां त्व् अरोचमानायां सर्वम् एव न रोचते॥ ३-६२

कु-विवाहैः क्रिया-लोपैर् वेदानध्ययनेन च। कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च॥ ३-६३

शिल्पेन व्यवहारेण शूद्रापत्यैश् च केवलैः। गोभिर् अश्वैश् च यानैश् च कृष्या राज-उपसेवया॥ ३-६४

अयाज्ययाजनैश् च-एव नास्तिक्येन च कर्मणाम्। कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः॥ ३-६५

मन्त्रतस् तु समृद्धानि कुलान्यल्प-धनान्यपि। कुलसंख्यां च गच्छन्ति कर्षन्ति च महद् यशः॥ ३-६६

वैवाहिके अग्नौ कुर्वीत गृह्यं कर्म यथाविधि। पञ्चयज्ञविधानं च पक्तिं च-अन्वाहिकीं गृही॥ ३-६७

पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः। कण्डनी च-उदकुम्भश् च बध्यते यास् तु वाहयन्॥ ३-६८

तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः। पञ्च क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम्॥ ३-६९

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस् तु तर्पणम्। होमो दैवो बलिर् भौतो नृयज्ञो अतिथिपूजनम्॥ ३-७०

पञ्च-एतान् यो महायज्ञान् न हापयति शक्तितः। स गृहे अपि वसन् नित्यं सूनादोषैर् न लिप्यते ३-७१

देवता-अतिथि-भृत्यानां पितृणाम् आत्मनश् च यः। न निर्वपति पञ्चानाम् उच्छ्वसन् न स जीवति॥ ३-७२

अहुतं च हुतं च-एव तथा प्रहुतम् एव च। ब्राह्म्यं हुतं प्राशितं च पञ्चयज्ञान् प्रचक्षते॥ ३-७३

जपो अहुतो हुतो होमः प्रहुतो भौतिको बलिः। ब्राह्म्यं हुतं द्विजाग्र्यार्चा प्राशितं पितृतर्पणम्॥ ३-७४

स्वाध्याये नित्ययुक्तः स्याद् दैवे च-एव-इह कर्मणि। दैवकर्मणि युक्तो हि बिभर्ति-इदं चर-अचरम्॥ ३-७५

अग्नौ प्रास्ता-अहुतिः सम्यग् आदित्यम् उपतिष्ठते। आदित्याज् जायते वृष्टिर् वृष्टेर् अन्नं ततः प्रजाः॥ ३-७६

यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः। तथा गृहस्थम् आश्रित्य वर्तन्ते सर्व आश्रमाः॥ ३-७७

यस्मात् त्रयो अप्याश्रमिणो ज्ञानेन-अन्नेन च-अन्वहम्। गृहस्थेन-एव धार्यन्ते तस्माज् ज्येष्ठाश्रमो गृही॥ ३-७८

स संधार्यः प्रयत्नेन स्वर्गम् अक्षयम् इच्छता। सुखं च-इह-इच्छता-अत्यन्तं यो अधार्यो दुर्बल-इन्द्रियैः॥ ३-७९

ऋषयः पितरो देवा भूतान्यतिथयस् तथा। आशासते कुटुम्बिभ्यस् तेभ्यः कार्यं विजानता॥ ३-८०

स्वाध्यायेन-अर्चयेत-ऋषीन् होमैर् देवान् यथाविधि। पितृन् - श्राद्धैश् च नृन् अन्नैर् भूतानि बलिकर्मणा॥ ३-८१

कुर्याद् अह-र्अहः श्राद्धम् अन्नाद्येन-उदकेन वा। पयो-मूल-फलैर् वा-अपि पितृभ्यः प्रीतिम् आवहन्॥ ३-८२

एकम् अप्याशयेद् विप्रं पितृ-अर्थे पाञ्चयज्ञिके। न च-एव-अत्र-अशयेत् किं चिद् वैश्वदेवं प्रति द्विजम्॥ ३-८३

वैश्वदेवस्य सिद्धस्य गृह्ये अग्नौ विधिपूर्वकम्। आभ्यः कुर्याद् देवताभ्यो ब्राह्मणो होमम् अन्वहम्॥ ३-८४

अग्नेः सोमस्य च-एव-अदौ तयोश् च-एव समस्तयोः। विश्वेभ्यश् च-एव देवेभ्यो धन्वन्तरय एव च॥ ३-८५

कुह्वै च-एव-अनुमत्यै च प्रजापतय एव च । सह द्यावापृथिव्योश् च तथा स्विष्टकृते अन्ततः॥ ३-८६

एवं सम्यग्ग् हविर् हुत्वा सर्वदिक्षु प्रदक्षिणम्। इन्द्र-अन्तक-अप्पति-इन्दुभ्यः स-अनुगेभ्यो बलिं हरेत्॥ ३-८७

मरुद्भ्य इति तु द्वारि क्षिपेद् अप्स्व् अद्भ्य इत्यपि। वनस्पतिभ्य इत्येवं मुसल-उलूखले हरेत्॥ ३-८८

उच्चीर्षके श्रियै कुर्याद् भद्रकाल्यै च पादतः। ब्रह्म-वास्तोष्पतिभ्यां तु वास्तुमध्ये बलिं हरेत्॥ ३-८९

विश्वेभ्यश् च-एव देवेभ्यो बलिम् आकाश उत्क्षिपेत्। दिवाचरेभ्यो भूतेभ्यो नक्तंचारिभ्य एव च॥ ३-९०

पृष्ठवास्तुनि कुर्वीत बलिं सर्वात्मभूतये। पितृभ्यो बलिशेषं तु सर्वं दक्षिणतो हरेत्॥ ३-९१

शूनां च पतितानां च श्वपचां पाप-रोगिणाम्। वयसानां कृमीणां च शनकैर् निर्वपेद् भुवि॥ ३-९२

एवं यः सर्वभूतानि ब्राह्मणो नित्यम् अर्चति। स गच्चति परं स्थानं तेजोमूर्तिः पथा-ऋजुना॥ ३-९३

कृत्वा-एतद् बलिकर्म-एवम् अतिथिं पूर्वम् आशयेत्। भिक्षां च भिक्षवे दद्याद् विधिवद् ब्रह्मचारिणे॥ ३-९४

यत् पुण्यफलम् आप्नोति गां दत्त्वा विधिवद् गुरोः। तत् पुण्यफलम् आप्नोति भिक्षां दत्त्वा द्विजो गृही॥ ३-९५

भिक्षाम् अप्युदपात्रं वा सत्कृत्य विधिपूर्वकम्। वेदतत्त्वार्थविदुषे ब्राह्मणाय-उपपादयेत्॥ ३-९६

नश्यन्ति हव्य-कव्यानि नराणाम् अविजानताम्। भस्मीभूतेषु विप्रेषु मोहाद् दत्तानि दातृभिः॥ ३-९७

विद्या-तपः-समृद्धेषु हुतं विप्रमुखाग्निषु। निस्तारयति दुर्गाच् च महतश् च-एव किल्बिषात्॥ ३-९८

संप्राप्ताय त्व् अतिथये प्रदद्याद् आसन-उदके। अन्नं च-एव यथाशक्ति सत्कृत्य विधिपूर्वकम्॥ ३-९९

शिलान् अप्युञ्चतो नित्यं पञ्चाग्नीन् अपि जुह्वतः। सर्वं सुकृतम् आदत्ते ब्राह्मणो अनर्चितो वसन्॥ ३-१००

तृणानि भूमिर् उदकं वाक् चतुर्थी च सूनृता। एतान्यपि सतां गेहे न-उच्चिद्यन्ते कदा चन॥ ३-१०१

एकरात्रं तु निवसन्न् अतिथिर् ब्राह्मणः स्मृतः। अनित्यं हि स्थितो यस्मात् तस्माद् अतिथिर् उच्यते॥ ३-१०२

न-एकग्रामीणम् अतिथिं विप्रं साङ्गतिकं तथा। उपस्थितं गृहे विद्याद् भार्या यत्र-अग्नयो अपि वा॥ ३-१०३

उपासते ये गृहस्थाः परपाकम् अबुद्धयः। तेन ते प्रेत्य पशुतां व्रजन्त्यन्नादिदायिनः॥ ३-१०४

अप्रणोद्यो अतिथिः सायं सूर्य-ऊढो गृहमेधिना। काले प्राप्तस् त्व् अकाले वा न-अस्य-अन् - अश्नन् गृहे वसेत्॥ ३-१०५

न वै स्वयं तद् अश्नीयाद् अतिथिं यन् न भोजयेत्। धन्यं यशस्यम् आयुष्यं स्वर्ग्यं वा-अतिथिपूजनम्॥ ३-१०६

आसन-अवसथौ शय्याम् अनुव्रज्याम् उपासनाम्। उत्तमेषु-उत्तमं कुर्याद् हीने हीनं समे समम्॥ ३-१०७

वैश्वदेवे तु निर्वृत्ते यद्यन्यो अतिथिर् आव्रजेत्। तस्य-अप्यन्नं यथाशक्ति प्रदद्यान् न बलिं हरेत्॥ ३-१०८

न भोजनार्थं स्वे विप्रः कुल-गोत्रे निवेदयेत्। भोजनार्थं हि ते शंसन् वान्ताशी-इत्युच्यते बुधैः॥ ३-१०९

न ब्राह्मणस्य त्व् अतिथिर् गृहे राजन्य उच्यते। वैश्य-शूद्रौ सखा च-एव ज्ञातयो गुरुर् एव च॥ ३-११०

यदि त्व् अतिथिधर्मेण क्षत्रियो गृहम् आव्रजेत्। भुक्तवत्सु च विप्रेषु कामं तम् अपि भोजयेत्॥ ३-१११

वैश्य-शूद्राव् अपि प्राप्तौ कुटुम्बे अतिथि-धर्मिणौ॥  भोजयेत् सह भृत्यैस् ताव् आनृशंस्यं प्रयोजयन्॥ ३-११२

इतरान् अपि सखि-अदीन् सम्प्रीत्या गृहम् आगतान्। प्रकृत्य-अन्नं यथाशक्ति भोजयेत् सह भार्यया॥ ३-११३

सुवासिनीः कुमारीश् च रोगिणो गर्भिणीः स्त्रियः। अतिथिभ्यो अग्र एव-एतान् भोजयेद् अविचारयन्॥  ३-११४

अदत्त्वा तु य एतेभ्यः पूर्वं भुङ्क्ते अ-विचक्षणः। स भुञ्जानो न जानाति श्व-गृध्रैर् जग्धिम् आत्मनः॥ ३-११५

भुक्तवत्स्व् अथ विप्रेषु स्वेषु भृत्येषु च-एव हि। भुञ्जीयातां ततः पश्चाद् अवशिष्टं तु दम्पती॥ ३-११६

देवान् ऋषीन् मनुष्यांश् च पितॄन् गृह्याश् च देवताः। पूजयित्वा ततः पश्चाद् गृहस्थः शेषभुग् भवेत्॥ ३-११७

अघं स केवलं भुङ्क्ते यः पचत्यात्मकारणात्। यज्ञशिष्टाशनं ह्येतत् सताम् अन्नं विधीयते॥ ३-११८

राज-ऋत्विज्-स्नातक-गुरून् प्रिय-श्वशुर-मातुलान्। अर्हयेन् मधुपर्केण परिसंवत्सरात् पुनः॥ ३-११९

राजा च श्रोत्रियश् च-एव यज्ञकर्मण्युपस्थितौ। मधुपर्केण संपूज्यौ न त्व् अयज्ञ इति स्थितिः॥ ३-१२०

सायं त्व् अन्नस्य सिद्धस्य पत्न्यमन्त्रं बलिं हरेत्। वैश्वदेवं हि नाम-एतत् सायं प्रातर् विधीयते॥ ३-१२१

पितृयज्ञं तु निर्वर्त्य विप्रश् चन्द्रक्षये अग्निमान्। पिण्डान्वाहार्यकं श्राद्धं कुर्यान् मास-अनुमासिकम्॥ ३-१२२

पितॄणां मासिकं श्राद्धम् अन्वाहार्यं विदुर् बुधाः। तच् च-अमिषेणा कर्तव्यं प्रशस्तेन प्रयत्नतः॥ ३-१२३

तत्र ये भोजनीयाः स्युर् ये च वर्ज्या द्विजोत्तमाः। यावन्तश् च-एव यैश् च-अन्नैस् तान् प्रवक्ष्याम्यशेषतः॥ ३-१२४

द्वौ दैवे पितृकार्ये त्रीन् एकैकम् उभयत्र वा । भोजयेत् सु-समृद्धो अपि न प्रसज्जेत विस्तरे ॥  ३-१२५

सत्क्रियां देश-कालौ च शौचं ब्राह्मणसंपदः । पञ्च-एतान् विस्तरो हन्ति तस्मान् न-ईहेत विस्तरम् ॥ ३-१२६

प्रथिता प्रेतकृत्या-एषा पित्र्यं नाम विधुक्षये । तस्मिन् युक्तस्य-एति नित्यं प्रेतकृत्या-एव लौकिकी ॥ ३-१२७

श्रोत्रियाय-एव देयानि हव्य-कव्यानि दातृभिः । अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् ॥ ३-१२८

एकैकम् अपि विद्वांसं दैवे पित्र्ये च भोजयेत् । पुष्कलं फलम् आप्नोति न-अमन्त्रज्ञान् बहून् अपि ॥ ३-१२९

दूराद् एव परीक्षेत ब्राह्मणं वेदपारगम् । तीर्थं तद् हव्य-कव्यानां प्रदाने सो अतिथिः स्मृतः ॥ ३-१३०

सहस्रं हि सहस्राणाम् अनृचां यत्र भुञ्जते । एकस् तान् मन्त्रवित् प्रीतः सर्वान् अर्हति धर्मतः ॥ ३-१३१

ज्ञान-उत्कृष्टाय देयानि कव्यानि च हवींषि च । न हि हस्ताव् असृग्दिग्धौ रुधिरेण-एव शुध्यतः ॥ ३-१३२

यावतो ग्रसते ग्रासान् हव्य-कव्येष्व् अमन्त्रवित् । तावतो ग्रसते प्रेतो दीप्तशूल-ऋष्टि-अयोगुडान् ॥ ३-१३३

ज्ञाननिष्ठा द्विजाः के चित् तपोनिष्ठास् तथा-अपरे । तपः-स्वाध्यायनिष्ठाश् च कर्मनिष्ठास् तथा-अपरे ॥ ३-१३४

ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः । हव्यानि तु यथान्यायं सर्वेष्व् एव चतुष्र्व् अपि ॥ ३-१३५

अश्रोत्रियः पिता यस्य पुत्रः स्याद् वेदपारगः । अश्रोत्रियो वा पुत्रः स्यात् पिता स्याद् वेदपारगः ॥ ३-१३६

ज्यायांसम् अनयोर् विद्याद् यस्य स्यात् - श्रोत्रियः पिता । मन्त्रसंपूजनार्थं तु सत्कारम् इतरो अर्हति ॥ ३-१३७

न श्राद्धे भोजयेन् मित्रं धनैः कार्यो अस्य संग्रहः । नारिं न मित्रं यं विद्यात् तं श्राद्धे भोजयेद् द्विजम् ॥  ३-१३८

यस्य मित्र-प्रधानानि श्राद्धानि च हवींषि च । तस्य प्रेत्य फलं न-अस्ति श्राद्धेषु च हविःषु च ॥ ३-१३९

यः संगतानि कुरुते मोहात् -  श्राद्धेन मानवः । स स्वर्गाच् च्यवते लोकात् - श्राद्ध-मित्रो द्विजाधमः ॥ ३-१४०

संभोजानि सा-अभिहिता पैशाची दक्षिणा द्विजैः । इह-एव-अस्ते तु सा लोके गौर् अन्धा-इव-एकवेश्मनि ॥ ३-१४१

यथा-इरिणे बीजम् उप्त्वा न वप्ता लभते फलम् । तथा-अन् - ऋचे हविर् दत्त्वा न दाता लभते फलम् ॥ ३-१४२

दातॄन् प्रतिग्रहीतॄंश् च कुरुते फलभागिनः । विदुषे दक्षिणां दत्त्वा विधिवत् प्रेत्य च-इह च ॥ ३-१४३

कामं श्राद्धे अर्चयेन् मित्रं न-अभिरूपम् अपि त्व् अरिम् ॥  द्विषता हि हविर् भुक्तं भवति प्रेत्य निष्-फलम् ॥ ३-१४४

यत्नेन भोजयेत् -  श्राद्धे बह्वृचं वेदपारगम् । शाखान्तगम् अथ-अध्वर्युं चन्दोगं तु समाप्तिकम् ॥ ३-१४५

एषाम् अन्यतमो यस्य भुञ्जीत श्राद्धम् अर्चितः । पितॄणां तस्य तृप्तिः स्यात् - शाश्वती साप्तपौरुषी ॥ ३-१४६

एष वै प्रथमः कल्पः प्रदाने हव्य-कव्ययोः। अनुकल्पस् त्व् अयं ज्ञेयः सदा सद्भिर् अनुष्ठितः॥ ३-१४७

मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुम्। दौहित्रं विट्पतिं बन्धुम् ऋत्विग् याज्यौ च भोजयेत्॥ ३-१४८

न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्मवित्। पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः॥ ३-१४९

ये स्तेन-पतित-क्लीबा ये च नास्तिकवृत्तयः। तान् हव्य-कव्ययोर् विप्रान् अनर्हान् मनुर् अब्रवीत्॥ ३-१५०

जटिलं च-अनधीयानं दुर्बालं कितवं तथा। याजयन्ति च ये पूगांस् तांश् च श्राद्धे न भोजयेत्॥ ३-१५१

चिकित्सकान् देवलकान् मांसविक्रयिणस् तथा। विपणेन च जीवन्तो वर्ज्याः स्युर् हव्य-कव्ययोः॥ ३-१५२

प्रेष्यो ग्रामस्य राज्ञश् च कुनखी श्यावदन्तकः। प्रतिरोद्धा गुरोश् च-एव त्यक्त-अग्निर् वार्धुषिस् तथा॥ ३-१५३

यक्ष्मी च पशुपालश् च परिवेत्ता निराकृतिः। ब्रह्मद्विष्- परिवित्तिश् च गणाभ्यन्तर एव च॥ ३-१५४

कुशीलवो अवकीर्णी च वृषलीपतिर् एव च। पौनर्भवश् च काणश् च यस्य च-उपपतिर् गृहे॥ ३-१५५

भृतकाध्यापको यश् च भृतकाध्यापितस् तथा। शूद्र-शिष्यो गुरुश् च-एव वाग्दुष्टः कुण्ड-गोलकौ॥ ३-१५६

अकारणे परित्यक्ता माता-पित्रोर् गुरोस् तथा। ब्राह्मैर् यौनैश् च संबन्धैः संयोगं पतितैर् गतः॥ ३-१५७

अगारदाही गरदः कुण्डाशी सोमविक्रयी। समुद्रयायी बन्दी च तैलिकः कूटकारकः॥ ३-१५८

पित्रा विवदमानश् च कितवो मद्यपस् तथा। पापरोग्यभिशस्तश् च दाम्भिको रसविक्रयी॥ ३-१५९

धनुः-शराणां कर्ता च यश् च-अग्रेदिधिषूपतिः। मित्रध्रुग् द्यूत-वृत्तिश् च पुत्र-अचार्यस् तथा-एव च॥ ३-१६०

भ्रामरी गन्डमाली च श्वित्र्यथो पिशुनस् तथा। उन्मत्तो अन्धश् च वर्ज्याः स्युर् वेदनिन्दक एव च॥ ३-१६१

हस्ति-गो-अश्व-उष्ट्रदमको नक्षत्रैर् यश् च जीवति। पक्षिणां पोषको यश् च युद्धाचार्यस् तथा-एव च॥ ३-१६२

स्रोतसां भेदको यश् च तेषां च-अवरणे रतः। गृहसंवेशको दूतो वृक्षारोपक एव च॥ ३-१६३

श्वक्रीडी श्येनजीवी च कन्यादूषक एव च। हिंस्रो वृषल-वृत्तिश् च गणानां च-एव याजकः॥ ३-१६४

आचार-हीनः क्लीबश् च नित्यं याचनकस् तथा। कृषिजीवी श्लीपदी च सद्भिर् निन्दित एव च॥ ३-१६५

औरभ्रिको माहिषिकः परपूर्वापतिस् तथा। प्रेतनिर्यापकश् च-एव वर्जनीयाः प्रयत्नतः॥ ३-१६६

एतान् विगर्हित-अचारान् अपाङ्क्तेयान् द्विजाधमान्। द्विजातिप्रवरो विद्वान् उभयत्र विवर्जयेत्॥ ३-१६७

ब्राह्मणो त्व् अनधीयानस् तृणाग्निर् इव शाम्यति। तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते॥ ३-१६८

अपाङ्क्तदाने यो दातुर् भवत्यूर्ध्वं फल-उदयः। दैवे हविषि पित्र्ये वा तं प्रवक्ष्याम्यशेषतः॥ ३-१६९

अव्रतैर् यद् द्विजैर् भुक्तं परिवेतृ-अदिभिस् तथा। अपाङ्क्तैर् यद् अन्यैश् च तद् वै रक्षांसि भुञ्जते॥ ३-१७०

दाराग्निहोत्रसंयोगं कुरुते यो अग्रजे स्थिते। परिवेत्ता स विज्ञेयः परिवित्तिस् तु पूर्वजः॥ ३-१७१

परिवित्तिः परिवेत्ता यया च परिविद्यते। सर्वे ते नरकं यान्ति दातृयाजक-पञ्चमाः॥ ३-१७२

भ्रातुर् मृतस्य भार्यायां यो अनुरज्येत कामतः। धर्मेण-अपि नियुक्तायां स ज्ञेयो दिधिषूपतिः॥ ३-१७३

परदारेषु जायेते द्वौ सुतौ कुण्ड-गोलकौ। पत्यौ जीवति कुण्डः स्यान् मृते भर्तरि गोलकः॥ ३-१७४

तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य च-इह च। दत्तानि हव्य-कव्यानि नाशयन्ति प्रदायिनाम्॥ ३-१७५

अपाङ्क्त्यो यावतः पङ्क्त्यान् भुञ्जानान् अनुपश्यति। तावतां न फलं तत्र दाता प्राप्नोति बालिशः॥ ३-१७६

वीक्ष्य-अन्धो नवतेः काणः षष्टेः श्वित्री शतस्य तु। पापरोगी सहस्रस्य दातुर् नाशयते फलम्॥ ३-१७७

यावतः संस्पृशेद् अङ्गैर् ब्राह्मणान् - शूद्रयाजकः। तावतां न भवेद् दातुः फलं दानस्य पौर्तिकम्॥ ३-१६८

वेदविद्-च-अपि विप्रो अस्य लोभात् कृत्वा प्रतिग्रहम्। विनाशं व्रजति क्षिप्रम् आमपात्रम् इव-अम्भसि॥ ३-१७९

सोमविक्रयिणे विष्ठा भिषजे पूय-शोणितम्। नष्टं देवलके दत्तम् अप्रतिष्ठं तु वार्धुषौ॥ ३-१८०

यत् तु वाणिजके दत्तं न-इह न-अमुत्र तद् भवेत्। भस्मनि-इव हुतं द्रव्यं तथा पौनर्भवे द्विजे॥ ३-१८१

इतरेषु त्व् अपाङ्क्त्येषु यथा-उद्दिष्टेष्व् असाधुषु। मेदो-असृङ्-मांस-मज्जा-अस्थि वदन्त्यन्नं मनीषिणः॥

अपाङ्क्त्य-उपहता पङ्क्तिः पाव्यते यैर् द्विजोत्तमैः। तान् निबोधत कात्स्न्र्येन द्विजाग्र्यान् पङ्क्तिपावनान्॥ ३-१८३

अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च। श्रोत्रियान्वयजाश् च-एव विज्ञेयाः पङ्क्तिपावनाः॥ ३-१८४

त्रिणाचिकेतः पञ्च-अग्निस् त्रिसुपर्णः षडङ्गवित्। ब्रह्मदेयात्मसन्तानो ज्येष्ठसामग एव च॥ ३-१८५

वेदार्थ-वित् प्रवक्ता च ब्रह्मचारी सहस्रदः। शतायुश् च-एव विज्ञेया ब्राह्मणाः पङ्क्तिपावनाः॥ ३-१८६

पूर्वेद्युर् अपरेद्युर् वा श्राद्धकर्मण्युपस्थिते। निमन्त्रयेत त्र्य्-अवरान् सम्यग् विप्रान् यथा-उदितान्॥ ३-१८७

निमन्त्रितो द्विजः पित्र्ये नियतात्मा भवेत् सदा। न च चन्दांस्यधीयीत यस्य श्राद्धं च तद् भवेत्॥ ३-१८८

निमन्त्रितान् हि पितर उपतिष्ठन्ति तान् द्विजान्। वायुवत् - च-अनुगच्चन्ति तथा-असीनान् उपासते॥ ३-१८९

केतितस् तु यथान्यायं हव्ये कव्ये द्विजोत्तमः। कथं चिद् अप्यतिक्रामन् पापः सूकरतां व्रजेत्॥ ३-१९०

आमन्त्रितस् तु यः श्राद्धे वृशल्या सह मोदते। दातुर् यद् दुष्कृतं किं चित् तत् सर्वं प्रतिपद्यते॥ ३-१९१

अक्रोधनाः शौच-पराः सततं ब्रह्मचारिणः। न्यस्त-शस्त्रा महा-भागाः पितरः पूर्वदेवताः॥ ३-१९२

यस्माद् उत्पत्तिर् एतेषां सर्वेषाम् अप्यशेषतः। ये च यैर् उपचर्याः स्युर् नियमैस् तान् निबोधत॥ ३-१९३

मनोर् हैरण्यगर्भस्य ये मरीचि-अदयः सुताः। तेषाम् ऋषीणां सर्वेषां पुत्राः पितृगणाः स्मृताः॥ ३-१९४

विराज्-सुताः सोमसदः साध्यानां पितरः स्मृताः। अग्निष्वात्ताश् च देवानां मारीचा लोकविश्रुताः॥ ३-१९५

दैत्य-दानव-यक्षाणां गन्धर्व-उरग-रक्षसाम्। सुपर्ण-किन्नराणां च स्मृता बर्हिषदो अत्रिजाः॥ ३-१९६

सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः। वैश्यानाम् आज्यपा नाम शूद्राणां तु सुकालिनः॥ ३-१९७

सोमपास् तु कवेः पुत्रा हविष्मन्तो अङ्गिरःसुताः। पुलस्त्यस्य-अज्यपाः पुत्रा वसिष्ठस्य सुकालिनः॥ ३-१९८

अग्निदग्ध-अनग्निदग्धान् काव्यान् बर्हिषदस् तथा। अग्निष्वात्तांश् च सौम्यांश् च विप्राणाम् एव निर्दिशेत्॥ ३-१९९

य एते तु गणा मुख्याः पितृणां परिकीर्तिताः। तेषाम् अपि-इह विज्ञेयं पुत्र-पौत्रम् अनन्तकम्॥ ३-२००

ऋषिभ्यः पितरो जाताः पितृभ्यो देव-मानवाः। देवेभ्यस् तु जगत् सर्वं चरं स्थाण्व् अनुपूर्वशः॥ ३-२०१

राजतैर् भाजनैर् एषाम् अथो वा रजतान्वितैः। वार्यपि श्रद्धया दत्तम् अक्षयाय-उपकल्पते॥ ३-२०२

दैवकार्याद् द्विजातीनां पितृकार्यं विशिष्यते। दैवं हि पितृकार्यस्य पूर्वम् आप्यायनं स्मृतम्॥ ३-२०३

तेषाम् आरक्षभूतं तु पूर्वं दैवं नियोजयेत्। रक्सांसि विप्रलुम्पन्ति श्राद्धम् आरक्षवर्जितम्॥ ३-२०४

दैव-अद्यन्तं तद् ईहेत पितृ-अद्यन्तं न तद् भवेत्। पितृ-अद्यन्तं त्व् ईहमानः क्षिप्रं नश्यति स-अन्वयः॥ ३-२०५

शुचिं देशं विविक्तं च गोमयेन-उपलेपयेत्। दक्षिना-प्रवणं च-एव प्रयत्नेन-उपपादयेत्॥ ३-२०६

अवकाशेषु चोक्षेषु जलतीरेषु च-एव हि। विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा॥ ३-२०७

आसनेषु-उपक्ऌप्तेषु बर्हिष्मत्सु पृथक्-पृथक्। उपस्पृष्ट-उदकान् सम्यग् विप्रांस् तान् उपवेशयेत्॥ ३-२०८

उपवेश्य तु तान् विप्रान् आसनेष्व् अजुगुप्सितान्। गन्ध-माल्यैः सुरभिभिर् अर्चयेद् दैवपूर्वकम्॥ ३-२०९

तेषाम् उदकम् आनीय स-पवित्रांस् तिलान् अपि। अग्नौ कुर्याद् अनुज्ञातो ब्राह्मणो ब्राह्मणैः सह॥ ३-२१०

अग्नेः सोम-यमाभ्यां च कृत्वा-अप्यायनम् आदितः। हविर्दानेन विधिवत् पश्चात् संतर्पयेत् पितृन्॥ ३-२११

अग्नि-अभावे तु विप्रस्य पाणाव् एव-उपपादयेत्। यो ह्यग्निः स द्विजो विप्रैर् मन्त्रदर्शिभिर् उच्यते॥ ३-२१२

अक्रोधनान् सु-प्रसादान् वदन्त्येतान् पुरातनान्। लोकस्य-अप्यायने युक्तान् श्राद्ध-देवान् द्विजोत्तमान्॥ ३-२१३

अपसव्यम् अग्नौ कृत्वा सर्वम् आवृत्य विक्रमम्। अपसव्येन हस्तेन निर्वपेद् उदकं भुवि॥ ३-२१४

त्रींस् तु तस्माद् हविःशेषात् पिण्डान् कृत्वा समाहितः। औदकेन-एव विधिना निर्वपेद् दक्षिणा-मुखः॥ ३-२१५

न्युप्य पिण्डांस् ततस् तांस् तु प्रयतो विधिपूर्वकम्। तेषु दर्भेषु तं हस्तं निर्मृज्यात् - लेपभागिनाम्॥ ३-२१६

आचम्य-उदक्परावृत्य त्रिर् आयम्य शनैर् असून्। षड् ऋतूंश् च नमस्कुर्यात् पितॄन् एव च मन्त्रवत्॥ ३-२१७

उदकं निनयेत् - शेषं शनैः पिण्डान्तिके पुनः। अवजिघ्रेच् च तान् पिण्डान् यथान्युप्तान् समाहितः॥ ३-२१८

पिण्डेभ्यस् त्व् अल्पिकां मात्रां समादाय-अनुपूर्वशः। तान् एव विप्रान् आसीनान् विधिवत् पूर्वम् आशयेत्॥ ३-२१९

ध्रियमाणे तु पितरि पूर्वेषाम् एव निर्वपेत्। विप्रवद् वा-अपि तं श्राद्धे स्वकं पितरम् आशयेत्॥ ३-२२०

पिता यस्य निवृत्तः स्याज् जीवेच् च-अपि पितामहः। पितुः स नाम सङ्कीर्त्य कीर्तयेत् प्रपितामहम्॥ ३-२२१

पितामहो वा तत् - श्राद्धं भुञ्जीत-इत्यब्रवीन् मनुः। कामं वा समनुज्ञातः स्वयम् एव समाचरेत्॥ ३-२२२

तेषां दत्त्वा तु हस्तेषु स-पवित्रं तिल-उदकम्। तत्पिण्डाग्रं प्रयच्छेत स्वधा-एषाम् अस्त्व् इति ब्रुवन्॥ ३-२२३

पाणिभ्यां तु-उपसंगृह्य स्वयम् अन्नस्य वर्धितम्। विप्रान्तिके पितॄन् ध्यायन् शनकैर् उपनिक्षिपेत्॥ ३-२२४

उभयोर् हस्तयोर् मुक्तं यद् अन्नम् उपनीयते। तद् विप्रलुम्पन्त्यसुराः सहसा दुष्ट-चेतसः॥ ३-२२५

गुणांश् च सूप-शाकाद्यान् पयो दधि घृतं मधु। विन्यसेत् प्रयतः पूर्वं भूमाव् एव समाहितः॥ ३-२२६

भक्ष्यं भोज्यं च विविधं मूलानि च फलानि च। हृद्यानि च-एव मांसानि पानानि सु-रभीणि च॥ ३-२२७

उपनीय तु तत् सर्वं शनकैः सुसमाहितः। परिवेषयेत प्रयतो गुणान् सर्वान् प्रचोदयन्॥ ३-२२८

न-अस्रम् आपातयेज् जातु न कुप्येन् न-अनृतं वदेत्। न पादेन स्पृशेद् अन्नं न च-एतद् अवधूनयेत्॥ ३-२२९

अस्रं गमयति प्रेतान् कोपो अरीन् अनृतं शुनः। पादस्पर्शस् तु रक्षांसि दुष्कृतीन् अवधूननम्॥ ३-२३०

यद् यद् रोचेत विप्रेभ्यस् तत् तद् दद्याद् अमत्सरः। ब्रह्मोद्याश् च कथाः कुर्यात् पितॄणाम् एतद् ईप्सितम्॥ ३-२३१

स्वाध्यायं श्रावयेत् पित्र्ये धर्मशास्त्राणि च-एव हि। आख्यानानि-इतिहासांश् च पुराणानि खिलानि च॥ ३-२३२

हर्षयेद् ब्राह्मणांस् तुष्टो भोजयेच् च शनैः-शनैः। अन्नाद्येन-असकृच् च-एतान् गुणैश् च परिचोदयेत्॥ ३-२३३

व्रतस्थम् अपि दौहित्रं श्राद्धे यत्नेन भोजयेत्। कुतपं च-असनं दद्यात् तिलैश् च विकिरेन् महीम्॥ ३-२३४

त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस् तिलाः। त्रीणि च-अत्र प्रशंसन्ति शौचम् अक्रोधम् अत्वराम्॥ ३-२३५

अत्युष्णं सर्वम् अन्नं स्याद् भुञ्जीरंस् ते च वाग्यताः। न च द्विजातयो ब्रूयुर् दात्रा पृष्टा हविर्गुणान्॥ ३-२३६

यावद् उष्मा भवत्यन्नं यावद् अश्नन्ति वाग्यताः। पितरस् तावद् अश्नन्ति यावत् - न-उक्ता हविर्गुणाः॥ ३-२३७

यद् वेष्टित-शिरा भुङ्क्ते यद् भुङ्क्ते दक्षिणा-मुखः। स-उपानत्कश् च यद् भुङ्क्ते तद् वै रक्षांसि भुञ्जते॥ ३-२३८

चाण्डालश् च वराहश् च कुक्कुटः श्वा तथा-एव च। रजस्वला च षण्ढश् च न-ईक्षेरन्न् अश्नतो द्विजान्॥ ३-२३९

होमे प्रदाने भोज्ये च यद् एभिर् अभिवीक्ष्यते। दैवे हविषि पित्र्ये वा तद् गच्चत्ययथातथम्॥ ३-२४०

घ्राणेन सूकरो हन्ति पक्षवातेन कुक्कुटः। श्वा तु दृष्टिनिपातेन स्पर्शेण-अवरवर्णजः॥ ३-२४१

खञ्जो वा यदि वा काणो दातुः प्रेष्यो अपि वा भवेत्। हीन-अतिरिक्त-गात्रो वा तम् अप्यपनयेत् पुनः॥ ३-२४२

ब्राह्मणं भिक्षुकं वा-अपि भोजनार्थम् उपस्थितम्। ब्राह्मणैर् अभ्यनुज्ञातः शक्तितः प्रतिपूजयेत्॥ ३-२४३

सार्ववर्णिकम् अन्नाद्यं संनीय-अप्लाव्य वारिणा। समुत्सृजेद् भुक्तवताम् अग्रतो विकिरन् भुवि॥ ३-२४४

असंस्कृत-प्रमीतानां त्यागिनां कुलयोषिताम्। उच्चिष्टं भागधेयं स्याद् दर्भेषु विकिरश् च यः॥ ३-२४५

उच्चेषणां भूमिगतम् अजिह्मस्य-अ-शठस्य च। दासवर्गस्य तत् पित्र्ये भागधेयं प्रचक्षते॥ ३-२४६

आ-सपिण्डक्रियाकर्म द्विजातेः संस्थितस्य तु। अदैवं भोजयेत् - श्राद्धं पिण्डम् एकं च निर्वपेत्॥ ३-२४७

सहपिण्डक्रियायां तु कृतायाम् अस्य धर्मतः। अनया-एव-अवृता कार्यं पिण्डनिर्वपनं सुतैः॥ ३-२४८

श्राद्धं भुक्त्वा य उच्चिष्टं वृषलाय प्रयच्चति। स मूढो नरकं याति कालसूत्रम् अवाक्शिराः॥ ३-२४९

श्राद्धभुग् वृषलीतल्पं तद् अहर् यो अधिगच्चति। तस्याः पुरीषे तं मासं पितरस् तस्य शेरते॥ ३-२५०

पृष्ट्वा स्वदितम् इत्येवं तृप्तान् आचामयेत् ततः। आचान्तांश् च-अनुजानीयाद् अभितो रम्यताम् इति॥ ३-२५१

स्वधा-अस्त्व् इत्येव तं ब्रूयुर् ब्राह्मणास् तदनन्तरम्। स्वधाकारः परा ह्याषीः सर्वेषु पितृकर्मसु॥ ३-२५२

ततो भुक्तवतां तेषाम् अन्नशेषं निवेदयेत्। यथा ब्रूयुस् तथा कुर्याद् अनुज्ञातस् ततो द्विजैः॥ ३-२५३

पित्र्ये स्वदितम् इत्येव वाच्यं गोष्ठे तु सुशृतम्। संपन्नम् इत्यभ्युदये दैवे रुचितम् इत्यपि॥ ३-२५४

अपराह्णस् तथा दर्भा वास्तुसंपादनं तिलाः। सृष्टिर् मृष्टिर् द्विजाश् च-अग्र्याः श्राद्धकर्मसु संपदः॥ ३-२५५

दर्भाः पवित्रं पूर्वाह्णो हविष्याणि च सर्वशः। पवित्रं यच् च पूर्व-उक्तं विज्ञेया हव्यसंपदः॥ ३-२५६

मुनि-अन्नानि पयः सोमो मांसं यच् च-अन् - उपस्कृतम्। अक्सार-लवणं च-एव प्रकृत्या हविर् उच्यते॥ ३-२५७

विसृज्य ब्राह्मणांस् तांस् तु नियतो वाग्यतः शुचिः। दक्षिणां दिशम् आकाङ्क्षन् याचेत-इमान् वरान् पितॄन्॥ ३-२५८

दातारो नो अभिवर्धन्तां वेदाः संततिर् एव च। श्रद्धा च नो मा व्यगमद् बहुदेयं च नो अस्त्व् इति॥ ३-२५९

एवं निर्वपणं कृत्वा पिण्डांस् तांस् तदनन्तरम्। गां विप्रम् अजम् अग्निं वा प्राशयेद् अप्सु वा क्षिपेत्॥ ३-२६०

पिण्डनिर्वपणं के चित् परस्ताद् एव कुर्वते। वयोभिः खादयन्त्यन्ये प्रक्षिपन्त्यनले अप्सु वा॥ ३-२६१

पति-व्रता धर्मपत्नी पितृपूजन-तत्परा। मध्यमं तु ततः पिण्डम् अद्यात् सम्यक् सुतार्थिनी॥ ३-२६२

आयुष्मन्तं सुतं सूते यशो-मेधासमन्वितम्। धनवन्तं प्रजावन्तं सात्त्विकं धार्मिकं तथा॥ ३-२६३

प्रक्साल्य हस्ताव् आचाम्य ज्ञातिप्रायं प्रकल्पयेत्। ज्ञातिभ्यः सत्कृतं दत्त्वा बान्धवान् अपि भोजयेत्॥ ३-२६४

उच्चेषणं तु तत् तिष्ठेद् यावद् विप्रा विसर्जिताः। ततो गृहबलिं कुर्याद् इति धर्मो व्यवस्थितः॥ ३-२६५

हविर् यच् चिररात्राय यच् च-अनन्त्याय कल्पते। पितृभ्यो विधिवद् दत्तं तत् प्रवक्ष्याम्यशेषतः॥ ३-२६६

तिलैर् व्रीहि-यवैर् माषैर् अद्भिर् मूल-फलेन वा। दत्तेन मासं तृप्यन्ति विधिवत् पितरो नृनाम्॥ ३-२६७

द्वौ मासौ मत्स्यमांसेन त्रीन् मासान् हारिणेन तु। औरभ्रेण-अथ चतुरः शाकुनेन-अथ पञ्च वै॥ ३-२६८

षण्मासांश् चागमांसेन पार्षतेन च सप्त वै। अष्टाव् एनस्य मांसेन रौरवेण नव-एव तु॥ ३-२६९

दशमासांस् तु तृप्यन्ति वराह-महिषामिषैः। शश-कूर्मयोस् तु मांसेन मासान् एकादश-एव तु॥ ३-२७०

संवत्सरं तु गव्येन पयसा पायसेन च। वार्ध्रीणसस्य मांसेन तृप्तिर् द्वादशवार्षिकी॥ ३-२७१

कालशाकं महाशल्काः खड्ग-लोहामिषं मधु। आनन्त्याय-एव कल्प्यन्ते मुनि-अन्नानि च सर्वशः॥ ३-२७२

यत् किं चिन् मधुना मिश्रं प्रदद्यात् तु त्रयोदशीम्। तद् अप्यक्षयम् एव स्याद् वर्षासु च मघासु च॥ ३-२७३

अपि नः स कुले भूयाद् यो नो दद्यात् त्रयोदशीम्। पायसं मधु-सर्पिर्भ्यां प्राक् चाये कुञ्जरस्य च॥ ३-२७४

यद् यद् ददाति विधिवत् सम्यक् श्रद्धासमन्वितः। तत् तत् पितृणां भवति परत्र-अनन्तम् अक्षयम्॥ ३-२७५

कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम्। श्राद्धे प्रशस्तास् तिथयो यथा-एता न तथा-इतराः॥ ३-२७६

युक्षु कुर्वन् दिन-ऋक्षेषु सर्वान् कामान् समश्नुते। अयुक्षु तु पितॄन् सर्वान् प्रजां प्राप्नोति पुष्कलाम्॥ ३-२७७

यथा च-एव-अपरः पक्षः पूर्वपक्षाद् विशिष्यते। तथा श्राद्धस्य पूर्वाह्णाद् अपराह्णो विशिष्यते॥ ३-२७८

प्राचीनावीतिना सम्यग् अपसव्यम् अतन्द्रिणा । पित्र्यम् आ निधनात् कार्यं विधिवद् दर्भ-पाणिना ॥ ३-२७९
रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा । संध्ययोर् उभयोश् च-एव सूर्ये च-एव-अचिर-उदिते ॥ ३-२८०
अनेन विधिना श्राद्धं त्रिर् अब्दस्य-इह निर्वपेत् । हेमन्त-ग्रीष्म-वर्षासु पाञ्चयज्ञिकम् अन्वहम् ॥ ३-२८१
न पैतृयज्ञियो होमो लौकिके अग्नौ विधीयते । न दर्शेन विना श्राद्धम् आहित-अग्नेर् द्विजन्मनः ॥ ३-२८२
यद् एव तर्पयत्यद्भिः पितॄन् स्नात्वा द्विजोत्तमः । तेन-एव कृत्स्नम् आप्नोति पितृयज्ञक्रियाफलम् ॥ ३-२८३
वसून् वदन्ति तु पितॄन् रुद्रांश् च-एव पितामहान् । प्रपितामहांस् तथा-अदित्यान् श्रुतिर् एषा सनातनी ॥ ३-२८४
विघसाशी भवेन् नित्यं नित्यं वा-अमृत-भोजनः । विघसो भुक्तशेषं तु यज्ञशेषं तथा-अमृतम् ॥ ३-२८५
एतद् वो अभिहितं सर्वं विधानं पाञ्चयज्ञिकम् । द्विजातिमुख्यवृत्तीनां विधानं श्रूयताम् इति ॥ ३-२८६
चतुर्थम् आयुषो भागम् उषित्वा-अद्यं गुरौ द्विजाः । द्वितीयम् आयुषो भागं कृत-दारो गृहे वसेत् ॥ ४-०१
अद्रोहेण-एव भूतानाम् अल्पद्रोहेण वा पुनः । या वृत्तिस् तां समास्थाय विप्रो जीवेद् अनापदि ॥ ४-०२
यात्रामात्रप्रसिद्धि-अर्थं स्वैः कर्मभिर् अगर्हितैः । अक्लेशेन शरीरस्य कुर्वीत धनसंचयम् ॥ ४-०३
ऋत-अमृताभ्यां जीवेत् तु मृतेन प्रमृतेन वा । सत्य-अनृताभ्याम् अपि वा न श्ववृत्त्या कदा चन ॥ ४-०४
ऋतम् उञ्छ-शिलं ज्ञेयम् अमृतं स्याद् अयाचितम् । मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥ ४-०५
सत्य-अनृतं तु वाणिज्यं तेन च-एव-अपि जीव्यते । सेवा श्ववृत्तिर् आख्याता तस्मात् तां परिवर्जयेत् ॥ ४-०६
कुसूल-धान्यको वा स्यात् कुम्भी-धान्यक एव वा । त्र्यह-एहिको वा-अपि भवेद् अश्वस्तनिक एव वा ॥ ४-०७
चतुर्णाम् अपि च-एतेषां द्विजानां गृहमेधिनाम् । ज्यायान् परः परो ज्ञेयो धर्मतो लोकजित्तमः ॥ ४-०८
षट्-कर्म-एको भवत्येषां त्रिभिर् अन्यः प्रवर्तते । द्वाभ्याम् एकश् चतुर्थस् तु ब्रह्मसत्त्रेण जीवति ॥ ४-०९
वर्तयंश् च शिल-उञ्छाभ्याम् अग्निहोत्र-परायणः । इष्टीः पार्वायणान्तीयाः केवला निर्वपेत् सदा ॥ ४-१०
न लोकवृत्तं वर्तेत वृत्तिहेतोः कथं चन । अजिह्माम् अशथां शुद्धाम् जीवेद् ब्राह्मणजीविकाम् ॥ ४-११
संतोषं परम् आस्थाय सुखार्थी संयतो भवेत् । संतोष-मूलं हि सुखं दुःख-मूलं विपर्ययः ॥ ४-१२
अतो अन्यतमया वृत्त्या जीवंस् तु स्नातको द्विजः । स्वर्ग-अयुष्य-यशस्यानि व्रताणि-इमानि धारयेत् ॥ ४-१३
वेद-उदितं स्वकं कर्म नित्यं कुर्याद् अतन्द्रितः । तद् हि कुर्वन् यथाशक्ति प्राप्नोति परमां गतिम् ॥ ४-१४

न-ईहेत-अर्थान् प्रसङ्गेन न विरुद्धेन कर्मणा । न विद्यमानेष्व् अर्थेषु न-अर्त्याम् अपि यतस् ततः ॥  ४-१५

इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः । अतिप्रसक्तिं च-एतेषां मनसा संनिवर्तयेत् ॥  ४-१६

सर्वान् परित्यजेद् अर्थान् स्वाध्यायस्य विरोधिनः । यथा तथा-अध्यापयंस् तु सा ह्यस्य कृतकृत्यता ॥ ४-१७

वयसः कर्मणो अर्थस्य श्रुतस्य-अभिजनस्य च । वेष-वाच्-बुद्धि-सारूप्यम् आचरन् विचरेद् इह ॥ ४-१८

बुद्धि-वृद्धि-कराण्याशु धन्यानि च हितानि च । नित्यं शास्त्राण्यवेक्षेत निगमांश् च-एव वैदिकान् ॥ ४-१९

यथा यथा हि पुरुषः शास्त्रं समधिगच्चति । तथा तथा विजानाति विज्ञानं च-अस्य रोचते ॥ ४-२०

ऋषियज्ञं देवयज्ञं भूतयज्ञं च सर्वदा । नृयज्ञं पितृयज्ञं च यथाशक्ति न हापयेत् ॥ ४-२१

एतान् एके महायज्ञान् यज्ञशास्त्रविदो जनाः । अनीहमानाः सततम् इन्द्रियेष्व् एव जुह्वति ॥ ४-२२

वाच्येके जुह्वति प्राणं प्राणे वाचं च सर्वदा । वाचि प्राणे च पश्यन्तो यज्ञनिर्वृत्तिम् अक्षयाम् ॥ ४-२३

ज्ञानेन-एव-अपरे विप्रा यजन्त्येतैर् मखैः सदा । ज्ञान-मूलाम् क्रियाम् एषां पश्यन्तो ज्ञानचक्षुषा ॥ ४-२४

अग्निहोत्रं च जुहुयाद् आदि-अन्ते द्यु-निशोः सदा । दर्शेन च-अर्धमासान्ते पौर्णामासेन च-एव हि ॥ ४-२५

सस्यान्ते नवसस्य-इष्ट्या तथा-ऋतु-अन्ते द्विजो अध्वरैः । पशुना त्व् अयनस्य-अदौ समान्ते सौमिकैर् मखैः ॥

४-२६

न-अन् - इष्ट्वा नवसस्य-इष्ट्या पशुना च-अग्निमान् द्विजः । नवान्नम् अद्यात् - मांसं वा दीर्घम् आयुर् जिजीविषुः ॥

४-२७

नवेन-अन् - अर्चिता ह्यस्य पशुहव्येन च-अग्नयः । प्राणान् एव-अत्तुम् इच्चन्ति नवान्न-अमिषगर्धिनः ॥ ४-२८

आसन-अशन-शय्याभिर् अद्भिर् मूल-फलेन वा । न-अस्य कश् चिद् वसेद् गेहे शक्तितो अन् - अर्चितो अतिथिः ॥

४-२९

पाषाण्डिनो विकर्मस्थान् बैडाल-व्रतिकान् - शठान् । हैतुकान् बक-वृत्तींश् च वाच्-मात्रेण-अपि न-अर्चयेत् ॥ ४-३०

वेदविद्या-व्रत-स्नातान् - श्रोत्रियान् गृहमेधिनः । पूजयेद् हव्य-कव्येन विपरीतांश् च वर्जयेत् ॥ ४-३१

शक्तितो अ-पचमानेभ्यो दातव्यं गृहमेधिना । संविभागश् च भूतेभ्यः कर्तव्यो अन् - उपरोधतः ॥ ४-३२

राजतो धनम् अन्विच्चेत् संसीदन् स्नातकः क्षुधा । याज्य-अन्तेवासिनोर् वा-अपि न त्व् अन्यत इति स्थितिः ॥ ४-३३

न सीदेत् स्नातको विप्रः क्षुधा शक्तः कथं चन। न जीर्ण-मलवद्-वासा भवेच् च विभवे सति॥ ४-३४

क्लृप्तकेश-नख-श्मश्रुर् दान्तः शुक्ल-अम्बरः शुचिः। स्वाध्याये च-एव युक्तः स्यान् नित्यम् आत्महितेषु च॥ ४-३५

वैणवीं धारयेद् यष्टिं स-उदकं च कमण्डलुम्। यज्ञोपवीतं वेदं च शुभं रौक्मे च कुण्डले॥ ४-३६

न-ईक्षेत-उद्यन्तम् आदित्यं न-अस्तं यान्तं कदा चन। न-उपसृष्टं न वारिस्थं न मध्यं नभसो गतम्॥ ४-३७

न लङ्घयेद् वत्सतन्त्रीं न प्रधावेच् च वर्षति। न च-उदके निरीक्षेत स्वरूपम् इति धारणा॥ ४-३८

मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम्। प्रदक्षिणानि कुर्वीत प्रज्ञातांश् च वनस्पतीन्॥ ४-३९

न-उपगच्चेत् प्रमत्तो अपि स्त्रियम् आर्तवदर्शने। समानशयने च-एव न शयीत तया सह॥ ४-४०

रजसा-अभिप्लुतां नारीं नरस्य ह्युपगच्चतः। प्रज्ञा तेजो बलं चक्षुर् आयुश् च-एव प्रहीयते॥ ४-४१

तां विवर्जयतस् तस्य रजसा समभिप्लुताम्। प्रज्ञा तेजो बलं चक्षुर् आयुश् च-एव प्रवर्धते॥ ४-४२

न-अश्नीयाद् भार्यया सार्धं न-एनाम् ईक्षेत च-अश्नतीम्। क्षुवतीं जृम्भमाणां वा न च-असीनां यथासुखम्॥ ४-४३

न-अञ्जयन्तीं स्वके नेत्रे न च-अभ्यक्ताम् अनावृताम्। न पश्येत् प्रसवन्तीं च तेजस्-कामो द्विजोत्तमः॥ ४-४४

न-अन्नम् अद्याद् एकवासा न नग्नः स्नानम् आचरेत्। न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे॥ ४-४५

न फालकृष्टे न जले न चित्यां न च पर्वते। न जीर्णदेवायतने न वल्मीके कदा चन॥ ४-४६

न स-सत्त्वेषु गर्तेषु न गच्चन्न् अपि न स्थितः। न नदीतीरम् आसाद्य न च पर्वतमस्तके॥ ४-४७

वायु-अग्नि-विप्रम् आदित्यम् अपः पश्यंस् तथा-एव गाः। न कदा चन कुर्वीत विष्-मूत्रस्य विसर्जनम्॥ ४-४८

ख़्तिरस्कृत्य-उच्चरेत् काष्ठ-लोष्ठ-पत्र-तृणादिना। ख़् नियम्य प्रयतो वाचं संवीताङ्गो अवगुण्ठितः॥ ४-४९

ख़्मूत्र-उच्चार-समुत्सर्गं दिवा कुर्याद् उदङ्-मुखः। ख़् दक्षिणा-अभिमुखो रात्रौ संध्यायोश् च यथा दिवा॥ ४-५०

ख़्चायायाम् अन्धकारे वा रात्राव् अहनि वा द्विजः। ख़् यथासुख-मुखः कुर्यात् प्राणबाध-भयेषु च॥ ४-५१

ख़्प्रति-अग्निं प्रति-सूर्यं च प्रति-सोम-उदक-द्विजम्। ख़् प्रति-गु प्रति-वातं च प्रज्ञा नश्यति मेहतः॥ ४-५२

न-अग्निं मुखेन-उपधमेन् नग्नां न-ईक्षेत च स्त्रियम्। न-अमेध्यं प्रक्षिपेद् अग्नौ न च पादौ प्रतापयेत्॥ ४-५३

अधस्तान् न-उपदध्याच् च न च-एनम् अभिलङ्घयेत्। न च-एनं पादतः कुर्यान् न प्राण-अबाधम् आचरेत्॥ ४-५४

न-अश्नीयात् संधिवेलायां न गच्चेन् न-अपि संविशेत्। न च-एव प्रलिखेद् भूमिं न-अत्मनो अपहरेत् स्रजम्॥ ४-५५

न-अप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत्। अमेध्यलिप्तम् अन्यद् वा लोहितं वा विषाणि वा। ४-५६

न-एकः सुप्यात् - शून्यगेहे न श्रेयांसं प्रबोधयेत्। न-उदक्यया-अभिभाषेत यज्ञं गच्छेन् न च-अवृतः॥ ४-५७

अग्न्यगारे गवां गोष्ठे ब्राह्मणानां च संनिधौ। स्वाध्याये भोजने च-एव दक्षिनं पाणिम् उद्धरेत्॥ ४-५८

न वारयेद् गां धयन्तीं न च-अचक्षीत कस्य चित्। न दिवि-इन्द्रायुधं दृष्ट्वा कस्य चिद् दर्शयेद् बुधः॥ ४-५९

न-अधर्मिके वसेद् ग्रामे न व्याधि-बहुले भृशम्। न-एकः प्रपद्येत-अध्वानं न चिरं पर्वते वसेत्॥ ४-६०

न शूद्रराज्ये निवसेन् न-अधार्मिकजनावृते। न पाषण्डिगणाक्रान्ते न-उपस्सृटे अन्त्यजैर् नृभिः॥ ४-६१

न भुञ्जीत-उद्धृत-स्नेहं न-अतिसौहित्यम् आचरेत्॥ न-अतिप्रगे न-अतिसायं न सायं प्रात-र्शितः॥ ४-६२

न कुर्वीत वृथाचेष्टां न वार्यञ्जलिना पिबेत्। न-उत्सङ्गे भक्षयेद् भक्ष्यान् न जातु स्यात् कुतूहली॥ ४-६३

न नृत्येद् अथ वा गायेन् न वादित्राणि वादयेत। न-अस्फोटयेन् न च क्ष्वेडेन् न च रक्तो विरावयेत्॥ ४-६४

न पादौ धावयेत् कांस्ये कदा चिद् अपि भाजने। न भिन्नभाण्डे भुञ्जीत न भावप्रतिदूषिते॥ ४-६५

उपानहौ च वासश् च धृतम् अन्यैर् न धारयेत्। उपवीतम् अलङ्कारं स्रजं करकम् एव च॥ ४-६६

न-अ-विनीतैर् भजेद् धुर्यैर् न च क्षुध-व्याधि-पीडितैः। न भिन्न-शृङ्ग-अक्षि-खुरैर् न वालधिविरूपितैः॥ ४-६७

विनीतैस् तु व्रजेन् नित्यम् आशुगैर् लक्षणान्वितैः। वर्ण-रूप-उपसंपन्नैः प्रतोदेन-अतुदन् भृशम्॥ ४-६८

बालातपः प्रेतधूमो वर्ज्यं भिन्नं तथा-असनम्। न चिन्द्यान् नख-रोमाणि दन्तैर् न-उत्पाटयेन् नखान्॥ ४-६९

न मृत् - लोष्ठं च मृद्नीयान् न चिन्द्यात् करजैस् तृणम्। न कर्म निष्फलं कुर्यान् न-अयत्याम् असुख-उदयम्॥ ४-७०

लोष्ठमर्दी तृणच्चेदी नखखादी च यो नरः। स विनाशं व्रजत्याशु सूचका-अशुचिर् एव च॥ ४-७१

न विगर्ह्य कथां कुर्याद् बहिर् माल्यं न धारयेत्। गवां च यानं पृष्ठेन सर्वथा-एव विगर्हितम्॥ ४-७२

अद्वारेण च न-अतीयाद् ग्रामं वा वेश्म वा-अवृतम्। रात्रौ च वृक्षमूलानि दूरतः परिवर्जयेत्॥ ४-७३

न-अक्षैर् दीव्येत् कदा चित् तु स्वयं न-उपानहौ हरेत्। शयनस्थो न भुञ्जीत न पाणिस्थं न च-असने॥ ४-७४

सर्वं च तिलसंबद्धं न-अद्याद् अस्तम् इते रवौ। न च नग्नः शयीत-इह न च-उच्चिष्टः क्व चिद् व्रजेत्॥ ४-७५

आर्द्र-पादस् तु भुञ्जीत न-अर्द्र-पादस् तु संविशेत्। आर्द्र-पादस् तु भुञ्जानो दीर्घम् आयुर् अवाप्नुयात्॥ ४-७६

अचक्षुर्विषयं दुर्गं न प्रपद्येत कर्हि चित्। न विष्-मूत्रम् उदीक्षेत न बाहुभ्यां नदीं तरेत्॥ ४-७७

अधितिष्ठेन् न केशांस् तु न भस्म-अस्थि-कपालिकाः। न कार्पास-अस्थि न तुषान् दीर्घम् आयुर् जिजीविषुः॥ ४-७८

न संवसेच् च पतितैर् न चाण्डालैर् न पुल्कसैः। न मूर्खैर् न-अवलिप्तैश् च न-अन्त्यैर् न-अन्त्यावसायिभिः॥ ४-७९

न शूद्राय मतिं दद्यान् न-उच्छिष्टं न हविष्कृतम्। न च-अस्य-उपदिशेद् धर्मं न च-अस्य व्रतम् आदिशेत्॥ ४-८०

यो ह्यस्य धर्मम् आचष्टे यश् च-एव-अदिशति व्रतम्। सो असंवृतं नाम तमः सह तेन-एव मज्जति॥ ४-८१

न संहताभ्यां पाणिभ्यां कण्डूयेद् आत्मनः शिरः। न स्पृशेच् च-एतद् उच्छिष्टो न च स्नायाद् विना ततः॥ ४-८२

केशग्रहान् प्रहारांश् च शिरस्येतान् विवर्जयेत्। शिरःस्नातश् च तैलेन न-अङ्गं किं चिद् अपि स्पृशेत्॥ ४-८३

न राज्ञः प्रतिगृह्णीयाद् अराजन्यप्रसूतितः। सूना-चक्र-ध्वजवतां वेशेन-एव च जीवताम्॥ ४-८४

दशसूना-समं चक्रं दशचक्र-समो ध्वजः। दशध्वज-समो वेशो दशवेश-समो नृपः॥ ४-८५

दश सूणासहस्राणि यो वाहयति सौनिकः। तेन तुल्यः स्मृतो राजा घोरस् तस्य प्रतिग्रहः॥ ४-८६

यो राज्ञः प्रतिगृह्णाति लुब्धस्य-उच्छास्त्रवर्तिनः। स पर्यायेण याति-इमान् नरकान् एकविंशतिम्॥ ४-८७

तामिस्रम् अन्धतामिस्रं महारौरव-रौरवौ। नरकं कालसूत्रं च महानरकम् एव च॥ ४-८८

संजीवनं महावीचिं तपनं संप्रतापनम्। संहातं च स-काकोलं कुड्मलं प्रतिमूर्तिकम्॥ ४-८९

लोहशङ्कुम् ऋजीषं च पन्थानं शाल्मलीं नदीम्। असिपत्रवनं च-एव लोहदारकम् एव च॥ ४-९०

एतद् विदन्तो विद्वांसो ब्राह्मणा ब्रह्मवादिनः। न राज्ञः प्रतिगृह्णन्ति प्रेत्य श्रेयो अभिकाङ्क्षिणः॥ ४-९१

ब्राह्मे मुहूर्ते बुध्येत धर्म-अर्थौ च-अनुचिन्तयेत्। कायक्लेशांश् च तन् - मूलान् वेदतत्त्वार्थम् एव च॥ ४-९२

उत्थाय-अवश्यकं कृत्वा कृत-शौचः समाहितः। पूर्वां संध्यां जपंस् तिष्ठेत् स्वकाले च-अपरां चिरम्॥ ४-९३

ऋषयो दीर्घसंध्यत्वाद् दीर्घम् आयुर् अवाप्नुयुः। प्रज्ञां यशश् च कीर्तिं च ब्रह्मवर्चसम् एव च॥ ४-९४

श्रावण्यां प्रौष्ठपद्यां वा-अप्युपाकृत्य यथाविधि। युक्तश् चन्दांस्यधीयीत मासान् विप्रो अर्धपञ्चमान्॥ ४-९५

पुष्ये तु चन्दसां कुर्याद् बहिर् उत्सर्जनं द्विजः। माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमे अहनि॥ ४-९६

यथाशास्त्रं तु कृत्वा-एवम् उत्सर्गं चन्दसां बहिः। विरमेत् पक्षिणीं रात्रिं तद् एव-एकम् अह-र्निशम्॥ ४-९७

अत ऊर्ध्वं तु चन्दांसि शुक्लेषु नियतः पठेत्। वेदाङ्गानि च सर्वाणि कृष्णपक्षेषु संपठेत्॥ ४-९८

न-अविस्पष्टम् अधीयीत न शूद्रजनसन्निधौ। न निशान्ते परिश्रान्तो ब्रह्म-अधीत्य पुनः स्वपेत्॥ ४-९९

यथा-उदितेन विधिना नित्यं चन्दस्कृतं पठेत्। ब्रह्म चन्दस्कृतं च-एव द्विजो युक्तो ह्यनापदि। ४-१००

इमान् नित्यम् अनध्यायान् अधीयानो विवर्जयेत्। अध्यापनं च कुर्वाणः शिष्याणां विधिपूर्वकम्॥ ४-१०१

कर्णश्रवे अनिले रात्रौ दिवा पांसुसमूहने। एतौ वर्षास्व् अनध्यायाव् अध्यायज्ञाः प्रचक्षते॥ ४-१०२

विद्युत्- स्तनित-वर्षेषु महा-उल्कानां च संप्लवे। आकालिकम् अनध्यायम् एतेषु मनुर् अब्रवीत्॥ ४-१०३

एतांस् त्व् अभ्युदितान् विद्याद् यदा प्रादुष्कृताग्निषु। तदा विद्याद् अनध्यायम् अनृतौ च-अभ्रदर्शने॥ ४-१०४

निर्घाते भूमिचलने ज्योतिषां च-उपसर्जने। एतान् आकालिकान् विद्याद् अनध्यायान् ऋताव् अपि॥ ४-१०४

प्रादुष्कृतेष्व् अग्निषु तु विद्युत्- स्तनित-निःस्वने। स-ज्योतिः स्याद् अनध्यायः शेषे रात्रौ यथा दिवा॥ ४-१०६

नित्य-अनध्याय एव स्याद् ग्रामेषु नगरेषु च। धर्मनैपुण्य-कामानां पूतिगन्धे च सर्वदा॥ ४-१०७

अन्तर्गत-शवे ग्रामे वृषलस्य च सन्निधौ। अनध्यायो रुद्यमाने समवाये जनस्य च॥ ४-१०८

उदके मध्यरात्रे च विष्-मूत्रस्य विसर्जने। उच्चिष्टः श्राद्धभुक् च-एव मनसा-अपि न चिन्तयेत्।४-१०९

प्रतिगृह्य द्विजो विद्वान् एकोद्दिष्टस्य केतनम्। त्र्यहं न कीर्तयेद् ब्रह्म राज्ञो राहोश् च सूतके॥ ४-११०

यावद् एकानुदिष्टस्य गन्धो लेपश् च तिष्ठति। विप्रस्य विदुषो देहे तावद् ब्रह्म न कीर्तयेत्॥ ४-१११

शयानः प्रौढ-पादश् च कृत्वा च-एव-अवसक्थिकाम्। न-अधीयीत-अमिषं जग्ध्वा सूतकान्नाद्यम् एव च॥ ४-११२

नीहारे बाणशब्दे च संध्ययोर् एव च-उभयोः। अमावास्या-चतुर्दश्योः पौर्णमास्य-अष्टकासु च॥ ४-११३

अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्दशी। ब्रह्म-अष्टक-पौर्णमास्यौ तस्मात् ताः परिवर्जयेत्॥ ४-११४

पांसुवर्षे दिशां दाहे गोमायुविरुते तथा। श्व-खर-उष्ट्रे च रुवति पङ्क्तौ च न पठेद् द्विजः॥ ४-११५

न-अधीयीत श्मशानान्ते ग्रामान्ते गोव्रजे अपि वा। वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च॥ ४-११६

प्राणि वा यदि वा-अप्राणि यत् किं चित्- श्राद्धिकं भवेत्। तद् आलभ्य-अप्यनध्यायः पाण्य-अस्यो हि द्विजः स्मृतः॥ ४-११७

चौरैर् उपद्रुते ग्रामे संभ्रमे च-अग्निकारिते। आकालिकम् अनध्यायं विद्यात् सर्वाद्भुतेषु च॥ ४-११८

उपाकर्मणि च-उत्सर्गे त्रिरात्रं क्षेपणं स्मृतम्। अष्टकासु त्व् अहोरात्रम् ऋत्वन्तासु च रात्रिषु॥ ४-११९

न-अधीयीत-अश्वम् आरूढो न वृक्षं न च हस्तिनम्। न नावं न खरं न-उष्ट्रं न-इरिणस्थो न यानगः॥ ४-१२०

न विवादे न कलहे न सेनायां न संगरे। न भुक्तमात्रे न-अजीर्णे न वमित्वा न शुक्तके॥ ४-१२१

अतिथिं च-अन् - अनुज्ञाप्य मारुते वाति वा भृशम्। रुधिरे च स्रुते गात्रात् - शस्त्रेण च परिक्षते॥ ४-१२२

सामध्वनाव् ऋच्-यजुषी न-अधीयीत कदा चन। वेदस्य-अधीत्य वा-अप्यन्तम् आरण्यकम् अधीत्य च॥ ४-१२३

ऋग्वेदो देव-दैवत्यो यजुर्वेदस् तु मानुषः। सामवेदः स्मृतः पित्र्यस् तस्मात् तस्य-अशुचिर् ध्वनिः॥ ४-१२४

एतद् विद्वन्तो विद्वांसस् त्रयीनिष्कर्षम् अन्वहम्। क्रमतः पूर्वम् अभ्यस्य पश्चाद् वेदम् अधीयते॥ ४-१२५

पशु-मण्डूक-मार्जार-श्व-सर्प-नकुल-अखुभिः। अन्तरागमने विद्याद् अनध्यायम् अह-र्निशम्॥ ४-१२६

द्वाव् एव वर्जयेन् नित्यम् अनध्यायौ प्रयत्नतः। स्वाध्यायभूमिं च-अशुद्धम् आत्मानं च-अशुचिं द्विजः॥ ४-१२७

अमावास्याम् अष्टमीं च पौर्णमासीं चतुर्दशीम्। ब्रह्मचारी भवेन् नित्यम् अप्यृतौ स्नातको द्विजः॥ ४-१२८

न स्नानम् आचरेद् भुक्त्वा न-अतुरो न महानिशि। न वासोभिः सह-अजस्रं न-अविज्ञाते जलाशये॥ ४-१२९

देवतानां गुरो राज्ञः स्नातक-अचार्ययोस् तथा। न-अक्रामेत् कामतश् चायां बभ्रुणो दीक्षितस्य च॥ ४-१३०

मध्यंदिने अर्धरात्रे च श्राद्धं भुक्त्वा च स-अमिषम्। संध्ययोर् उभयोश् च-एव न सेवेत चतुष्पथम्॥ ४-१३१

उद्वर्तनम् अपस्नानं विष्-मूत्रे रक्तम् एव च। श्लेश्म-निष्ठ्यूत-वान्तानि न-अधितिष्ठेत् तु कामतः॥ ४-१३२

वैरिणं न-उपसेवेत सहायं च-एव वैरिणः। अधार्मिकं तस्करं च परस्य-एव च योषितं॥ ४-१३३

न हि-ईदृशम् अनायुष्यं लोके किं चन विद्यते। यादृशं पुरुषस्य-इह परदार-उपसेवनम्॥ ४-१३४

क्षत्रियं च-एव सर्पं च ब्राह्मणं च बहु-श्रुतम्। न-अवमन्येत वै भूष्णुः कृशान् अपि कदा चन॥ ४-१३५

एतत् त्रयं हि पुरुषं निर्दहेद् अवमानितम्। तस्माद् एतत् त्रयं नित्यं न-अवमन्येत बुद्धिमान्॥ ४-१३६

न-अत्मानम् अवमन्येत पुर्वाभिर् असमृद्धिभिः। आ मृत्योः श्रियम् अन्विच्चेन् न-एनां मन्येत दु-र्लभाम्॥ ४-१३७

सत्यं ब्रूयात् प्रियं ब्रूयान् न ब्रूयात् सत्यम् अप्रियम्। प्रियं च न-अनृतं ब्रूयाद् एष धर्मः सनातनः॥ ४-१३८

भद्रं भद्रम् इति ब्रूयाद् भद्रम् इत्येव वा वदेत्। शुष्क-वैरं विवादं च न कुर्यात् केन चित् सह॥ ४-१३९

न-अतिकल्यं न-अतिसायं न-अतिमध्यंदिने स्थिते। न-अज्ञातेन समं गच्चेन् न-एको न वृषलैः सह॥ ४-१४०

हीन-अङ्गान् अतिरिक्त-अङ्गान् विद्या-हीनान् वयो-अधिकान्॥ रूप-द्रविण-हीनांश् च जाति-हीनांश् च न-अक्षिपेत्॥ ४-१४१

न स्पृशेत् पाणिना-उच्छिष्टो विप्रो गो-ब्राह्मण-अनलाण्। न च-अपि पश्येद् अशुचिः सुस्थो ज्योतिर्गणान् दिवा ॥ ४-१४२

स्पृष्ट्वा-एतान् अशुचिर् नित्यम् अद्भिः प्राणान् उपस्पृशेत्। गात्राणि च-एव सर्वाणि नाभिं पाणितलेन तु ॥ ४-१४३

अन् - आतुरः स्वानि खानि न स्पृशेद् अनिमित्ततः। रोमाणि च रहस्यानि सर्वाण्येव विवर्जयेत्॥ ४-१४४

मङ्गल-अचारयुक्तः स्यात् प्रयत-अत्मा जित-इन्द्रियः। जपेच् च जुहुयाच् च-एव नित्यम् अग्निम् अतन्द्रितः॥ ४-१४५

मङ्गल-अचारयुक्तानां नित्यं च प्रयत-अत्मनाम्। जपतां जुह्वतां च-एव विनिपातो न विद्यते॥ ४-१४६

वेदम् एव-अभ्यसेन् नित्यं यथाकालम् अतन्द्रितः। तं ह्यस्य-अहुः परं धर्मम् उपधर्मो अन्य उच्यते॥ ४-१४७

वेदाभ्यासेन सततं शौचेन तपसा-एव च। अद्रोहेण च भूतानां जातिं स्मरति पौर्विकीम्॥ ४-१४८

पौर्विकीं संस्मरन् जातिं ब्रह्म-एव-अभ्यस्यते पुनः। ब्रह्माभ्यासेन च-अजस्रम् अनन्तं सुखम् अश्नुते॥ ४-१४९

सावित्रान् - शान्तिहोमांश् च कुर्यात् पर्वसु नित्यशः। पितॄंश् च-एव-अष्टकास्व् अर्चेन् नित्यम् अन्वष्टकासु च॥ ४-१५०

दूराद् आवसथान् मूत्रं दूरात् पादावसेचनम्। उच्चिष्टान्न-निषेकं च दूराद् एव समाचरेत्॥ ४-१५१

मैत्रं प्रसाधनं स्नानं दन्तधावनम् अञ्जनम्। पूर्वाह्ण एव कुर्वीत देवतानां च पूजनम्॥ ४-१५२

दैवतान्यभिगच्चेत् तु धार्मिकांश् च द्विजोत्तमान्। ईश्वरं च-एव रक्षार्थं गुरून् एव च पर्वसु।४-१५३

अभिवादयेद् वृद्धांश् च दद्याच् च-एव-असनं स्वकम्। कृत-अञ्जलिर् उपासीत गच्चतः पृष्ठतो अन्वियात्॥ ४-१५४

श्रुति-स्मृति-उदितं सम्यङ् निबद्धं स्वेषु कर्मसु। धर्ममूलं निषेवेत सद्-अचारम् अतन्द्रितः॥ ४-१५५

आचारात् - लभते ह्यायुर् आचाराद् ईप्सिताः प्रजाः। आचाराद् धनम् अक्षय्यम् आचारो हन्त्यलक्षणम्॥ ४-१५६

दु-र्अचारो हि पुरुषो लोके भवति निन्दितः। दुःखभागी च सततं व्याधितो अल्प-अयुर् एव च॥ ४-१५७

सर्वलक्षण-हीनो अपि यः सदाचारवान् नरः। श्रद्दधानो अन् - असूयश् च शतं वर्षाणि जीवति॥ ४-१५८

यद् यत् परवशं कर्म तत् तद् यत्नेन वर्जयेत्॥ यद् यद् आत्मवशं तु स्यात् तत् तत् सेवेत यत्नतः।४-१५९

सर्वं परवशं दुःखं सर्वम् आत्मवशं सुखम्। एतद् विद्यात् समासेन लक्षणं सुख-दुःखयोः॥ ४-१६०

यत् कर्म कुर्वतो अस्य स्यात् परितोषो अन्तरात्मनः। तत् प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत्॥ ४-१६१

आचार्यं च प्रवक्तारं पितरं मातरं गुरुम्। न हिंस्याद् ब्राह्मणान् गाश् च सर्वांश् च-एव तपस्विनः॥ ४-१६२

नास्तिक्यं वेदनिन्दां च देवतानां च कुत्सनम्। द्वेषं दम्भं च मानं च क्रोधं तैक्ष्ण्यं च वर्जयेत्॥ ४-१६३

परस्य दण्डं न-उद्यच्चेत् क्रुद्धो न-एनं निपातयेत्। अन्यत्र पुत्रात् - शिष्याद् वा शिष्टि-अर्थं ताडयेत् तु तौ॥ ४-१६४

ब्राह्मणाय-अवगुर्य-एव द्विजातिर् वधकाम्यया। शतं वर्षाणि तामिस्रे नरके परिवर्तते॥ ४-१६५

ताडयित्वा तृणेन-अपि संरम्भात् - मतिपूर्वकम्। एकविंशतीम् आजातीः पापयोनिषु जायते॥ ४-१६६

अयुध्यमानस्य-उत्पाद्य ब्राह्मणस्य-असृग् अङ्गतः। दुःखं सुमहद् आप्नोति प्रेत्य-अप्राज्ञतया नरः॥ ४-१६७

शोणितं यावतः पांसून् संगृह्णाति महीतलात्। तावतो अब्दान् अमुत्र-अन्यैः शोणित-उत्पादको अद्यते॥ ४-१६८

न कदा चिद् द्विजे तस्माद् विद्वान् अवगुरेद् अपि। न ताडयेत् तृणेन-अपि न गात्रात् स्रावयेद् असृक्॥ ४-१६९

अधार्मिको नरो यो हि यस्य च-अप्यनृतं धनम्। हिंसारतश् च यो नित्यं न-इह-असौ सुखम् एधते॥ ४-१७०

न सीदन्न् अपि धर्मेण मनो अधर्मे निवेशयेत्। अधार्मिकानां पापानाम् आशु पश्यन् विपर्ययम्॥ ४-१७१

न-अधर्मश् चरितो लोके सद्यः फलति गौर् इव। शनैर् आवर्त्यमानस् तु कर्तुर् मूलानि कृन्तति॥ ४-१७२

यदि न-अत्मनि पुत्रेषु न चेत् पुत्रेषु नप्तृषु। न त्व् एव तु कृतो अधर्मः कर्तुर् भवति निष्-फलः॥ ४-१७३

अधर्मेण-एधते तावत् ततो भद्राणि पश्यति। ततः सपत्नान् जयति स-मूलस् तु विनश्यति॥ ४-१७४

सत्य-धर्म-अर्यवृत्तेषु शौचे च-एव-अरमेत् सदा। शिष्यांश् च शिष्याद् धर्मेण वाच्-बाहु-उदर-संयतः॥ ४-१७५

परित्यजेद् अर्थ-कामौ यौ स्यातां धर्मवर्जितौ। धर्मं च-अप्यसुख-उदर्कं लोकसंक्रुष्टम् एव च॥ ४-१७६

न पाणि-पाद-चपलो न नेत्र-चपलो अन् - ऋजुः। न स्याद् वाक्-चपलश् च-एव न परद्रोहकर्म-धीः॥ ४-१७७

येन-अस्य पितरो याता येन याताः पितामहाः। तेन यायात् सतां मार्गं तेन गच्चन् न रिष्यति॥ ४-१७८

ऋत्विक्-पुरोहित-अचार्यैर् मातुल-अतिथिसंश्रितैः। बाल-वृद्ध-अतुरैर् वैद्यैर् ज्ञाति-संबन्धि-बान्धवैः॥ ४-१७९

माता-पितृभ्यां जामीभिर् भ्रात्रा पुत्रेण भार्यया। दुहित्रा दासवर्गेण विवादं न समाचरेत्॥ ४-१८०

एतैर् विवादान् संत्यज्य सर्वपापैः प्रमुच्यते। एतैर् जितैश् च जयति सर्वान् - लोकान् इमान् गृही॥ ४-१८१

आचार्यो ब्रह्मलोक-ईशः प्राजापत्ये पिता प्रभुः। अतिथिस् त्व् इन्द्रलोक-ईशो देवलोकस्य च-ऋत्विजः॥ ४-१८२

जामयो अप्सरसाम् लोके वैश्वदेवस्य बान्धवाः। संबन्धिनो ह्यपां लोके पृथिव्यां मातृ-मातुलौ॥ ४-१८३

आकाश-ईशास् तु विज्ञेया बाल-वृद्ध-कृश-अतुराः। भ्राता ज्येष्ठः समः पित्रा भार्या पुत्रः स्वका तनुः॥ ४-१८४

चाया स्वो दासवर्गश् च दुहिता कृपणं परम्। तस्माद् एतैर् अधिक्षिप्तः सहेत-अ-संज्वरः सदा॥ ४-१८५

प्रतिग्रहसमर्थो अपि प्रसङ्गं तत्र वर्जयेत्। प्रतिग्रहेण ह्यस्य-अशु ब्राह्मं तेजः प्रशाम्यति॥ ४-१८६

न द्रव्याणाम् अविज्ञाय विधिं धर्म्यं प्रतिग्रहे। प्राज्ञः प्रतिग्रहं कुर्याद् अवसीदन्न् अपि क्षुधा॥ ४-१८७

हिरण्यं भूमिम् अश्वं गाम् अन्नं वासस् तिलान् घृतम्। प्रतिगृह्णन्न् अविद्वांस् तु भस्मी-भवति दारुवत्॥ ४-१८८

हिरण्यम् आयुर् अन्नं च भूर् गौश् च-अप्योषतस् तनुम्। अश्वश् चक्षुस् त्वचं वासो घृतं तेजस् तिलाह् प्रजाः॥
४-१८९

अतपास् त्व् अनधीयानः प्रतिग्रह-रुचिर् द्विजः। अम्भस्यश्मप्लवेन-इव सह तेन-एव मज्जति॥ ४-१९०

तस्माद् अविद्वान् बिभियाद् यस्मात् तस्मात् प्रतिग्रहात्। स्वल्पकेन-अप्यविद्वान् हि पङ्के गौर् इव सीदति॥ ४-१९१

न वार्यपि प्रयच्चेत् तु बैडालव्रतिके द्विजे। न बकव्रतिके पापे न-अ-वेदविदि धर्मवित्॥ ४-१९२

त्रिष्व् अप्येतेषु दत्तं हि विधिना-अप्यर्जितं धनम्। दातुर् भवत्यनर्थाय परत्र-अदातुर् एव च॥ ४-१९३

यथा प्लवेन-अपलेन निमज्जत्युदके तरन्। तथा निमज्जतो अधस्ताद् अज्ञौ दातृ-प्रतीच्चकौ॥ ४-१९४

धर्मध्वजी सदा लुब्धश् चाद्मिको लोकदम्भकः॥ बैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसंधकः॥ ४-१९५

अधो-दृष्टिर् नैष्कृतिकः स्वार्थसाधन-तत्परः। शठो मिथ्याविनीतश् च बकव्रतचरो द्विजः॥ ४-१९६

ये बकव्रतिनो विप्रा ये च मार्जारलिङ्गिनः। ते पतन्त्यन्धतामिस्रे तेन पापेन कर्मणा॥ ४-१९७

न धर्मस्य-अपदेशेन पापं कृत्वा व्रतं चरेत्। व्रतेन पापं प्रच्चाद्य कुर्वन् स्त्री-शूद्र-दम्भनम्॥ ४-१९८

प्रेत्य-इह च-ईदृशा विप्रा गर्ह्यन्ते ब्रह्मवादिभिः। चद्मना चरितं यच् च व्रतं रक्षांसि गच्चति॥ ४-१९९

अलिङ्गी लिङ्गिवेषेण यो वृत्तिम् उपजीवति। स लिङ्गिनां हरत्येनस् तिर्यग्योनौ च जायते॥ ४-२००

परकीयनिपानेषु न स्नायाद् हि कदा चन। निपानकर्तुः स्नात्वा तु दुष्कृतांशेन लिप्यते॥ ४-२०१

यान-शय्या-असनान्यस्य कूप-उद्यान-गृहाणि च। अदत्तान्युपयुञ्जान एनसः स्यात् तुरीय-भाक्॥ ४-२०२

नदीषु देवखातेषु तडागेषु सरःसु च। स्नानं समाचरेन् नित्यं गर्त-प्रस्रवणेषु च॥ ४-२०३

यमान् सेवेत सततं न नित्यं नियमान् बुधः। यमान् पतत्यकुर्वाणो नियमान् केवलान् भजन्॥ ४-२०४

न-अश्रोत्रियतते यज्ञे ग्रामयाजिकृते तथा। स्त्रिया क्लीबेन च हुते भुञ्जीत ब्राह्मणः क्व चित्॥ ४-२०५

अश्लीकम् एतत् साधूनां यत्र जुह्वत्यमी हविः। प्रतीपम् एतद् देवानां तस्मात् तत् परिवर्जयेत्॥ ४-२०६

मत्त-क्रुद्ध-अतुराणां च न भुञ्जीत कदा चन। केश-कीटावपन्नं च पदा स्पृष्टं च कामतः॥ ४-२०७

भ्रूणघ्न-अवेक्षितं च-एव संस्पृष्टं च-अप्युदक्यया। पतत्रिण-अवलीढं च शुना संस्पृष्टम् एव च॥ ४-२०८

गवा च-अन्नम् उपघ्रातं घुष्टान्नं च विशेषतः। गणान्नं गणिकान्नं च विदुषा च जुगुप्सितम्॥ ४-२०९

स्तेन-गायनयोश् च-अन्नं तक्ष्णो वार्धुषिकस्य च। दीक्षितस्य कदर्यस्य बद्धस्य निगडस्य च॥ ४-२१०

अभिशस्तस्य षण्ढस्य पुंश्चल्या दाम्भिकस्य च। शुक्तं पर्युषितं च-एव शूद्रस्य-उच्छिष्टम् एव च॥ ४-२११

चिकित्सकस्य मृगयोः क्रूरस्य-उच्छिष्ट-भोजिनः। उग्रान्नं सूतिकान्नं च पर्याचान्तम् अनिर्दशम्॥ ४-२१२

अन् - अर्चितं वृथामांसम् अवीरायाश् च योषितः। द्विषदन्नं नगरी-अन्नं पतितान्नम् अवक्षुतम्॥ ४-२१३

पिशुन-अनृतिनोश् च-अन्नं क्रतुविक्रयिणस् तथा॥ । शैलूष-तुन्नवाय-अन्नं कृतघ्नस्य-अन्नम् एव च॥ ४-२१४

कर्मारस्य निषादस्य रङ्गावतारकस्य च। सुवर्णकर्तुर् वेणस्य शस्त्रविक्रयिणस् तथा॥ ४-२१५

श्ववतां शौण्डिकानां च चैल-निर्णेजकस्य च। रञ्जकस्य नृशंसस्य यस्य च-उपपतिर् गृहे॥ ४-२१६

मृष्यन्ति ये च-उपपतिं स्त्रीजितानाम् च सर्वशः। अनिर्दशं च प्रेतान्नम् अतुष्टिकरम् एव च॥ ४-२१७

राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम्। आयुः सुवर्णकारान्नं यशश् चर्मावकर्तिनः॥ ४-२१८

कारुकान्नं प्रजां हन्ति बलं निर्णेजकस्य च। गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति॥ ४-२१९

पूयं चिकित्सकस्य-अन्नं पुंश्चल्यास् त्व् अन्नम् इन्द्रियम्। विष्ठा वार्धुषिकस्य-अन्नं शस्त्रविक्रयिणो मलम्॥ ४-२२०

य एते अन्ये त्व् अभोज्य-अन्नाः क्रमशः परिकीर्तिताः। तेषां त्वग्-अस्थि-रोमाणि वदन्त्यन्नं मनीषिणः॥ ४-२२१

भुक्त्वा-अतो अन्यतम् अस्य-अन्नम् अमत्या क्षपणं त्र्यहम्। मत्या भुक्त्वा-अचरेत् कृच्छ्रं रेतस्-विष्-मूत्रम् एव च॥
४-२२२

न-अद्यात् - शूद्रस्य पक्वान्नं विद्वान् अश्राद्धिनो द्विजः। आददीत-अमम् एव-अस्माद् अवृत्ताव् एकरात्रिकम्।४-२२३

श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्धुषेः। मीमांसित्वा-उभयं देवाः समम् अन्नम् अकल्पयन्॥ ४-२२४

तान् प्रजापतिर् आह-एत्य मा कृध्वं विषमं समम्। श्रद्धापूतं वदान्यस्य हतम् अश्रद्धया-इतरत्॥ ४-२२५

श्रद्धया-इष्टं च पूर्तं च नित्यं कुर्याद् अतन्द्रितः। श्रद्धाकृते ह्यक्षये ते भवतः स्वागतैर् धनैः॥ ४-२२६

दानधर्मं निषेवेत नित्यम् ऐष्टिक-पौर्तिकम्। परितुष्टेन भावेन पात्रम् आसाद्य शक्तितः॥ ४-२२७

यत् किं चिद् अपि दातव्यं याचितेन-अन् - असूयया। उत्पत्स्यते हि तत् पात्रं यत् तारयति सर्वतः॥ ४-२२८

वारिदस् तृप्तिम् आप्नोति सुखम् अक्षय्यम् अन्नदः। तिलप्रदः प्रजाम् इष्टां दीपदश् चक्षुर् उत्तमम्॥ ४-२२९

भूमिदो भूमिम् आप्नोति दीर्घम् आयुर् हिरण्यदः। गृहदो अग्र्याणि वेश्मानि रूप्यदो रूपम् उत्तमम्॥ ४-२३०

वासोदश् चन्द्रसालोक्यम् अश्विसालोक्यम् अश्वदः। अनडुहः श्रियं पुष्टां गोदो ब्रध्नस्य विष्टपम्॥ ४-२३१

यान-शय्याप्रदो भार्याम् ऐश्वर्यम् अभयप्रदः। धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्मसार्ष्टिताम्॥ ४-२३२

सर्वेषाम् एव दानानां ब्रह्मदानं विशिष्यते। वारि-अन्न-गो-मही-वासस्-तिल-काञ्चन-सर्पिषाम्॥ ४-२३३

येन येन तु भावेन यद् यद् दानं प्रयच्छति। तत् तत् तेन-एव भावेन प्राप्नोति प्रतिपूजितः॥ ४-२३४

यो अर्चितं प्रतिगृह्णाति ददात्यर्चितम् एव वा। ताव् उभौ गच्छतः स्वर्गं नरकं तु विपर्यये॥ ४-२३५

न विस्मयेत तपसा वदेद् इष्ट्वा च न-अनृतम्। न-अर्तो अप्यपवदेद् विप्रान् न दत्त्वा परिकीर्तयेत्॥ ४-२३६

यज्ञो अनृतेन क्षरति तपः क्षरति विस्मयात्। आयुर् विप्रापवादेन दानं च परिकीर्तनात्॥ ४-२३७

धर्मं शनैः संचिनुयाद् वल्मीकम् इव पुत्तिकाः। परलोकसहायार्थं सर्वभूतान्यपीडयन्॥ ४-२३८

न-अमुत्र हि सहायार्थं पिता माता च तिष्ठतः। न पुत्रदारं न ज्ञातिर् धर्मस् तिष्ठति केवलः॥ ४-२३९

एकः प्रजायते जन्तुर् एक एव प्रलीयते। एको अनुभुङ्क्ते सुकृतम् एक एव च दुष्कृतम्॥ ४-२४०

मृतं शरीरम् उत्सृज्य काष्ठ-लोष्टसमं क्षितौ। विमुखा बान्धवा यान्ति धर्मस् तम् अनुगच्छति॥ ४-२४१

तस्माद् धर्मं सहायार्थं नित्यं संचिनुयात् - शनैः। धर्मेण हि सहायेन तमस् तरति दुस्तरम्॥ ४-२४२

धर्म-प्रधानं पुरुषं तपसा हत-किल्बिषम्। परलोकं नयत्याशु भास्वन्तं ख-शरीरिणम्॥ ४-२४३

उत्तमैर् उत्तमैर् नित्यं संबन्धान् आचरेत् सह। निनीषुः कुलम् उत्कर्षम् अधमान् अधमांस् त्यजेत्॥ ४-२४४

उत्तमान् उत्तमान् एव गच्छन् हीनांस् तु वर्जयन्। ब्राह्मणः श्रेष्ठताम् एति प्रत्यवायेन शूद्रताम्॥ ४-२४५

दृढकारी मृदुर् दान्तः क्रूर-अचारैर् असंवसन्। अहिंस्रो दम-दानाभ्यां जयेत् स्वर्गं तथा-व्रतः॥ ४-२४६

एध-उदकं मूल-फलम् अन्नम् अभ्युद्यतं च यत्। सर्वतः प्रतिगृह्णीयात् - मधु-अथ-अभयदक्षिणाम्॥ ४-२४७

आहृत-अभ्युद्यतां भिक्षां पुरस्ताद् अप्रचोदिताम्। मेने प्रजापतिर् ग्राह्याम् अपि दुष्कृत-कर्मणः॥ ४-२४८

न-अश्नन्ति पितरस् तस्य दशवर्षाणि पञ्च च॥ न च हव्यं वहत्यग्निर् यस् ताम् अभ्यवमन्यते॥ ४-२४९

शय्यां गृहान् कुशान् गन्धान् अपः पुष्पं मणीन् दधि। धाना मत्स्यान् पयो मांसं शाकं च-एव न निर्णुदेत्॥ ४-२५०

गुरून् भृत्यांश् च-उज्जिहीर्षन्न् अर्चिष्यन् देवता-अतिथीन्। सर्वतः प्रतिगृह्णीयान् न तु तृप्येत् स्वयं ततः॥ ४-२५१

गुरुषु त्व् अभ्यतीतेषु विना वा तैर् गृहे वसन्। आत्मनो वृत्तिम् अन्विच्छन् गृह्णीयात् साधुतः सदा॥ ४-२५२

आर्धिकः कुलमित्रं च गोपालो दास-नापितौ। एते शूद्रेषु भोज्य-अन्ना याश् च-अत्मानं निवेदयेत्॥ ४-२५३

यादृशो अस्य भवेद् आत्मा यादृशं च चिकीर्षितम्। यथा च-उपचरेद् एनं तथा-अत्मानं निवेदयेत्॥ ४-२५४

यो अन्यथा सन्तम् आत्मानम् अन्यथा सत्सु भाषते। स पापकृत्तमो लोके स्तेन आत्म-अपहारकः॥ ४-२५५

वाच्यर्था नियताः सर्वे वाच्-मूला वाच्-विनिःसृताः। तांस् तु यः स्तेनयेद् वाचं स सर्वस्तेयकृत् - नरः॥ ४-२५६

महर्षि-पितृ-देवानां गत्वा-अनृण्यं यथाविधि। पुत्रे सर्वं समासज्य वसेन् माध्यस्थ्यम् आस्थितः॥ ४-२५७

एकाकी चिन्तयेन् नित्यं विविक्ते हितम् आत्मनः। एकाकी चिन्तयानो हि परं श्रेयो अधिगच्छति॥ ४-२५८

एषा-उदिता गृहस्थस्य वृत्तिर् विप्रस्य शाश्वती। स्नातकव्रतकल्पश् च सत्त्ववृद्धिकरः शुभः॥ ४-२५९

अनेन विप्रो वृत्तेन वर्तयन् वेद-शास्त्रवित्। व्यपेत-कल्मषो नित्यं ब्रह्मलोके महीयते॥ ४-२६०

श्रुत्वा-एतान् ऋषयो धर्मान् स्नातकस्य यथा-उदितान्। इदम् ऊचुर् महात्मानम् अनल-प्रभवं भृगुम्॥ ५-०१

एवं यथा-उक्तं विप्राणां स्वधर्मम् अनुतिष्ठताम्। कथं मृत्युः प्रभवति वेद-शास्त्रविदां प्रभो॥ ५-०२

स तान् उवाच धर्म-अत्मा महर्षीन् मानवो भृगुः। श्रूयतां येन दोषेण मृत्युर् विप्रान् जिघांसति॥ ५-०३

अनभ्यासेन वेदानाम् आचारस्य च वर्जनात्। आलस्याद् अन्नदोषाच् च मृत्युर् विप्राञ् जिघांसति॥ ५-०४

लशुनं गृञ्जनं च-एव पलाण्डुं कवकानि च। अभक्ष्याणि द्विजातीनाम् अमेध्य-प्रभवानि च॥ ५-०५

लोहितान् वृक्षनिर्यासान् वृश्चन-प्रभवांस् तथा। शेलुं गव्यं च पेयूषं प्रयत्नेन विवर्जयेत्॥ ५-०६

वृथा कृसर-संयावं पायस-अपूपम् एव च। अनुपाकृतमांसानि देवान्नानि हवींषि च॥ ५-०७

अनिर्दशाया गोः क्षीरम् औष्ट्रम् ऐकशफं तथा। आविकं संधिनीक्षीरं वि-वत्सायाश् च गोः पयः ॥ ५-०८

आरण्यानां च सर्वेषां मृगाणां माहिषं विना। स्त्रीक्षीरं च-एव वर्ज्यानि सर्वशुक्तानि च-एव हि ॥ ५-०९

दधि भक्ष्यं च शुक्तेषु सर्वं च दधि-संभवम्। यानि च-एव-अभिषूयन्ते पुष्प-मूल-फलैः शुभैः ॥ ५-१०

क्रव्यादाञ् शकुनान् सर्वान् - तथा ग्रामनिवासिनः। अनिर्दिष्टांश् च-एकशफांष् टिट्टिभं च विवर्जयेत् ॥ ५-११

कलविङ्कं प्लवं हंसं चक्राह्वं ग्रामकुक्कुटम्। सारसं रज्जुवालं च दात्यूहं शुक-सारिके ॥ ५-१२

प्रतुदाञ् जालपादांश् च कोयष्टि-नखविष्किरान्। निमज्जतश् च मत्स्यादान् सौनं वल्लूरम् एव च ॥ ५-१३

बकं च-एव बलाकां च काकोलं खञ्जरीटकम्। मत्स्यादान् विड्वराहांश् च मत्स्यान् एव च सर्वशः ॥ ५-१४

यो यस्य मांसम् अश्नाति स तन्मांसाद उच्यते। मत्स्यादः सर्वमांसादस् तस्मान् मत्स्यान् विवर्जयेत् ॥ ५-१५

पाठीन-रोहिताव् आद्यौ नियुक्तौ हव्य-कव्ययोः। राजीवान् सिंहतुण्डाश् च स-शल्काश् च-एव सर्वशः ॥ ५-१६

न भक्षयेद् एकचरान् अज्ञातांश् च मृग-द्विजान्। भक्ष्येष्व् अपि समुद्दिष्टान् सर्वान् पञ्चनखांस् तथा ॥ ५-१७

श्वाविधं शल्यकं गोधां खड्ग-कूर्म-शशांस् तथा। भक्ष्यान् पञ्चनखेष्व् आहुर् अनुष्ट्रांश् च-एकतोदतह् ॥ ५-१८

चत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम्। पलाण्डुं गृञ्जनं च-एव मत्या जग्ध्वा पतेद् द्विजः ॥ ५-१९

अमत्या-एतानि षड् जग्ध्वा कृच्छ्रं सान्तपनं चरेत्। यतिचान्द्रायाणं वा-अपि शेषेषु-उपवसेद् अहः ॥ ५-२०

संवत्सरस्य-एकम् अपि चरेत् कृच्छ्रं द्विजोत्तमः। अज्ञातभुक्तशुद्धि-अर्थं ज्ञातस्य तु विषेशतः ॥ ५-२१

यज्ञार्थं ब्राह्मणैर् वध्याः प्रशस्ता मृग-पक्षिणः। भृत्यानां च-एव वृत्ति-अर्थम् अगस्त्यो ह्याचरत् पुरा ॥ ५-२२

बभूवुर् हि पुरोडाशा भक्ष्याणां मृग-पक्षिणाम्। पुराणेष्व् अपि यज्ञेषु ब्रह्म-क्षत्रसवेषु च ॥ ५-२३

यत् किं चित् स्नेहसंयुक्तं भक्ष्यं भोज्यम् अगर्हितम्। तत् पर्युषितम् अप्याद्यं हविःशेषं च यद् भवेत् ॥ ५-२४

चिरस्थितम् अपि त्व् आद्यम् अस्नेहाक्तं द्विजातिभिः। यव-गोधूमजं सर्वं पयसश् च-एव विक्रिया ॥ ५-२५

एतद् उक्तं द्विजातीनां भक्ष्य-अभक्ष्यम् अशेषतः। मांसस्य-अतः प्रवक्ष्यामि विधिं भक्षणवर्जने ॥ ५-२६

प्रोक्षितं भक्षयेन् मांसं ब्राह्मणानां च काम्यया। यथाविधि नियुक्तस् तु प्राणानाम् एव च-अत्यये ॥ ५-२७

प्राणस्य-अन्नम् इदं सर्वं प्रजापतिर् अकल्पयत्। स्थावरं जङ्गमं च-एव सर्वं प्राणस्य भोजनम् ॥ ५-२८

चराणाम् अन्नम् अचरा दंष्ट्रिणाम् अप्यदंष्ट्रिणः। अहस्ताश् च स-हस्तानां शूराणां च-एव भीरवः ॥ ५-२९

न-अत्ता दुष्यत्यदन्न् आद्यान् प्राणिनो अहन्य्-अहन्यपि । धात्रा-एव सृष्टा ह्याद्याश् च प्राणिनो अत्तार एव च ॥ ५-३०

यज्ञाय जग्धिर् मांसस्य-इत्येष दैवो विधिः स्मृतः । अतो अन्यथा प्रवृत्तिस् तु राक्षसो विधिर् उच्यते ॥ ५-३१

क्रीत्वा स्वयं वा-अप्युत्पाद्य पर-उपकृतम् एव वा । देवान् पितॄंश् च-अर्चयित्वा खादन् मांसं न दुष्यति ॥ ५-३२

न-अद्याद् अविधिना मांसं विधिज्ञो अनापदि द्विजः । जग्ध्वा ह्यविधिना मांसं प्रेतस् तैर् अद्यते अ-वशः ॥ ५-३३

न तादृशं भवत्येनो मृगहन्तुर् धनार्थिनः । यादृशं भवति प्रेत्य वृथामांसानि खादतः ॥ ५-३४

नियुक्तस् तु यथान्यायं यो मांसं न-अत्ति मानवः । स प्रेत्य पशुतां याति संभवान् एकविंशतिम् ॥ ५-३५

असंस्कृतान् पशून् मन्त्रैर् न-अद्याद् विप्रः कदा चन । मन्त्रैस् तु संस्कृतान् अद्यात् - शाश्वतं विधिम् आस्थितः ॥ ५-३६

कुर्याद् घृतपशुं सङ्गे कुर्यात् पिष्टपशुं तथा । न त्व् एव तु वृथा हन्तुं पशुम् इच्छेत् कदा चन ॥ ५-३७

यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् । वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥ ५-३८

यज्ञार्थं पशवः सृष्टाः स्वयम् एव स्वयंभुवा । यज्ञो अस्य भूत्यै सर्वस्य तस्माद् यज्ञे वधो अ-वधः ॥ ५-३९

ओषध्यः पशवो वृक्षास् तिर्यञ्चः पक्षिणस् तथा । यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युत्सृतीः पुनः ॥ ५-४०

मधुपर्के च यज्ञे च पितृ-दैवतकर्मणि । अत्र-एव पशवो हिंस्या न-अन्यत्र-इत्यब्रवीन् मनुः ॥ ५-४१

एष्व् अर्थेषु पशून् हिंसन् वेदतत्त्वार्थविद् द्विजः । आत्मानं च पशुं च-एव गमयत्युत्तमं गतिम् ॥ ५-४२

गृहे गुराव् अरण्ये वा निवसन्न् आत्मवान् द्विजः । न-अ-वेदविहितां हिंसाम् आपद्यपि समाचरेत् ॥ ५-४३

या वेदविहिता हिंसा नियता-अस्मिंश् चर-अचरे । अहिंसाम् एव तां विद्याद् वेदाद् धर्मो हि निर्बभौ ॥ ५-४४

यो अहिंसकानि भूतानि हिनस्त्यात्मसुख-इच्छया । स जीवांश् च मृतश् च-एव न क्व चित् सुखम् एधते ॥ ५-४५

यो बन्धनवधक्लेशान् प्राणिनां न चिकीर्षति । स सर्वस्य हितप्रेप्सुः सुखम् अत्यन्तम् अश्नुते ॥ ५-४६

यद् ध्यायति यत् कुरुते रतिं बध्नाति यत्र च । तद् अवाप्नोत्ययत्नेन यो हिनस्ति न किं चन ॥ ५-४७

न-अ-कृत्वा प्राणिनां हिंसां मांसम् उत्पद्यते क्व चित् । न च प्राणिवधः स्वर्ग्यस् तस्मान् मांसं विवर्जयेत् ॥ ५-४८

समुत्पत्तिं च मांसस्य वध-बन्धौ च देहिनाम् । प्रसमीक्ष्य निवर्तेत सर्वमांसस्य भक्षणात् ॥ ५-४९

न भक्षयति यो मांसं विधिं हित्वा पिशाचवत् । न लोके प्रियतां याति व्याधिभिश् च न पीड्यते ॥ ५-५०

अनुमन्ता विशसिता निहन्ता क्रय-विक्रयी । संस्कर्ता च-उपहर्ता च खादकश् च-इति घातकाः ॥ ५-५१

स्वमांसं परमांसेन यो वर्धयितुम् इच्छति । अनभ्यर्च्य पितॄन् देवांस् ततो अन्यो न-अस्त्यपुण्यकृत् ॥ ५-५२

वर्षे वर्षे अश्वमेधेन यो यजेत शतं समाः । मांसानि च न खादेद् यस् तयोः पुण्यफलं समम् ॥ ५-५३

फल-मूल-अशनैर् मेध्यैर् मुनि-अन्नानां च भोजनैः । न तत् फलम् अवाप्नोति यत् - मांसपरिवर्जनात् ॥ ५-५४

मां स भक्षयिता-अमुत्र यस्य मांसम् इह-अद्म्यहम् । एतत् - मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥ ५-५५

न मांसभक्षणे दोषो न मद्ये न च मैथुने । प्रवृत्तिर् एषा भूतानां निवृत्तिस् तु महाफला ॥ ५-५६

प्रेतशुद्धिं प्रवक्ष्यामि द्रव्यशुद्धिं तथा-एव च । चतुर्णाम् अपि वर्णानां यथावद् अनुपूर्वशः ॥ ५-५७

दन्तजाते अनुजाते च कृत-चूडे च संस्थिते । अशुद्धा बान्धवाः सर्वे सूतके च तथा-उच्यते ॥ ५-५८

दशाहं शावम् आशौचं सपिण्डेषु विधीयते । अर्वाक् संचयनाद् अस्थ्नां त्र्यहम् एकाहम् एव वा ॥ ५-५९

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते । समानोदकभावस् तु जन्म-नाम्नोर् अवेदने ॥ ५-६०

यथा-इदं शावम् आशौचं सपिण्डेषु विधीयते । जनने अप्येवम् एव स्यात् - निपुणं शुद्धिम् इच्छताम् ५-६१

सर्वेषां शावम् आशौचं माता-पित्रोस् तु सूतकम् । सूतकं मातुर् एव स्याद् उपस्पृश्य पिता शुचिः ५-६२

निरस्य तु पुमान् - शुक्रम् उपस्पृस्य-एव शुध्यति । बैजिकाद् अभिसंबन्धाद् अनुरुन्ध्याद् अघं त्र्यहम् ॥ ५-६३

अह्ना च-एकेन रात्र्या च त्रिरात्रैर् एव च त्रिभिः । शव-स्पृशो विशुध्यन्ति त्र्यहाद् उदकदायिनः ॥ ५-६४

गुरोः प्रेतस्य शिष्यस् तु पितृमेधं समाचरन् । प्रेतहारैः समं तत्र दशरात्रेण शुध्यति ॥ ५-६५

रात्रिभिर् मास-तुल्याभिर् गर्भस्रावे विशुध्यति । रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला ॥ ५-६६

नृणाम् अकृतचूडानां विशुद्धिर् नैशिकी स्मृता । निर्वृत्त-चूडकानां तु त्रिरात्रात् - शुद्धिर् इष्यते ॥ ५-६७

ऊन-द्विवार्षिकं प्रेतं निदध्युर् बान्धवा बहिः । अलंकृत्य शुचौ भूमाव् अस्थिसंचयनाद् ऋते ॥ ५-६८

न-अस्य कार्यो अग्निसंस्कारो न च कार्या-उदकक्रिया । अरण्ये काष्ठवत् त्यक्त्वा क्षपेयुस् त्र्यहम् एव तु ॥ ५-६९

न-अ-त्रिवर्षस्य कर्तव्या बान्धवैर् उदकक्रिया । जात-दन्तस्य वा कुर्युर् नाम्नि वा-अपि कृते सति ॥ ५-७०

स-ब्रह्मचारिण्येकाहम् अतीते क्षपणम् स्मृतम् । जन्मन्येक-उदकानां तु त्रिरात्रात् - शुद्धिर् इष्यते ॥ ५-७१

स्त्रीणाम् असंस्कृतानां तु त्र्यहात् - शुध्यन्ति बान्धवाः । यथा-उक्तेन-एव कल्पेन शुध्यन्ति तु स-नाभयः ॥ ५-७२

अ-क्षार-लवण-अन्नाः स्युर् निमज्जेयुश् च ते त्र्यहम्। मांसाशनं च न-अश्नीयुः शयीरंश् च पृथक् क्षितौ ॥ ५-७३

संनिधाव् एष वै कल्पः शाव-अशौचस्य कीर्तितः। असंनिधाव् अयं ज्ञेयो विधिः संबन्धि-बान्धवैः॥ ५-७४

विगतं तु विदेशस्थं शृणुयाद् यो ह्यनिर्दशम्। यत् - शेषं दशरात्रस्य तावद् एव-अशुचिर् भवेत्॥ ५-७५

अतिक्रान्ते दशाहे च त्रिरात्रम् अशुचिर् भवेत्। संवत्सरे व्यतीते तु स्पृष्ट्वा-एव-अपो विशुध्यति॥ ५-७६

निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च। स-वासा जलम् आप्लुत्य शुद्धो भवति मानवः॥ ५-७७

बाले देशान्तरस्थे च पृथक्-पिण्डे च संस्थिते। स-वासा जलम् आप्लुत्य सद्य एव विशुध्यति॥ ५-७८

अन्त-र्दशाहे स्यातां चेत् पुनर् मरण-जन्मनी। तावत् स्याद् अशुचिर् विप्रो यावत् तत् स्याद् अनिर्दशम्॥ ५-७९

त्रिरात्रम् आहुर् आशौचम् आचार्ये संस्थिते सति। तस्य पुत्रे च पत्न्यां च दिवा-रात्रम् इति स्थितिः॥ ५-८०

श्रोत्रिये तु-उपसंपन्ने त्रिरात्रम् अशुचिर् भवेत्। मातुले पक्षिणीं रात्रिं शिष्य-ऋत्विग्-बान्धवेषु च॥ ५-८१

प्रेते राजनि स-ज्योतिर् यस्य स्याद् विषये स्थितः। अश्रोत्रिये त्व् अहः कृत्स्नम् अनूचाने तथा गुरौ॥ ५-८२

शुद्ध्येद् विप्रो दशाहेन द्वादशाहेन भूमिपः। वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति॥ ५-८३

न वर्धयेद् अघ-अहानि प्रत्यूहेन् न-अग्निषु क्रियाः। न च तत्कर्म कुर्वाणः स-नाभ्यो अप्यशुचिर् भवेत्॥ ५-८४

दिवाकीर्तिम् उदक्यां च पतितं सूतिकां तथा। शवं तत्स्पृष्टिनं च-एव स्पृष्ट्वा स्नानेन शुध्यति॥ ५-८५

आचम्य प्रयतो नित्यं जपेद् अशुचिदर्शने। सौरान् मन्त्रान् यथा-उत्साहं पावमानीश् च शक्तितः॥ ५-८६

नारं स्पृष्ट्वा-अस्थि स-स्नेहं स्नात्वा विप्रो विशुध्यति। आचम्य-एव तु निःस्नेहं गाम् आलभ्य-अर्कम् ईक्ष्य वा॥ ५-८७

आदिष्टी न-उदकं कुर्याद् आ व्रतस्य समापनात्। समाप्ते तु-उदकं कृत्वा त्रिरात्रेण-एव शुध्यति॥ ५-८८

वृथा-संकर-जातानां प्रव्रज्यासु च तिष्ठताम्॥ आत्मनस् त्यागिनां च-एव निवर्तेत-उदकक्रिया॥ ५-८९

पाषण्डम् आश्रितानां च चरन्तीनां च कामतः। गर्भ-भर्तृ-द्रुहां च-एव सुरापीनां च योषिताम्॥ ५-९०

आचार्यं स्वम् उपाध्यायं पितरं मातरं गुरुम्। निर्हृत्य तु व्रती प्रेतान् न व्रतेन वियुज्यते॥ ५-९१

दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत्। पश्चिम-उत्तर-पूर्वैस् तु यथायोगं द्विजन्मनः॥ ५-९२

न राज्ञाम् अघदोषो अस्ति व्रतिनां न च सत्त्रिणाम्। ऐन्द्रं स्थानम् उपासीना ब्रह्मभूता हि ते सदा॥ ५-९३

राज्ञो महात्मिके स्थाने सद्यःशौचं विधीयते। प्रजानां परिरक्षार्थम् आसनं च-अत्र कारणम्॥ ५-९४

डिम्भ-अहव-हतानां च विद्युता पार्थिवेन च। गो-ब्राह्मणस्य च-एव-अर्थे यस्य च-इच्चति पार्थिवः॥ ५-९५

सोम-अग्नि-अर्क-अनिल-इन्द्राणां वित्त-अप्पत्योर् यमस्य च। अष्टानां लोकपालानां वपुर् धारयते नृपः॥ ५-९६

लोकेशाधिष्ठितो राजा न-अस्य-अशौचं विधीयते। शौच-अशौचं हि मर्त्यानां लोकेभ्यः प्रभव-अप्ययौ॥ ५-९७

उद्यतैर् आहवे शस्त्रैः क्षत्रधर्महतस्य च। सद्यः संतिष्ठते यज्ञस् तथा-अशौचम् इति स्थितिः॥ ५-९८

विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहन-अयुधम्। वैश्यः प्रतोदं रश्मीन् वा यष्टिं शूद्रः कृत-क्रियः॥ ५-९९

एतद् वो अभिहितं शौचं सपिण्डेषु द्विजोत्तमाः। असपिण्डेषु सर्वेषु प्रेतशुद्धिं निबोधत॥ ५-१००

असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत्। विशुध्यति त्रिरात्रेण मातुर् आप्तांश् च बान्धवान्॥ ५-१०१

यद्यन्नम् अत्ति तेषां तु दशाहेन-एव शुध्यति। अनदन्न् अन्नम् अह्ना-एव न चेत् तस्मिन् गृहे वसेत्॥ ५-१०२

अनुगम्य-इच्चया प्रेतं ज्ञातिम् अज्ञातिम् एव च॥ स्नात्वा स-चैलः स्पृष्ट्वा-अग्निं घृतं प्राश्य विशुध्यति॥ ५-१०३

न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण नाययेत्। अस्वर्ग्या ह्याहुतिः सा स्यात् - शूद्रसंस्पर्शदूषिता॥ ५-१०४

ज्ञानं तपो अग्निर् आहारो मृत् - मनो वार्युपाञ्जनम्। वायुः कर्म-अर्क-कालौ च शुद्धेः कर्तॄणि देहिनाम्॥ ५-१०५

सर्वेषाम् एव शौचानाम् अर्थशौचं परं स्मृतं। यो अर्थे शुचिर् हि स शुचिर् न मृत् - वारि-शुचिः शुचिः॥ ५-१०६

क्षान्त्या शुध्यन्ति विद्वांसो दानेन-अ-कार्यकारिणः। प्रच्चन्न-पापा जप्येन तपसा वेदवित्तमाः॥ ५-१०७

मृत् - तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति। रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमाः॥ ५-१०८

अद्भिर् गात्राणि शुध्यन्ति मनः सत्येन शुध्यति। विद्या-तपोभ्यां भूतात्मा बुद्धिर् ज्ञानेन शुध्यति॥ ५-१०९

एष शौचस्य वः प्रोक्तः शरीरस्य विनिर्णयः। नानाविधानां द्रव्याणां शुद्धेः शृणुत निर्णयम्॥ ५-११०

तैजसानां मणीनां च सर्वस्य-अश्ममयस्य च। भस्मना-अद्भिर् मृदा च-एव शुद्धिर् उक्ता मनीषिभिः॥ ५-१११

निर्लेपं काञ्चनं भाण्डम् अद्भिर् एव विशुध्यति। अप्-जम् अश्ममयं च-एव राजतं च-अन् - उपस्कृतम्॥ ५-११२

अपाम् अग्नेश् च संयोगाद् हैमं रौप्यं च निर्बभौ। तस्मात् तयोः स्वयोन्या-एव निर्णेको गुणवत्तरः॥ ५-११३

ताम्र-अयस-कांस्य-रैत्यानां त्रपुणः सीसकस्य च। शौचं यथार्हं कर्तव्यं क्षार-अम्लोदक-वारिभिः॥ ५-११४

द्रवाणां च-एव सर्वेषां शुद्धिर् उत्पवनं स्मृतम्। प्रोक्षणं संहतानां च दारवाणां च तक्षणम्॥ ५-११५

मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि। चमसानां ग्रहाणां च शुद्धिः प्रक्षालनेन तु॥ ५-११६

चरूणां स्रुक्-स्रुवाणां च शुद्धिर् उष्णेन वारिणा। स्फ्य-शूर्प-शकटानां च मुसल-उलूखलस्य च॥ ५-११७

अद्भिस् तु प्रोक्षणं शौचं बहूनां धान्य-वाससाम्। प्रक्षालनेन त्व् अल्पानाम् अद्भिः शौचं विधीयते॥ ५-११८

चैलवत् - चर्मणां शुद्धिर् वैदलानां तथा-एव च। शाक-मूल-फलानां च धान्यवत् - शुद्धिर् इष्यते॥ ५-११९

कौशेय-अविकयोर् ऊषैः कुतपानाम् अरिष्टकैः। श्रीफलैर् अंशुपट्टानां क्षौमाणां गौरसर्षपैः॥ ५-१२०

क्षौमवत् - शङ्ख-शृङ्गाणाम् अस्थि-दन्तमयस्य च। शुद्धिर् विजानता कार्या गो-मूत्रेण-उदकेन वा॥ ५-१२१

प्रोक्षणात् तृण-काष्ठं च पलालं च-एव शुध्यति। मार्जन-उपाञ्जनैर् वेश्म पुनःपाकेन मृत् - मयम्॥ ५-१२२

मद्यैर् मूत्रैः पुरीषैर् वा ष्ठीवनैह् पूयशोणितैः मद्यैर् मूत्रैः पुरीषैर् वा ष्ठीवनैह् पूयशोणितैः ५-१२३

संमार्जन-उपाञ्जनेन सेकेन-उल्लेखनेन च। गवां च परिवासेन भूमिः शुध्यति पञ्चभिः॥ ५-१२४

पक्षि-जग्धं गवा घ्रातम् अवधूतम् अवक्षुतम्। दूषितं केश-कीटैश् च मृत् - प्रक्षेपेण शुध्यति॥ ५-१२५

यावत् - न-अपैत्यमेध्याक्ताद् गन्धो लेपश् च तत् - कृतः। तावन् मृद्-वारि च-अदेयं सर्वासु द्रव्यशुद्धिषु॥ ५-१२६

त्रीणि देवाः पवित्राणि ब्राह्मणानाम् अकल्पयन्। अदृष्टम् अद्भिर् निर्णिक्तं यच् च वाचा प्रशस्यते॥ ५-१२७

आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर् भवेत्। अव्याप्ताश् चेद् अमेध्येन गन्ध-वर्ण-रस-अन्विताः॥ ५-१२८

नित्यं शुद्धः कारु-हस्तः पण्ये यच् च प्रसारितम्। ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यम् इति स्थितिः॥ ५-१२९

नित्यम् आस्यं शुचि स्त्रीणां शकुनिः फलपातने। प्रस्रवे च शुचिर् वत्सः श्वा मृगग्रहणे शुचिः॥ ५-१३०

श्वभिर् हतस्य यन् मांसं शुचि तन् मनुर् अब्रवीत्। क्रव्याद्भिश् च हतस्य-अन्यैश् चण्डालाद्यैश् च दस्युभिः॥ ५-१३१

ऊर्ध्वं नाभेर् यानि खानि तानि मेध्यानि सर्वशः। यान्यधस् तान्यमेध्यानि देहाच् च-एव मलाश् च्युताः॥ ५-१३२

मक्षिका विप्रुषश् चाया गौर् अश्वः सूर्यरश्मयः। रजो भूर् वायुर् अग्निश् च स्पर्शे मेध्यानि निर्दिशेत्॥ ५-१३३

विष्-मूत्र-उत्सर्ग-शुद्धि-अर्थं मृत् - वार्यादेयम् अर्थवत्। दैहिकानां मलानां च शुद्धिषु द्वादशस्व् अपि॥ ५-१३४

वसा शुक्रम् असृज्-मज्जा मूत्र-विष्-घ्राण-कर्ण-विष्-। श्लेश्म अश्रु दूषिका स्वेदो द्वादश-एते नृणां मलाः॥ ५-१३५

एका लिङ्गे गुदे तिस्रस् तथा-एकत्र करे दश। उभयोः सप्त दातव्या मृदः शुद्धिम् अभीप्सता॥ ५-१३६

एतत् - शौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्। त्रिगुणं स्याद् वनस्थानां यतीनां तु चतुर्गुणम्॥ ५-१३७

कृत्वा मूत्रं पुरीषं वा खान्याचान्त उपस्पृशेत्। वेदम् अध्येष्यमाणश् च अन्नम् अश्नंश् च सर्वदा॥ ५-१३८

त्रिर् आचामेद् अपः पूर्वं द्विः प्रमृज्यात् ततो मुखम्। शरीरं शौचम् इच्छन् हि स्त्री शूद्रस् तु सकृत् सकृत्॥ ५-१३९

शूद्राणां मासिकं कार्यं वपनं न्यायवर्तिनाम्। वैश्यवत् - शौचकल्पश् च द्विज-उच्छिष्टं च भोजनम्॥ ५-१४०

न-उच्छिष्टं कुर्वते मुख्या विप्रुषो अङ्गं न यान्ति याः। न श्मश्रूणि गतान्यास्यं न दन्तान्त-अधिष्ठितम्॥ ५-१४१

स्पृशन्ति बिन्दवः पादौ य आचामयतः परान्। भौमिकैस् ते समा ज्ञेया न तैर् आप्रयतो भवेत्॥ ५-१४२

उच्छिष्टेन तु संस्पृष्टो द्रव्य-हस्तः कथं चन। अनिधाय-एव तद् द्रव्यम् आचान्तः शुचिताम् इयात्॥ ५-१४३

वान्तो विरिक्तः स्नात्वा तु घृतप्राशनम् आचरेत्। आचामेद् एव भुक्त्वा-अन्नं स्नानं मैथुनिनः स्मृतम्॥ ५-१४४

सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्य-उक्त्वा-अनृतानि च। पीत्वा-अपो अध्येष्यमाणश् च आचामेत् प्रयतो अपि सन्॥
५-१४५

एषां शौचविधिः कृत्स्नो द्रव्यशुद्धिस् तथा-एव च। उक्तो वः सर्ववर्णानां स्त्रीणां धर्मान् निबोधत॥ ५-१४६

बालया वा युवत्या वा वृद्धया वा-अपि योषिता। न स्वातन्त्र्येण कर्तव्यं किं चिद् कार्यं गृहेष्व् अपि॥ ५-१४७

बाल्ये पितुर् वशे तिष्ठेत् पाणिग्राहस्य यौवने। पुत्राणां भर्तरि प्रेते न भजेत् स्त्री स्वतन्त्रताम्॥ ५-१४८

पित्रा भर्त्रा सुतैर् वा-अपि न-इच्छेद् विरहम् आत्मनः। एषां हि विरहेण स्त्री गर्ह्ये कुर्याद् उभे कुले॥ ५-१४९

सदा प्रहृष्टया भाव्यं गृहकार्ये च दक्षया। सुसंस्कृत-उपस्करया व्यये च-अमुक्त-हस्तया॥ ५-१५०

यस्मै दद्यात् पिता त्व् एनां भ्राता वा-अनुमते पितुः। तं शुश्रूषेत जीवन्तं संस्थितं च न लङ्घयेत्॥ ५-१५१

मङ्गलार्थं स्वस्त्ययनं यज्ञश् च-असां प्रजापतेः। प्रयुज्यते विवाहे तु प्रदानं स्वाम्य-कारणम्॥ ५-१५२

अन् - ऋताव् ऋतुकाले च मन्त्र-संस्कारकृत् पतिः। सुखस्य नित्यं दाता-इह परलोके च योषितः॥ ५-१५३

वि-शीलः काम-वृत्तो वा गुणैर् वा परिवर्जितः। उपचार्यः स्त्रिया साध्व्या सततं देववत् पतिः॥ ५-१५४

न-अस्ति स्त्रीणां पृथग् यज्ञो न व्रतं न-अप्युपोषणम्। पतिं शुश्रूषते येन तेन स्वर्गे महीयते॥ ५-१५५

पाणिग्राहस्य साध्वी स्त्री जीवतो वा मृतस्य वा। पतिलोकम् अभीप्सन्ती न-अचरेत् किं चिद् अप्रियम्॥ ५-१५६

कामं तु क्षपयेद् देहं पुष्प-मूल-फलैः शुभैः। न तु नाम-अपि गृह्णीयात् पत्यौ प्रेते परस्य तु॥ ५-१५७

आसीत-अ मरणात् क्षान्ता नियता ब्रह्मचारिणी। यो धर्म एकपत्नीनां काङ्क्षन्ती तम् अनुत्तमम्॥ ५-१५८

अनेकानि सहस्राणि कुमार-ब्रह्मचारिणाम्। दिवं गतानि विप्राणाम् अकृत्वा कुलसंततिम्॥ ५-१५९

मृते भर्तरि साद्ध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता। स्वर्गं गच्चत्यपुत्रा-अपि यथा ते ब्रह्मचारिणः॥ ५-१६०

अपत्यलोभाद् या तु स्त्री भर्तारम् अतिवर्तते। सा-इह निन्दाम् अवाप्नोति परलोकाच् च हीयते॥ ५-१६१

न-अन्य-उत्पन्ना प्रजा-अस्ति-इह न च-अप्यन्यपरिग्रहे। न द्वितीयश् च साध्वीनां क्व चिद् भर्ता-उपदिश्यते॥ ५-१६२

पतिं हित्वा-अपकृष्टं स्वम् उत्कृष्टं या निषेवते। निन्द्या-एव सा भवेल् लोके पर-पूर्वा-इति च-उच्यते॥ ५-१६३

व्यभिचारात् तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम्। शृगाल-योनिं प्राप्नोति पाप-रोगैश् च पीड्यते॥ ५-१६४

पतिं या न-अभिचरति मनो-वाग्-देहसंयुता। सा भर्तृलोकम् आप्नोति सद्भिः साध्वी-इति च-उच्यते॥ ५-१६५

अनेन नारी वृत्तेन मनो-वाग्-देहसंयता। इह-अग्र्यां कीर्तिम् आप्नोति पतिलोकं परत्र च॥ ५-१६६

एवं वृत्तां स-वर्णां स्त्रीं द्विजातिः पूर्वमारिणीम्। दाहयेद् अग्निहोत्रेण यज्ञपात्रैश् च धर्मवित्॥ ५-१६७

भार्यायै पूर्वमारिण्यै दत्त्वा-अग्नीन् अन्त्यकर्मणि। पुनर् दारक्रियां कुर्यात् पुनर् आधानम् एव च॥ ५-१६८

अनेन विधिना नित्यं पञ्चयज्ञान् न हापयेत्। द्वितीयम् आयुषो भागं कृत-दारो गृहे वसेत्॥ ५-१६९

एवं गृहाश्रमे स्थित्वा विधिवत् स्नातको द्विजः। वने वसेत् तु नियतो यथावद् विजित-इन्द्रियः॥ ६-०१

गृहस्थस् तु यथा पश्येद् वली-पलितम् आत्मनः। अपत्यस्य-एव च-अपत्यं तदा-अरण्यं समाश्रयेत्॥ ६-०२

संत्यज्य ग्राम्यम् आहारं सर्वं च-एव परिच्चदम्। पुत्रेषु भार्यां निक्षिप्य वनं गच्चेत् सह-एव वा॥ ६-०३

अग्निहोत्रं समादाय गृह्यं च-अग्निपरिच्चदम्। ग्रामाद् अरण्यं निःसृत्य निवसेन् नियत-इन्द्रियः॥ ६-०४

मुनि-अन्नैर् विविधैर् मेध्यैः शाक-मूल-फलेन वा। एतान् एव महायज्ञान् निर्वपेद् विधिपूर्वकम्॥ ६-०५

वसीत चर्म चीरं वा सायं स्नायात् प्रगे तथा। जटाश् च बिभृयान् नित्यं श्मश्रु-लोम-नखानि च॥ ६-०६

यद्-भक्ष्यं स्याद् ततो दद्याद् बलिं भिक्षां च शक्तितः। अप्-मूल-फल-भिक्षाभिर् अर्चयेद् आश्रमागतान्॥ ६-०७

स्वाध्याये नित्ययुक्तः स्याद् दान्तो मैत्रः समाहितः। दाता नित्यम् अनादाता सर्वभूतानुकम्पकः॥ ६-०८

वैतानिकं च जुहुयाद् अग्निहोत्रं यथाविधि। दर्शम् अस्कन्दयन् पर्व पौर्णमासं च योगतः॥ ६-०९

ऋक्षेष्ट्य्-अग्रयणं च-एव चातुर्मास्यानि च-अहरेत्। तुरायणं च क्रमशो दक्षस्यायनम् एव च॥ ६-१०

वासन्त-शारदैर् मेध्यैर् मुनि-अन्नैः स्वयम् आहृतैः। पुरोडाशांश् चरूंश् च-एव विधिवत् - निर्वपेत् पृथक् ॥ ६-११

देवताभ्यस् तु तद् हुत्वा वन्यं मेध्यतरं हविः। शेषम् आत्मनि युञ्जीत लवणं च स्वयं कृतम्॥ ६-१२

स्थलज-अदकशाकानि पुष्प-मूल-फलानि च। मेध्यवृक्ष-उद्भवान्यद्यात् स्नेहांश् च फल-संभवान्।६-१३

वर्जयेन् मधु मांसं च भौमानि कवकानि च। भूस्तृणं शिग्रुकं च-एव श्लेश्मातक-फलानि च॥ ६-१४

त्यजेद् आश्वयुजे मासि मुनि-अन्नं पूर्वसंचितम्। जीर्णानि च-एव वासांसि शाक-मूल-फलानि च॥ ६-१५

न फालकृष्टम् अश्नीयाद् उत्सृष्टम् अपि केन चित्। न ग्रामजातान्यार्तो अपि मूलाणि च फलानि च॥ ६-१६

अग्निपक्व-अशनो वा स्यात् कालपक्वभुज- एव वा। अश्म-कुट्टो भवेद् वा-अपि दन्त-उलूखलिको अपि वा॥ ६-१७

सद्यः प्रक्षालको वा स्यान् मास-संचयिको अपि वा। षण्मास-निचयो वा स्यात् समा-निचय एव वा॥ ६-१८

नक्तं च-अन्नं समश्नीयाद् दिवा वा-अहृत्य शक्तितः। चतुर्थकालिको वा स्यात् स्याद् वा-अप्यष्टम-कालिकः॥ ६-१९

चान्द्रायणविधानैर् वा शुक्ल-कृष्णे च वर्तयेत्। पक्षान्तयोर् वा-अप्यश्नीयाद् यवागूं क्वथितां सकृत्॥ ६-२०

पुष्प-मूल-फलैर् वा-अपि केवलैर् वर्तयेत् सदा। कालपक्वैः स्वयं शीर्णैर् वैखानसमते स्थितः॥ ६-२१

भूमौ विपरिवर्तेत तिष्ठेद् वा प्रपदैर् दिनम्। स्थान-असनाभ्यां विहरेत् सवनेषु-उपयन्न् अपः॥ ६-२२

ग्रीष्मे पञ्च-तपास् तु स्याद् वर्षास्व् अभ्र-अवकाशिकः। आर्द्र-वासास् तु हेमन्ते क्रमशो वर्धयंस् तपः॥ ६-२३

उपस्पृशंस् त्रिषवणं पितॄन् देवांश् च तर्पयेत्। तपस्-चरंश् च-उग्रतरं शोषयेद् देहम् आत्मनः॥ ६-२४

अग्नीन् आत्मनि वैतानान् समारोप्य यथाविधि। अनग्निर् अनिकेतः स्यान् मुनिर् मूल-फल-अशनः॥ ६-२५

अप्रयत्नः सुखार्थेषु ब्रह्मचारी धरा-अशयः। शरणेष्व् अममश् च-एव वृक्षमूल-निकेतनः॥ ६-२६

तापसेष्व् एव विप्रेषु यात्रिकं भैक्षम् आहरेत्। गृहमेधिषु च-अन्येषु द्विजेषु वनवासिषु॥ ६-२७

ग्रामाद् आहृत्य वा-अश्नीयाद् अष्टौ ग्रासान् वने वसन्। प्रतिगृह्य पुटेन-एव पाणिना शकलेन वा॥ ६-२८

एताश् च-अन्याश् च सेवेत दीक्षा विप्रो वने वसन्। विविधाश् च-अपनिषदीर् आत्मसंसिद्धये श्रुतीः॥ ६-२९

ऋषिभिर् ब्राह्मणैश् च-एव गृहस्थैर् एव सेविताः। विद्या-तपो-विवृद्ध्यर्थं शरीरस्य च शुद्धये॥ ६-३०

अपराजितां वा-अस्थाय व्रजेद् दिशम् अजिह्मगः। आ निपातात् - शरीरस्य युक्तो वारि-अनिल-अशनः॥ ६-३१

आसां महर्षिचर्याणां त्यक्त्वा-अन्यतमया तनुम्। वीत-शोक-भयो विप्रो ब्रह्मलोके महीयते॥ ६-३२

वनेषु च विहृत्य-एवं तृतीयं भागम् आयुषः। चतुर्थम् आयुषो भागं त्यक्त्वा सङ्गान् परिव्रजेत्॥ ६-३३

आश्रमाद् आश्रमं गत्वा हुत-होमो जित-इन्द्रियः। भिक्षा-बलि-परिश्रान्तः प्रव्रजन् प्रेत्य वर्धते॥ ६-३४

ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत्। अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः॥ ६-३५

अधीत्य विधिवद् वेदान् पुत्रांश् च-उत्पाद्य धर्मतः। इष्ट्वा च शक्तितो यज्ञैर् मनो मोक्षे निवेशयेत्॥ ६-३६

अधीत्य विधिवद् वेदान् पुत्रांश् च-उत्पाद्य धर्मतः। इष्ट्वा च शक्तितो यज्ञैर् मनो मोक्षे निवेशयेत्॥ ६-३६

अनधीत्य द्विजो वेदान् अनुत्पाद्य तथा सुतान्। अनिष्ट्वा च-एव यज्ञैश् च मोक्षम् इच्छन् व्रजत्यधः॥ ६-३७

प्राजापत्यं निरुप्य-इष्टिं सर्ववेदस-दक्षिणाम्। आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात्॥ ६-३८

यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात्। तस्य तेजोमया लोका भवन्ति ब्रह्मवादिनः॥ ६-३९

यस्माद् अणु-अपि भूतानां द्विजान् न-उत्पद्यते भयम्। तस्य देहाद् विमुक्तस्य भयं न-अस्ति कुतश् चन॥ ६-४०

अगाराद् अभिनिष्क्रान्तः पवित्र-उपचितो मुनिः। समुपोढेषु कामेषु नि-अपेक्षः परिव्रजेत्॥ ६-४१

एक एव चरेन् नित्यं सिद्ध्यर्थम् असहायवान्। सिद्धिम् एकस्य संपश्यन् न जहाति न हीयते॥ ६-४२

अन् - अग्निर् अनिकेतः स्याद् ग्रामम् अन्नार्थम् आश्रयेत्। उपेक्षको अ-संकुसुको मुनिर् भावसमाहितः। ६-४३

कपालं वृक्षमूलानि कुचेलम् असहायता। समता च-एव सर्वस्मिन्न् एतत् - मुक्तस्य लक्षणम्॥ ६-४४

न-अभिनन्देत मरणं न-अभिनन्देत जीवितम्। कालम् एव प्रतीक्षेत निर्वेशं भृतको यथा॥ ६-४५

दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं जलं पिबेत्। सत्यपूतां वदेद् वाचं मनःपूतं समाचरेत्॥ ६-४६

अतिवादांस् तितिक्षेत न-अवमन्येत कं चन। न च-इमं देहम् आश्रित्य वैरं कुर्वीत केन चित्॥ ६-४७

क्रुद्ध्यन्तं न प्रतिक्रुध्येद् आक्रुष्टः कुशलं वदेत्। सप्तद्वारावकीर्णां च न वाचम् अनृतां वदेत्॥ ६-४८

अध्यात्म-रतिर् आसीनो नि-अपेक्षो नि-आमिषः। आत्मना-एव सहायेन सुखार्थी विचरेद् इह॥ ६-४९

न च-उत्पात-निमित्ताभ्यां न नक्षत्र-अङ्गविद्यया। न-अनुशासन-वादाभ्यां भिक्षां लिप्सेत कर्हि चित्॥ ६-५०

न तापसैर् ब्राह्मणैर् वा वयोभिर् अपि वा श्वभिः। आकीर्णं भिक्षुकैर् वा-अन्यैर् अगारम् उपसंव्रजेत्॥ ६-५१

क्लृप्त-केश-नख-श्मश्रुः पात्री दण्डी कुसुम्भवान्। विचरेन् नियतो नित्यं सर्वभूतान्यपीडयन्॥ ६-५२

अतैजसानि पात्राणि तस्य स्युर् नि-र्व्रणानि च। तेषाम् अद्भिः स्मृतं शौचं चमसानाम् इव-अध्वरे॥ ६-५३

अलाबुं दारुपात्रं च मृण्मयं वैदलं तथा। एतानि यतिपात्राणि मनुः स्वायंभुवो अब्रवीत्॥ ६-५४

एककालं चरेद् भैक्षं न प्रसज्जेत विस्तरे। भैक्षे प्रसक्तो हि यतिर् विषयेष्व् अपि सज्जति॥ ६-५५

वि-धूमे सन्न-मुसले व्य्-अङ्गारे भुक्तवज्-जने। वृत्ते शरावसंपाते भिक्षां नित्यं यतिश् चरेत्॥ ६-५६

अलाभे न विषदी स्यात् - लाभे च-एव न हर्षयेत्। प्राणयात्रिक-मात्रः स्यात् - मात्रासङ्गाद् विनिर्गतः॥ ६-५७

अभिपूजितलाभांस् तु जुगुप्सेत-एव सर्वशः। अभिपूजितलाभैश् च यतिर् मुक्तो अपि बध्यते॥ ६-५८

अल्पान्नाभ्यवहारेण रहःस्थान-असनेन च। ह्रियमाणानि विषयैर् इन्द्रियाणि निवर्तयेत्॥ ६-५९

इन्द्रियाणां निरोधेन राग-द्वेश-क्षयेण च। अहिंसया च भूतानाम् अमृतत्वाय कल्पते॥ ६-६०

अवेक्षेत गतीर् नृणां कर्मदोष-समुद्भवाः। निरये च-एव पतनं यातनाश् च यमक्षये॥ ६-६१

विप्रयोगं प्रियैश् च-एव संयोगं च तथा-अप्रियैः। जरया च-अभिभवनं व्याधिभिश् च-उपपीडनं॥ ६-६२

देहाद् उत्क्रमणं च-अष्मात् पुनर् गर्भे च संभवम्। योनिकोटिसहस्रेषु सृतीश् च-अस्य-अन्तरात्मनः॥ ६-६३

अधर्म-प्रभवं च-एव दुःखयोगं शरीरिणाम्। धर्मार्थ-प्रभवं च-एव सुखसंयोगम् अक्षयम्॥ ६-६४

सूक्ष्मतां च-अन्ववेक्षेत योगेन परमात्मनः। देहेषु च समुत्पत्तिम् उत्तमेष्व् अधमेषु च॥ ६-६५

दूषितो अपि चरेद् धर्मं यत्र तत्र-अश्रमे रतः। समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम्॥ ६-६६

फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम्। न नामग्रहणाद् एव तस्य वारि प्रसीदति॥ ६-६७

संरक्षणार्थं जन्तूनां रात्राव् अहनि वा सदा। शरीरस्य-अत्यये च-एव समीक्ष्य वसुधां चरेत्॥ ६-६८

अह्ना रात्र्या च याञ् जन्तून् हिनस्त्यज्ञानतो यतिः। तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान् षड् आचरेत्॥ ६-६९

प्राणायामा ब्राह्मणस्य त्रयो अपि विधिवत् कृताः। व्याहृति-प्रणवैर् युक्ता विज्ञेयं परमं तपः॥ ६-७०

दह्यन्ते ध्मायमानानां धातूनां हि यथा मलाः। तथा-इन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात्॥ ६-७१

प्राणायमैर् दहेद् दोषान् धारणाभिश् च किल्बिषम्। प्रत्याहारेण संसर्गान् ध्यानेन-अन् - ईश्वरान् गुणान्॥ ६-७२

उच्चावचेषु भूतेषु दुर्ज्ञेयाम् अकृत-अत्मभिः। ध्यानयोगेन संपश्येद् गतिम् अस्य-अन्तरात्मनः॥ ६-७३

सम्यग्दर्शनसंपन्नः कर्मभिर् न निबध्यते। दर्शनेन विहीनस् तु संसारं प्रतिपद्यते॥ ६-७४

अहिंसया-इन्द्रिय-अ-सङ्गैर् वैदिकैश् च-एव कर्मभिः। तपसश् चरणैश् च-उग्रैः साधयन्ति-इह तत्पदम्॥ ६-७५

अस्थि-स्थूणं स्नायुयुतं मांस-शोणित-लेपनम्। चर्मावनद्धं दु-र्गन्धि पूर्णं मूत्र-पुरीषयोः।६-७६

जरा-शोकसमाविष्टं रोगायतनम् आतुरम्। रजस्वलम् अनित्यं च भूतावासम् इमं त्यजेत्॥ ६-७७

नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर् यथा। तथा त्यजन्न् इमं देहं कृच्छ्राद् ग्राहाद् विमुच्यते॥ ६-७८

प्रियेषु स्वेषु सुकृतम् अप्रियेषु च दुष्कृतम्। विसृज्य ध्यानयोगेन ब्रह्म-अभ्येति सनातनम्॥ ६-७९

यदा भावेन भवति सर्वभावेषु निःस्पृहः। तदा सुखम् अवाप्नोति प्रेत्य च-इह च शाश्वतम्॥ ६-८०

अनेन विधिना सर्वांस् त्यक्त्वा सङ्गान् - शनैः शनैः। सर्वद्वन्द्वविनिर्मुक्तो ब्रह्मण्येव-अवतिष्ठते॥ ६-८१

ध्यानिकं सर्वम् एव-एतद् यद् एतद् अभिशब्दितम्। न ह्यनध्यात्मवित् कश् चित् क्रियाफलम् उपाश्नुते॥ ६-८२

अधियज्ञं ब्रह्म जपेद् आधिदैविकम् एव च। आध्यात्मिकं च सततं वेदान्ताभिहितं च यत्॥ ६-८३

इदं शरणम् अज्ञानाम् इदम् एव विजानताम्। इदम् अन्विच्छतां स्वर्गम् इदम् आनन्त्यम् इच्छताम्॥ ६-८४

अनेन क्रमयोगेन परिव्रजति यो द्विजः। स विधूय-इह पाप्मानं परं ब्रह्म-अधिगच्छति॥ ६-८५

एष धर्मो अनुशिष्टो वो यतीनां नियत-अत्मनाम्। वेदसंन्यासिकानां तु कर्मयोगं निबोधत॥ ६-८६

ब्रह्मचारी गृहस्थश् च वानप्रस्थो यतिस् तथा। एते गृहस्थ-प्रभवाश् चत्वारः पृथग् आश्रमाः॥ ६-८७

सर्वे अपि क्रमशस् त्व् एते यथाशास्त्रं निषेविताः। यथा-उक्त-कारिणं विप्रं नयन्ति परमां गतिम्॥ ६-८८

सर्वेषाम् अपि च-एतेषां वेद-स्मृतिविधानतः। गृहस्थ उच्यते श्रेष्ठः स त्रीन् एतान् बिभर्ति हि॥ ६-८९

यथा नदी-नदाः सर्वे सागरे यान्ति संस्थितिम्। तथा-एव-अश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम्॥ ६-९०

चतुर्भिर् अपि च-एव-एतैर् नित्यम् आश्रमिभिर् द्विजैः। दश-लक्षणको धर्मः सेवितव्यः प्रयत्नतः॥ ६-९१

धृतिः क्षमा दमो अस्तेयं शौचम् इन्द्रियनिग्रहः। धीर् विद्या सत्यम् अक्रोधो दशकं धर्मलक्षणम्॥ ६-९२

दश लक्षणानि धर्मस्य ये विप्राः समधीयते। अधीत्य च-अनुवर्तन्ते ते यान्ति परमां गतिम्॥ ६-९३

दश-लक्षणकं धर्मम् अनुतिष्ठन् समाहितः। वेदान्तं विधिवत् - श्रुत्वा संन्यसेद् अनृणो द्विजः॥ ६-९४

संन्यस्य सर्वकर्माणि कर्मदोषान् अपानुदन्। नियतो वेदम् अभ्यस्य पुत्रैश्वर्ये सुखं वसेत्॥ ६-९५

एवं संन्यस्य कर्माणि स्वकार्य-परमो अ-स्पृहः। संन्यासेन-अपहत्य-एनः प्राप्नोति परमं गतिम्॥ ६-९६

एष वो अभिहितो धर्मो ब्राह्मणस्य चतु-र्विधः। पुण्यो अक्षय-फलः प्रेत्य राज्ञां धर्मं निबोधत॥ ६-९७

राजधर्मान् प्रवक्ष्यामि यथावृत्तो भवेन् नृपः। संभवश् च यथा तस्य सिद्धिश् च परमा यथा॥ ७-०१

ब्राह्मं प्राप्तेन संस्कारं क्षत्रियेण यथाविधि। सर्वस्य-अस्य यथान्यायं कर्तव्यं परिरक्षणम्॥ ७-०२

अराजके हि लोके अस्मिन् सर्वतो विद्रुतो भयात्। रक्षार्थम् अस्य सर्वस्य राजानम् असृजत् प्रभुः॥ ७-०३

इन्द्र-अनिल-यम-अर्काणाम् अग्नेश् च वरुणस्य च। चन्द्र-वित्तेशयोश् च-एव मात्रा निर्हृत्य शाश्वतीः॥ ७-०४

यस्माद् एषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः। तस्माद् अभिभवत्येष सर्वभूतानि तेजसा॥ ७-०५

तपत्यादित्यवच् च-एष चक्षूंषि च मनांसि च। न च-एनं भुवि शक्नोति कश् चिद् अप्यभिवीक्षितुम्॥ ७-०६

सो अग्निर् भवति वायुश् च सो अर्कः सोमः स धर्मराट्। स कुबेरः स वरुणः स महेन्द्रः प्रभावतः॥ ॥ ७-०७

बालो अपि न-अवमान्तव्यो मनुष्य इति भूमिपः। महती देवता ह्येषा नररूपेण तिष्ठति॥ ७-०८

एकम् एव दहत्यग्निर् नरं दुरुपसर्पिणम्। कुलं दहति राजा-अग्निः स-पशु-द्रव्यसंचयम्॥ ७-०९

कार्यं सो अवेक्ष्य शक्तिं च देश-कालौ च तत्त्वतः। कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः॥ ७-१०

यस्य प्रसादे पद्मा श्रीर् विजयश् च पराक्रमे। मृत्युश् च वसति क्रोधे सर्वतेजोमयो हि सः॥ ७-११

तं यस् तु द्वेष्टि संमोहात् स विनश्यत्यसंशयम्। तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः॥ ७-१२

तस्माद् धर्मं यम् इष्टेषु स व्यवस्येन् नराधिपः। अनिष्टं च-अप्यनिष्टेषु तं धर्मं न विचालयेत्॥ ७-१३

तस्यार्थे सर्वभूतानां गोप्तारं धर्मम् आत्मजम्। ब्रह्मतेजोमयं दण्डम् असृजत् पूर्वम् ईश्वरः॥ ७-१४

तस्य सर्वाणि भूतानि स्थावराणि चराणि च। भयाद् भोगाय कल्पन्ते स्वधर्मात् - न चलन्ति च॥ ७-१५

तं देश-कालौ शक्तिं च विद्यां च-अवेक्ष्य तत्त्वतः। यथार्हतः संप्रणयेन् नरेष्व् अन्याय-वर्तिषु॥ ७-१६

स राजा पुरुषो दण्डः स नेता शासिता च सः। चतुर्णाम् आश्रमाणां च धर्मस्य प्रतिभूः स्मृतः॥ ७-१७

दण्डः शास्ति प्रजाः सर्वा दण्ड एव-अभिरक्षति। दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर् बुधाः॥ ७-१८

समीक्ष्य स धृतः सम्यक् सर्वा रञ्जयति प्रजाः। असमीक्ष्य प्रणीतस् तु विनाशयति सर्वतः॥ ७-१९

यदि न प्रणयेद् राजा दण्डं दण्ड्येष्व् अतन्द्रितः। शूले मत्स्यान् इव-अपक्ष्यन् दुर्बलान् बलवत्तराः॥ ७-२०

अद्यात् काकः पुरोडाशं श्वा च लिह्याद् हविस् तथा। स्वाम्यं च न स्यात् कस्मिंश् चित् प्रवर्तेत-अधर-उत्तरम्॥
७-२१

सर्वो दण्डजितो लोको दुर्लभो हि शुचिर् नरः। दण्डस्य हि भयात् सर्वं जगद् भोगाय कल्पते॥ ७-२२

देव-दानव-गन्धर्वा रक्षांसि पतग-उरगाः। ते अपि भोगाय कल्पन्ते दण्डेन-एव निपीडिताः॥ ७-२३

दुष्येयुः सर्ववर्णाश् च भिद्येरन् सर्वसेतवः। सर्वलोकप्रकोपश् च भवेद् दण्डस्य विभ्रमात्॥ ७-२४

यत्र श्यामो लोहित-अक्षो दण्डश् चरति पापहा। प्रजास् तत्र न मुह्यन्ति नेता चेत् साधु पश्यति॥ ७-२५

तस्य-अहुः संप्रणेतारं राजानं सत्यवादिनम्। समीक्ष्यकारिणं प्राज्ञं धर्म-काम-अर्थ-कोविदम्॥ ७-२६

तं राजा प्रणयन् सम्यक् त्रिवर्गेण-अभिवर्धते। काम-अत्मा विषमः क्षुद्रो दण्डेन-एव निहन्यते॥ ७-२७

दण्डो हि सुमहत् - तेजो दुर्धरश् च-अकृत-अत्मभिः। धर्माद् विचलितं हन्ति नृपम् एव स-बान्धवम्॥ ७-२८

ततो दुर्गं च राष्ट्रं च लोकं च स-चर-अचरम्। अन्तरिक्षगतांश् च-एव मुनीन् देवांश् च पीडयेत्॥ ७-२९

सो असहायेन मूढेन लुब्धेन-अकृत-बुद्धिना। न शक्यो न्यायतो नेतुं सक्तेन विषयेषु च॥ ७-३०

शुचिना सत्यसंधेन यथाशास्त्र-अनुसारिणा। प्रणेतुं शक्यते दण्डः सुसहायेन धीमता॥ ७-३१

स्वराष्ट्रे न्यायवृत्तः स्याद् भृश-दण्डश् च शत्रुषु। सुहृत्स्व् अजिह्मः स्निग्धेषु ब्राह्मणेषु क्षमान्वितः॥ ७-३२

एवंवृत्तस्य नृपतेः शिला-उञ्छेन-अपि जीवतः। विस्तीर्यते यशो लोके तैलबिन्दुर् इव-अम्भसि॥ ७-३३

अतस् तु विपरीतस्य नृपतेर् अजित-अत्मनः। संक्षिप्यते यशो लोके घृतबिन्दुर् इव-अम्भसि॥ ७-३४

स्वे स्वे धर्मे निविष्टानां सर्वेषाम् अनुपूर्वशः। वर्णानाम् आश्रमाणां च राजा सृष्टो अभिरक्षिता॥ ७-३५

तेन यद् यत् स-भृत्येन कर्तव्यं रक्षता प्रजाः। तत् तद् वो अहं प्रवक्ष्यामि यथावद् अनुपूर्वशः॥ ७-३६

ब्राह्मणान् पर्युपासीत प्रातर् उत्थाय पार्थिवः। त्रैविद्यवृद्धान् विदुषस् तिष्ठेत् तेषां च शासने॥ ७-३७

वृद्धांश् च नित्यं सेवेत विप्रान् वेदविदः शुचीन्। वृद्धसेवी हि सततं रक्षोभिर् अपि पूज्यते॥ ७-३८

तेभ्यो अधिगच्छेद् विनयं विनीत-अत्मा-अपि नित्यशः। विनीत-अत्मा हि नृपतिर् न विनश्यति कर्हि चित्॥ ७-३९

बहवो अविनयात् - नष्टा राजानः स-परिच्छदाः। वनस्था अपि राज्यानि विनयात् प्रतिपेदिरे॥ ७-४०

वेनो विनष्टो अविनयात् - नहुषश् च-एव पार्थिवः। सुदाः पैजवनश् च-एव सुमुखो निमिर् एव च॥ ७-४१

पृथुस् तु विनयाद् राज्यं प्राप्तवान् मनुर् एव च। कुबेरश् च धनैश्वर्यं ब्राह्मण्यं च-एव गाधिजः॥ ७-४२

त्रैविद्येभ्यस् त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्। आन्वीक्षिकीं च-अत्मविद्यां वार्तारम्भांश् च लोकतः॥ ७-४३

इन्द्रियाणां जये योगं समातिष्ठेद् दिवा-निशम्। जित-इन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः॥ ७-४४

दश काम-समुत्थानि तथा-अष्टौ क्रोधजानि च। व्यसनानि दु-अन्तानि प्रयत्नेन विवर्जयेत्॥ ७-४५

कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः। वियुज्यते अर्थ-धर्माभ्यां क्रोधजेष्व् आत्मना-एव तु॥ ७-४६

मृगया-अक्षो दिवास्वप्नः परिवादः स्त्रियो मदः। तौर्यत्रिकं वृथाटया च कामजो दशको गणः॥ ७-४७

पैशुन्यं साहसं द्रोह ईर्ष्या-असूया-अर्थदूषणम्। वाग्दण्डजं च पारुष्यं क्रोधजो अपि गणो अष्टकः॥ ७-४८

द्वयोर् अप्येतयोर् मूलं यं सर्वे कवयो विदुः। तं यत्नेन जयेत् - लोभं तज्जाव् एताव् उभौ गणौ॥ ७-४९

पानम् अक्षाः स्त्रियश् च-एव मृगया च यथाक्रमम्। एतत् कष्टतमं विद्यात् - चतुष्कं कामजे गणे॥ ७-५०

दण्डस्य पातनं च-एव वाक्पारुष्य-अर्थदूषणे। क्रोधजे अपि गणे विद्यात् कष्टम् एतत् त्रिकं सदा॥ ७-५१

सप्तकस्य-अस्य वर्गस्य सर्वत्र-एव-अनुषङ्गिणः। पूर्वं पूर्वं गुरुतरं विद्याद् व्यसनम् आत्मवान्।७-५२

व्यसनस्य च मृत्योश् च व्यसनं कष्टम् उच्यते। व्यसन्यधो अधो व्रजति स्वर् यात्यव्यसनी मृतः॥ ७-५३

मौलान् - शास्त्रविदः शूरान् - लब्ध-लक्षान् कुल-उद्भवान्। सचिवान् सप्त च-अष्टौ वा प्रकुर्वीत परीक्षितान्॥ ७-५४

अपि यत् सुकरं कर्म तद् अप्येकेन दुष्करम्। विशेषतो असहायेन किं तु राज्यं महा-उदयम्॥ ७-५५

तैः सार्धं चिन्तयेन् नित्यं सामान्यं संधि-विग्रहम्। स्थानं समुदयं गुप्तिं लब्धप्रशमनानि च॥ ७-५६

तेषां स्वं स्वम् अभिप्रायम् उपलभ्य पृथक् पृथक्। समस्तानां च कार्येषु विदध्याद् हितम् आत्मनः॥ ७-५७

सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता। मन्त्रयेत् परमं मन्त्रं राजा षाड्गुण्यसंयुतम्॥ ७-५८

नित्यं तस्मिन् समाश्वस्तः सर्वकार्याणि निःक्षिपेत् । तेन सार्धं विनिश्चित्य ततः कर्म समारभेत्॥ ७-५९

अन्यान् अपि प्रकुर्वीत शुचीन् प्राज्ञान् अवस्थितान्। सम्यग् अर्थसमाहर्तॄन् अमात्यान् सुपरीक्षितान्॥ ७-६०

निर्वर्तेत-अस्य यावद्भिर् इतिकर्तव्यता नृभिः। तावतो अतन्द्रितान् दक्षान् प्रकुर्वीत विचक्षणान्॥ ७-६१

तेषाम् अर्थे नियुञ्जीत शूरान् दक्षान् कुल-उद्गतान्। शुचीन् आकर-कर्मान्ते भीरून् अन्तर्निवेशने॥ ७-६२

दूतं च-एव प्रकुर्वीत सर्वशास्त्र-विशारदम्। इङ्गित-अकार-चेष्टज्ञं शुचिं दक्षं कुल-उद्गतम्॥ ७-६३

अनुरक्तः शुचिर् दक्षः स्मृतिमान् देश-कालवित्। वपुष्मान् वीतभीर् वाग्मी दूतो राज्ञः प्रशस्यते॥ ७-६४

अमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया। नृपतौ कोश-राष्ट्रे च दूते संधि-विपर्ययौ॥ ७-६५

दूत एव हि संधत्ते भिनत्त्येव च संहतान्। दूतस् तत् कुरुते कर्म भिद्यन्ते येन मानवः॥ ७-६६

स विद्याद् अस्य कृत्येषु निर्गूढ-इङ्गित-चेष्टितैः। आकारम् इङ्गितं चेष्टां भृत्येषु च चिकीर्षितम्॥ ७-६७

बुद्ध्वा च सर्वं तत्त्वेन परराजचिकीर्षितम्। तथा प्रयत्नम् आतिष्ठेद् यथा-अत्मानं न पीडयेत्॥ ७-६८

जाङ्गलं सस्यसंपन्नम् आर्य-प्रायम् अनाविलम्। रम्यम् आनत-सामन्तं स्वाजीव्यं देशम् आवसेत्॥ ७-६९

धन्व-दुर्गं मही-दुर्गम् अब्-दुर्गं वार्क्षम् एव वा। नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम्॥ ७-७०

सर्वेण तु प्रयत्नेन गिरिदुर्गं समाश्रयेत्। एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते॥ ७-७१

त्रिण्याद्यान्याश्रितास् त्व् एषां मृग-गर्ताश्रय-अप्चराः। त्रीण्युत्तराणि क्रमशः प्लवंगम-नर-अमराः॥ ७-७२

यथा दुर्गाश्रितान् एतान् न-उपहिंसन्ति शत्रवः। तथा-अरयो न हिंसन्ति नृपं दुर्गसमाश्रितम्॥ ७-७३

एकः शतं योधयति प्राकारस्थो धनुर्धरः। शतं दशसहस्राणि तस्माद् दुर्गं विधीयते॥ ७-७४

तत् स्याद् आयुधसंपन्नं धन-धान्येन वाहनैः। ब्राह्मणैः शिल्पिभिर् यन्त्रैर् यवसेन-उदकेन च॥ ७-७५

तस्य मध्ये सुपर्याप्तं कारयेद् गृहम् आत्मनः। गुप्तं सर्व-ऋतुकं शुभ्रं जल-वृक्षसमन्वितम्॥ ७-७६

तद् अध्यास्य-उद्वहेद् भार्यां स-वर्णां लक्षणान्विताम्। कुले महति संभूतां हृद्यां रूप-गुणान्वीताम्॥ ७-७७

पुरोहितं च कुर्वीत वृणुयाद् एव च-ऋत्विजः। ते अस्य गृह्याणि कर्माणि कुर्युर् वैतानिकानि च॥ ७-७८

यजेत राजा क्रतुभिर् विविधैर् आप्त-दक्षिणैः। धर्मार्थं च-एव विप्रेभ्यो दद्याद् भोगान् धनानि च॥ ७-७९

सांवत्सरिकम् आप्तैश् च राष्ट्राद् आहारयेद् बलिम्। स्याच् च-अम्नाय-परो लोके वर्तेत पितृवत् - नृषु॥ ७-८०

अध्यक्षान् विविधान् कुर्यात् तत्र तत्र विपश्चितः। ते अस्य सर्वाण्यवेक्षेरन् नृणां कार्याणि कुर्वताम्॥ ७-८१

आवृत्तानां गुरुकुलाद् विप्राणां पूजको भवेत्। नृपाणाम् अक्षयो ह्येष निधिर् ब्राह्मो अभिधीयते॥ ७-८२

न तं स्तेना न च-अमित्रा हरन्ति न च नश्यति। तस्माद् राज्ञा निधातव्यो ब्राह्मणेष्व् अक्षयो निधिः॥ ७-८३

न स्कन्दते न व्यथते न विनश्यति कर्हि चित्। वरिष्ठम् अग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतम्॥ ७-८४

समम् अब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे। प्राधीते शतसाहस्रम् अनन्तं वेदपारगे॥ ७-८५

पात्रस्य हि विशेषेण श्रद्दधानतया-एव च। अल्पं वा बहु वा प्रेत्य दानस्य फलम् अश्नुते॥ ७-८६

सम-उत्तम-अधमै राजा त्व् आहूतः पालयन् प्रजाः। न निवर्तेत संग्रामात् क्षात्रं धर्मम् अनुस्मरन्॥ ७-८७

संग्रामेष्व् अनिवर्तित्वं प्रजानां च-एव पालनम्। शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम्॥ ७-८८

आहवेषु मिथो अन्योन्यं जिघांसन्तो महीक्षितः। युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः॥ ७-८९

न कूटैर् आयुधैर् हन्याद् युध्यमानो रणे रिपून्। न कर्णिभिर् न-अपि दिग्धैर् न-अग्निज्वलित-तेजनैः॥ ७-९०

न च हन्यात् स्थलारूढं न क्लीबं न कृत-अञ्जलिम्। न मुक्त-केशं न-असीनं न तव-अस्मि-इति वादिनम्॥ ७-९१

न सुप्तं न वि-संनाहं न नग्नं न नि-अयुधम्। न-अयुध्यमानं पश्यन्तं न परेण समागतम्॥ ७-९२

न-अयुधव्यसनप्राप्तं न-अर्तं न-अतिपरिक्षतं। न भीतं न परावृत्तं सतां धर्मम् अनुस्मरन्॥ ७-९३

यस् तु भीतः परावृत्तः संग्रामे हन्यते परैः। भर्तुर् यद् दुष्कृतं किं चित् तत् सर्वं प्रतिपद्यते॥ ७-९४

यत् - च-अस्य सुकृतं किं चिद् अमुत्रार्थम् उपार्जितम्। भर्ता तत् सर्वम् आदत्ते परावृत्तहतस्य तु॥ ७-९५

रथ-अश्वं हस्तिनं चत्रं धनं धान्यं पशून् स्त्रियः। सर्वद्रव्याणि कुप्यं च यो यज् जयति तस्य तत्॥ ७-९६

राज्ञश् च दद्युर् उद्धारम् इत्येषा वैदिकी श्रुतिः। राज्ञा च सर्वयोधेभ्यो दातव्यम् अपृथग्जितम्॥ ७-९७

एषो अनुपस्कृतः प्रोक्तो योधधर्मः सनातनः। अस्माद् धर्मान् न च्यवेत क्षत्रियो घ्नन् रणे रिपून्॥ ७-९८

अलब्धं च-एव लिप्सेत लब्धं रक्षेत् प्रयत्नतः। रक्षितं वर्धयेच् च-एव वृद्धं पात्रेषु निक्षिपेत्॥ ७-९९

एतच् चतुर्विधं विद्यात् पुरुषार्थप्रयोजनम्। अस्य नित्यम् अनुष्ठानं सम्यक् कुर्याद् अतन्द्रितः॥ ७-१००

अलब्धम् इच्चेद् दण्डेन लब्धं रक्षेद् अवेक्षया। रक्षितं वर्धयेद् वृद्ध्या वृद्धं पात्रेषु निक्षिपेत्॥ ७-१०१

नित्यम् उद्यत-दण्डः स्यान् नित्यं विवृत-पौरुषः। नित्यं संवृत-संवार्यो नित्यं चिद्रानुसार्यरेः॥ ७-१०२

नित्यम् उद्यत-दण्डस्य कृत्स्नम् उद्विजते जगत्। तस्मात् सर्वाणि भूतानि दण्डेन-एव प्रसाधयेत्॥ ७-१०३

अमायया-एव वर्तेत न कथं चन मायया। बुध्येत-अरिप्रयुक्तां च मायां नित्यं सुसंवृतः॥ ७-१०४

न-अस्य चिद्रं परो विद्याद् विद्यात् - चिद्रं परस्य च। गूहेत् कूर्म इव-अङ्गानि रक्षेद् विवरम् आत्मनः॥ ७-१०५

बकवत् - चिन्तयेद् अर्थान् सिंहवत् - च पराक्रमे। वृकवत् - च-अवलुम्पेत शशवत् - च विनिष्पतेत्॥ ७-१०६

एवम् विजयमानस्य ये अस्य स्युः परिपन्थिनः। तान् आनयेद् वशं सर्वान् सामादिभिर् उपक्रमैः॥ ७-१०७

यदि ते तु न तिष्ठेयुर् उपायैः प्रथमैस् त्रिभिः। दण्डेन-एव प्रसह्य-एतान् - शनकैर् वशम् आनयेत्॥ ७-१०८

साम-अदीनाम् उपायानां चतुर्णाम् अपि पण्डिताः। साम-दण्डौ प्रशंसन्ति नित्यं राष्ट्राभिवृद्धये॥ ७-१०९

७-११० यथा-उद्धरति निर्दाता कक्षं धान्यं च रक्षति। तथा रक्षेन् नृपो राष्ट्रं हन्याच् च परिपन्थिनः॥ ७-११०

मोहाद् राजा स्वराष्ट्रं यः कर्षयत्यनवेक्षया। सो अचिराद् भ्रश्यते राज्यात् - जीवितात् - च स-बान्धवः॥ ७-१११

शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा। तथा राज्ञाम् अपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात्॥ ७-११२

राष्ट्रस्य संग्रहे नित्यं विधानम् इदम् आचरेत्। सुसंगृहीतराष्ट्रे हि पार्थिवः सुखम् एधते॥ ७-११३

द्वयोस् त्रयाणां पञ्चानां मध्ये गुल्मम् अधिष्ठितम्। तथा ग्रामशतानां च कुर्याद् राष्ट्रस्य संग्रहम्॥ ७-११४

ग्रामस्य-अधिपतिं कुर्याद् दशग्रामपतिं तथा। विंशतीशं शत-ईशं च सहस्रपतिम् एव च॥ ७-११५

ग्रामदोषान् समुत्पन्नान् ग्रामिकः शनकैः स्वयम्। शंसेद् ग्रामदश-ईशाय दश-ईशो विंशतीशिने॥ ७-११६

विंशतीशस् तु तत् सर्वं शत-ईशाय निवेदयेत्। शंसेद् ग्रामशत-ईशस् तु सहस्रपतये स्वयम्॥ ७-११७

यानि राजप्रदेयानि प्रत्यहं ग्रामवासिभिः। अन्न-पान-इन्धनादीनि ग्रामिकस् तान्यवाप्नुयात्॥ ७-११८

दशी कुलं तु भुञ्जीत विंशी पञ्च कुलानि च। ग्रामं ग्रामशताध्यक्षः सहस्राधिपतिः पुरम्॥ ७-११९

तेषां ग्राम्याणि कार्यानि पृथक्कार्याणि च-एव हि। राज्ञो अन्यः सचिवः स्निग्धस् तानि पश्येद् अतन्द्रितः॥ ७-१२०

नगरे नगरे च-एकं कुर्यात् सर्वार्थचिन्तकम्। उच्चैःस्थानं घोररूपं नक्षत्राणाम् इव ग्रहम्॥ ७-१२१

स तान् अनुपरिक्रामेत् सर्वान् एव सदा स्वयम्। तेषां वृत्तं परिणयेत् सम्यग् राष्ट्रेषु तद् - चरैः॥ ७-१२२

राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः। भृत्या भवन्ति प्रायेण तेभ्यो रक्षेद् इमाः प्रजाः॥ ७-१२३

ये कार्यिकेभ्यो अर्थम् एव गृह्णीयुः पापचेतसः। तेषां सर्वस्वम् आदाय राजा कुर्यात् प्रवासनम्॥ ७-१२४

राजा कर्मसु युक्तानां स्त्रीणां प्रेष्यजनस्य च। प्रत्यहं कल्पयेद् वृत्तिं स्थानं कर्मानुरूपतः॥ ७-१२५

पणो देयो अवकृष्टस्य षड् उत्कृष्टस्य वेतनम्। षाण्मासिकस् तथा-अच्छादो धान्यद्रोणस् तु मासिकः॥ ७-१२६

क्रय-विक्रयम् अध्वानं भक्तं च स-परिव्ययम्। योगक्षेमं च संप्रेक्ष्य वणिजो दापयेत् करान्॥ ७-१२७

यथा फलेन युज्येत राजा कर्ता च कर्मणाम्। तथा-अवेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं करान्॥ ७-१२८

यथा-अल्पाल्पम् अदन्त्याद्यं वार्योको-वत्स-षट्पदाः। तथा-अल्पाल्पो ग्रहीतव्यो राष्ट्राद् राज्ञाब्दिकः करः॥ ७-१२९

पञ्चाशद्भाग आदेयो राज्ञा पशु-हिरण्ययोः। धान्यानाम् अष्टमो भागः षष्ठो द्वादश एव वा॥ ७-१३०

आददीत-अथ षड्भागं द्रु-मांस-मधु-सर्पिषाम्। गन्ध-ओषधि-रसानां च पुष्प-मूल-फलस्य च॥ ७-१३१

पत्र-शाक-तृणानां च चर्मणां वैदलस्य च। मृन्मयानां च भाण्डानां सर्वस्य-अश्ममयस्य च॥ ७-१३२

म्रियमाणो अप्याददीत न राजा श्रोत्रियात् करम्। न च क्षुधा-अस्य संसीदेत् - श्रोत्रियो विषये वसन्॥ ७-१३३

यस्य राज्ञस् तु विषये श्रोत्रियः सीदति क्षुधा। तस्य-अपि तत् क्षुधा राष्ट्रम् अचिरेन-एव सीदति॥ ७-१३४

श्रुत-वृत्ते विदित्वा-अस्य वृत्तिं धर्म्यां प्रकल्पयेत्। संरक्षेत् सर्वतश् च-एनं पिता पुत्रम् इव-अरसम्॥ ७-१३५

संरक्ष्यमाणो राज्ञा यं कुरुते धर्मम् अन्वहम्। तेन-अयुर् वर्धते राज्ञो द्रविणं राष्ट्रम् एव च॥ ७-१३६

यत् किं चिद् अपि वर्षस्य दापयेत् करसंज्ञितम्। व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम्॥ ७-१३७

कारुकान् - शिल्पिनश् च-एव शूद्रांस् चात्म-उपजीविनः। एकैकं कारयेत् कर्म मासि मासि महीपतिः॥ ७-१३८

न-उच्चिन्द्याद् आत्मनो मूलं परेषां च-अतितृष्णया। उच्चिन्दन् ह्यात्मनो मूलम् आट्मानं तांश् च पीदयेत्॥ ७-१३९

तीक्ष्णश् च-एव मृदुश् च स्यात् कार्यं वीक्ष्य महीपतिः। तीक्ष्णश् च-एव मृदुश् च-एव राज भवति सम्मतः॥ ७-१४०

अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुल-उद्गतम्। स्थापयेद् आसने तस्मिन् खिन्नः कार्य-ईक्षणे नृणाम्॥ ७-१४१

एवं सर्वं विधाय-इदम् इतिकर्तव्यम् आत्मनः। युक्तश् च-एव-अप्रमत्तश् च परिरक्षेद् इमाः प्रजाः॥ ७-१४२

विक्रोशन्त्यो यस्य राष्ट्राद् ह्रियन्ते दस्युभिः प्रजाः। संपश्यतः स-भृत्यस्य मृतः स न तु जीवति॥ ७-१४३

क्षत्रियस्य परो धर्मः प्राजानाम् एव पालनम्। निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते॥ ७-१४४

उत्थाय पश्चिमे यामे कृत-शौचः समाहितः। हुताग्निर् ब्राह्मणांश् चार्च्य प्रविशेत् स शुभां सभाम्॥ ७-१४५

तत्र स्थितः प्रजाः सर्वाः प्रतिनन्द्य विसर्जयेत्। विसृज्य च प्रजाः सर्वा मन्त्रयेत् सह मन्त्रिभिः॥ ७-१४६

गिरिपृष्ठं समारुह्य प्रसादं वा रहोगतः। अरण्ये निः-शलाके वा मन्त्रयेद् अविभावितः॥ ७-१४७

यस्य मन्त्रं न जानन्ति समागम्य पृथग्जनाः। स कृत्स्नां पृथिवीं भुङ्क्ते कोशहीनो अपि पार्थिवः॥ ७-१४८

जड-मूक-अन्ध-बधिरांस् तैर्यग्योनान् वयो-अतिगान्। स्त्री-म्लेच्च-व्याधित-व्यङ्गान् मन्त्रकाले अपसारयेत्॥ ७-१४९

भिन्दन्त्यवमता मन्त्रं तैर्यग्योनास् तथा-एव च। स्त्रियश् च-एव विशेषेण तस्मात् तत्राद्दतो भवेत्॥ ७-१५०

मध्यंदिने अर्धरात्रे वा विश्रान्तो विगतक्लमः। चिन्तयेद् धर्म-काम-अर्थान् सार्धं तैर् एक एव वा॥ ७-१५१

परस्परविरुद्धानां तेषां च समुपार्जनम्। कन्यानां संप्रदानं च कुमाराणां च रक्षणं॥ ७-१५२

दूतसंप्रेषणं च-एव कार्यशेषं तथा-एव च। अन्तःपुरप्रचारं च प्रणिधीनां च चेष्टितम्॥ ७-१५३

कृत्स्नं च-अष्टविधं कर्म पञ्चवर्गं च तत्त्वतः। अनुराग-अपरागौ च प्रचारं मण्डलस्य च॥ ७-१५४

मध्यमस्य प्रचारं च विजीगिषोश् च चेष्टितम्। उदासीनप्रचारं च शत्रोश् च-एव प्रयत्नतः॥ ७-१५५

एताः प्रकृतयो मूलं मण्डलस्य समासतः। अष्टौ च-अन्याः समाख्याता द्वादश-एव तु ताः स्मृताः॥ ७-१५६

अमात्य-राष्ट्र-दुर्ग-अर्थ-दण्डाख्याः पञ्च च-अपराः। प्रत्येकं कथिता ह्येताः संक्षेपेण द्विसप्ततिः॥ ७-१५७

अनन्तरम् अरिं विद्याद् अरिसेविनम् एव च। अरेर् अनन्तरं मित्रम् उदासीनं तयोः परम्॥ ७-१५८

तान् सर्वान् अभिसंदध्यात् सामादिभिर् उपक्रमैः। व्यस्तैश् च-एव समस्तैश् च पौरुषेण नयेन च॥ ७-१५९

संधिं च विग्रहं च-एव यानम् आसनम् एव च। द्वैधीभावं संश्रयं च षड्गुणांश् चिन्तयेत् सदा॥ ७-१६०

आसनं च-एव यानं च संधिं विग्रहम् एव च। कार्यं वीक्ष्य प्रयुञ्जीत द्वैधं संश्रयम् एव च॥ ७-१६१

संधिं तु द्विविधं विद्याद् राजा विग्रहम् एव च। उभे यान-असने च-एव द्विविधः संश्रयः स्मृतः॥ ७-१६२

समान-यानकर्मा च विपरीतस् तथा-एव च। तदा त्व् आयतिसंयुक्तः संधिर् ज्ञेयो द्विलक्षणः॥ ७-१६३

स्वयंकृतश् च कार्यार्थम् अकाले काल एव वा। मित्रस्य च-एव-अपकृते द्विविधो विग्रहः स्मृतः॥ ७-१६४

एकाकिनश् च-अत्ययिके कार्ये प्राप्ते यदृच्छया। संहतस्य च मित्रेण द्विविधं यानम् उच्यते॥ ७-१६५

क्षीणस्य च-एव क्रमशो दैवात् पूर्वकृतेन वा। मित्रस्य च-अनुरोधेन द्विविधं स्मृतम् आसनम्॥ ७-१६६

बलस्य स्वामिनश् च-एव स्थितिः कार्यार्थसिद्धये। द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः॥ ७-१६७

अर्थसंपादनार्थं च पीड्यमानस्य शत्रुभिः। साधुषु व्यपदेशश् च द्विविधः संश्रयः स्मृतः॥ ७-१६८

यदा-अवगच्छेद् आयत्याम् आधिक्यं ध्रुवम् आत्मनः। तदात्वे च-अल्पिकां पीडां तदा संधिं समाश्रयेत्॥ ७-१६९

यदा प्रहृष्टा मन्येत सर्वास् तु प्रकृतीर् भृशम्। अत्युच्छ्रितं तथात्मानं तदा कुर्वीत विग्रहम्॥ ७-१७०

यदा मन्येत भावेन हृष्टं पुष्टं बलं स्वकम्। परस्य विपरीतं च तदा यायाद् रिपुं प्रति॥ ७-१७१

यदा तु स्यात् परिक्षीणो वाहनेन बलेन च। तदासीत प्रयत्नेन शनकैः सान्त्वयन्न् अरीन्॥ ७-१७२

मन्येत-अरिं यदा राजा सर्वथा बलवत्तरम्। तदा द्विधा बलं कृत्वा साधयेत् कार्यम् आत्मनः॥ ७-१७३

यदा परबलानां तु गमनीयतमो भवेत्। तदा तु संश्रयेत् क्षिप्रं धार्मिकं बलिनं नृपम्॥ ७-१७४

निग्रहं प्रकृतीनां च कुर्याद् यो अरिबलस्य च। उपसेवेत तं नित्यं सर्वयत्नैर् गुरुं यथा॥ ७-१७५

यदि तत्र-अपि संपश्येद् दोषं संश्रयकारितम्। सुयुद्धम् एव तत्र-अपि निर्विशङ्कः समाचरेत्॥ ७-१७६

सर्व-उपायैस् तथा कुर्यान् नीतिज्ञः पृथिवीपतिः। यथा-अस्य-अभ्यधिका न स्युर् मित्र-उदासीन-शत्रवः॥ ७-१७७

आयतिं सर्वकार्याणां तदात्वं च विचारयेत्। अतीतानां च सर्वेषां गुण-दोषौ च तत्त्वतः॥ ७-१७८

आयत्यां गुण-दोषज्ञस् तदात्वे क्षिप्र-निश्चयः। अतीते कार्यशेषज्ञः शत्रुभिर् न-अभिभूयते॥ ७-१७९

यथा-एनं न-अभिसंदध्युर् मित्र-उदासीन-शत्रवः। तथा सर्वं संविदध्याद् एष सामासिको नयः॥ ७-१८०

तदा तु यानम् आतिष्ठेद् अरिराष्ट्रं प्रति प्रभुः। तदानेन विधानेन यायाद् अरिपुरं शनैः॥ ७-१८१

मार्गशीर्षे शुभे मासि यायाद् यात्रां महीपतिः। फाल्गुनं वाथ चैत्रं वा मासौ प्रति यथाबलम्॥ ७-१८२

अन्येष्व् अपि तु कालेषु यदा पश्येद् ध्रुवं जयम्। तदा यायाद् विगृह्य-एव व्यसने च-उत्थिते रिपोः॥ ७-१८३

कृत्वा विधानं मूले तु यात्रिकं च यथाविधि। उपगृह्य-अस्पदं च-एव चारान् सम्यग् विधाय च॥ ७-१८४

संशोध्य त्रिविधं मार्गं षड्विधं च बलं स्वकम्। सांपरायिककल्पेन यायाद् अरिपुरं प्रति॥ ७-१८५

शत्रुसेविनि मित्रे च गूढे युक्ततरो भवेत्। गत-प्रत्यागते च-एव स हि कष्टतरो रिपुः॥ ७-१८६

दण्डव्यूहेन तन् मार्गं यायात् तु शकटेन वा। वराह-मकराभ्यां वा सूच्या वा गरुडेन वा॥ ७-१८७

यतश् च भयम् आशङ्केत् ततो विस्तारयेद् बलम्। पद्मेन च-एव व्यूहेन निविशेत सदा स्वयम्॥ ७-१८८

सेनापति-बलाध्यक्षौ सर्वदिक्षु निवेशयेत्। यतश् च भयम् आशङ्केत् प्राचीं तां कल्पयेद् दिशम्॥ ७-१८९

गुल्मांश् च स्थापयेद् आप्तान् कृतसंज्ञान् समन्ततः। स्थाने युद्धे च कुशलान् अभीरून् अविकारिणः॥ ७-१९०

संहतान् योधयेद् अल्पान् कामं विस्तारयेद् बहून्। सूच्या वज्रेण च-एव-एतान् व्यूहेन व्यूह्य योधयेत्॥ ७-१९१

स्यन्दन-अश्वैः समे युध्येद् अनूपे नौ द्विपैस् तथा। वृक्ष-गुल्मावृते चापैर् असि-चर्म-अयुधैः स्थले॥ ७-१९२

कुरुक्षेत्रांश् च मत्स्यांश् च पञ्चालान् - शूरसेनजान्। दीर्घांल् लघूंश् च-एव नरान् अग्रानीकेषु योजयेत्॥ ७-१९३

प्रहर्षयेद् बलं व्यूह्य तांश् च सम्यक् परीक्षयेत्। चेष्टाश् च-एव विजानीयाद् अरीन् योधयताम् अपि॥ ७-१९४

उपरुध्य-अरिम् आसीत राष्ट्रं चास्य-उपपीडयेत्। दूषयेच् चास्य सततं यवस-अन्न-उदक-इन्धनम्॥ ७-१९५

भिन्द्याच् च-एव तडागानि प्राकार-परिखास् तथा। समवस्कन्दयेच् च-एनं रात्रौ वित्रासयेत् तथा॥ ७-१९६

उपजप्यान् उपजपेद् बुध्येत-एव च तत्कृतम्। युक्ते च दैवे युध्येत जयप्रेप्सुर् अपेतभीः॥ ७-१९७

साम्ना दानेन भेदेन समस्तैर् अथ वा पृथक् । विजेतुं प्रयतेत-अरीन् न युद्धेन कदा चन ॥ ७-१९८

अनित्यो विजयो यस्माद् दृश्यते युध्यमानयोः । पराजयश् च संग्रामे तस्माद् युद्धं विवर्जयेत् ॥ ७-१९९

त्रयाणाम् अप्युपायानां पूर्व-उक्तानाम् असंभवे । तथा युध्येत संपन्नो विजयेत रिपून् यथा ॥ ७-२००

जित्वा संपूजयेद् देवान् ब्राह्मणांश् च-एव धार्मिकान् । प्रदद्यात् परिहारार्थं ख्यापयेद् अभयानि च ॥ ७-२०१

सर्वेषां तु विदित्वा-एषां समासेन चिकीर्षितम् । स्थापयेत् तत्र तद्वंश्यं कुर्याच् च समयक्रियाम् ॥ ७-२०२

प्रमाणानि च कुर्वीत तेषां धर्मान् यथा-उदितान् । रत्नैश् च पूजयेद् एनं प्रधानपुरुषैः सह ॥ ७-२०३

आदानम् अप्रियकरं दानं च प्रियकारकम् । अभीप्सितानाम् अर्थानां काले युक्तं ॥ ७-२०४

सर्वं कर्म-इदम् आयत्तं विधाने दैव-मानुषे । तयोर् दैवम् अचिन्त्यं तु मानुषे विद्यते क्रिया ॥ ७-२०५

सह वा-अपि व्रजेद् युक्तः संधिं कृत्वा प्रयत्नतः । मित्रं हिरण्यं भूमिं वा संपश्यंस् त्रिविधं फलम् ॥ ७-२०६

पार्ष्णिग्राहं च संप्रेक्ष्य तथाक्रन्दं च मण्डले । मित्राद् अथ-अप्यमित्राद् वा यात्राफलम् अवाप्नुयात् ॥ ७-२०७

हिरण्य-भूमिसंप्राप्त्या पार्थिवो न तथ-एधते । यथा मित्रं ध्रुवं लब्ध्वा कृशम् अप्यायतिक्षमम् ॥ ७-२०८

धर्मज्ञं च कृतज्ञं च तुष्टप्रकृतिम् एव च । अनुरक्तं स्थिरारम्भं लघुमित्रं प्रशस्यते ॥ ७-२०९

प्राज्ञं कुलीनं शूरं च दक्षं दातारम् एव च । कृतज्ञं धृतिमन्तं च कष्टम् आहुर् अरिं बुधाः ॥ ७-२१०

आर्यता पुरुषज्ञानं शौर्यं करुणवेदिता । स्थौललक्ष्यं च सततम् उदासीनगुण-उदयः ॥ ७-२११

क्सेम्यां सस्यप्रदां नित्यं पशुवृद्धिकरीम् अपि । परित्यजेन् नृपो भूमिम् आत्मार्थम् अविचारयन् ॥ ७-२१२

आपदर्थं धनं रक्षेद् दारान् रक्षेद् धनैर् अपि । आत्मानं सततं रक्षेद् दारैर् अपि धनैर् अपि ॥ ७-२१३

सह सर्वाः समुत्पन्नाः प्रसमीक्ष्य-अपदो भृशम् । संयुक्तांश् च वियुक्तांश् च सर्व-उपायान् सृजेद् बुधः ॥ ७-२१४

उपेतारम् उपेयं च सर्व-उपायांश् च कृत्स्नशः । एतत् त्रयं समाश्रित्य प्रयतेत-अर्थसिद्धये ॥ ७-२१५

एवं सर्वम् इदं राजा सह सम्मन्त्र्य मन्त्रिभिः । व्यायम्य-अप्लुत्य मध्याह्ने भोक्तुम् अन्तःपुरं विशेत् ॥ ७-२१६

तत्र-अत्मभूतैः कालज्ञैर् अहार्यैः परिचारकैः । सुपरीक्षितम् अन्नाद्यम् अद्यान् मन्त्रैर् विषापहैः ॥ ७-२१७

विषघ्नैर् अगदैश् च-अस्य सर्वद्रव्याणि योजयेत् । विषघ्नानि च रत्नानि नियतो धारयेत् सदा ॥ ७-२१८

परीक्षिताः स्त्रियश् च-एनं व्यजन-उदक-धूपनैः । वेषाभरणसंशुद्धाः स्पृशेयुः सुसमाहिताः ॥ ७-२१९

एवं प्रयत्नं कुर्वीत यान-शय्या-असन-अशने। स्नाने प्रसाधने च-एव सर्वालङ्कारकेषु च ॥ ७-२२०

भुक्तवान् विहरेच् च-एव स्त्रीभिर् अन्तःपुरे सह। विहृत्य तु यथाकालं पुनः कार्याणि चिन्तयेत्॥ ७-२२१

अलंकृतश् च संपश्येद् आयुधीयं पुनर् जनम्। वाहनानि च सर्वाणि शस्त्राण्याभरणानि च ॥ ७-२२२

संध्यां च-उपास्य शृणुयाद् अन्तर्वेश्मनि शस्त्रभृत्। रहस्य-अख्यायिनां च-एव प्रणिधीनां च चेष्टितम्॥ ७-२२३

गत्वा कक्षान्तरं त्व् अन्यत् समनुज्ञाप्य तं जनम्। प्रविशेद् भोजनार्थं च स्त्रीवृतो अन्तःपुरं पुनः॥ ७-२२४

तत्र भुक्त्वा पुनः किं चित् तूर्यघोषैः प्रहर्षितः। संविशेत् तं यथाकालम् उत्तिष्ठेच् च गतक्लमः॥ ७-२५५

एतद्विधानम् आतिष्ठेद् अरोगः पृथिवीपतिः। अस्वस्थः सर्वम् एतत् तु भृत्येषु विनियोजयेत्॥ ७-२२६

व्यवहारान् दिदृक्षुस् तु ब्राह्मणैः सह पार्थिवः। मन्त्रज्ञैर् मन्त्रिभिश् च-एव विनीतः प्रविशेत् सभाम्॥ ८-०१

तत्र-असीनः स्थितो वा-अपि पाणिम् उद्यम्य दक्षिणम्। विनीत-वेष-अभरणः पश्येत् कार्याणि कार्यिणाम्॥ ८-०२

प्रत्यहं देशदृष्टैश् च शास्त्रदृष्टैश् च हेतुभिः। अष्टादशसु मार्गेषु निबद्धानि पृथक् पृथक्॥ ८-०३

तेषाम् आद्यम् ऋणादानं निक्षेपो अस्वामिविक्रयः। संभूय च समुत्थानं दत्तस्य-अनपकर्म च।८-०४

वेतनस्य-एव चादानं संविदश् च व्यतिक्रमः। क्रय-विक्रयानुशयो विवादः स्वामि-पालयोः॥ ८-०५

सीमाविवादधर्मश् च पारुष्ये दण्डवाचिके। स्तेयं च साहसं च-एव स्त्रीसंग्रहणम् एव च ॥ ८-०६

स्त्री-पुंधर्मो विभागश् च द्यूतम् आह्वय एव च। पदान्यष्टादश-एतानि व्यवहारस्थिताव् इह ॥ ८-०७

एषु स्थानेषु भूयिष्ठं विवादं चरतां नृणाम्। धर्मं शाश्वतम् आश्रित्य कुर्यात् कार्यविनिर्णयम्॥ ८-०८

यदा स्वयं न कुर्यात् तु नृपतिः कार्यदर्शनम्। तदा नियुञ्ज्याद् विद्वांसं ब्राह्मणं कार्यदर्शने॥ ८-०९

सो अस्य कार्याणि संपश्येत् सभ्यैर् एव त्रिभिर् वृतः। सभाम् एव प्रविश्य-अग्र्याम् आसीनः स्थित एव वा॥ ८-१०

यस्मिन् देशे निषीदन्ति विप्रा वेदविदस् त्रयः। राज्ञश् च-अधिकृतो विद्वान् ब्रह्मणस् तां सभां विदुः॥ ८-११

धर्मो विद्धस् त्व् अधर्मेण सभां यत्र-उपतिष्ठते। शल्यं च-अस्य न कृन्तन्ति विद्धास् तत्र सभासदः॥ ८-१२

सभां वा न प्रवेष्टव्यं वक्तव्यं वा समञ्जसम्। अब्रुवन् विब्रुवन् वा-अपि नरो भवति किल्बिषी॥ ८-१३

यत्र धर्मो ह्यधर्मेण सत्यं यत्र-अनृतेन च। हन्यते प्रेक्षमाणानां हतास् तत्र सभासदः॥ ८-१४

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः। तस्माद् धर्मो न हन्तव्यो मा नो धर्मो हतो वधीत्॥ ८-१५

वृषो हि भगवान् धर्मस् तस्य यः कुरुते ह्यलम्। वृषलं तं विदुर् देवास् तस्माद् धर्मं न लोपयेत्॥ ८-१६

एक एव सुहृद् धर्मो निधाने अप्यनुयाति यः। शरीरेण समं नाशं सर्वम् अन्यद् हि गच्चति॥ ८-१७

पादो अधर्मस्य कर्तारं पादः साक्षिणम् ऋच्चति। पादः सभासदः सर्वान् पादो राजानम् ऋच्चति॥ ८-१८

राजा भवत्यनेनास् तु मुच्यन्ते च सभासदः। एनो गच्चति कर्तारं निन्दा-अर्हो यत्र निन्द्यते॥ ८-१९

जातिमात्र-उपजीवी वा कामं स्याद् ब्राह्मणब्रुवः। धर्मप्रवक्ता नृपतेर् न शूद्रः कथं चन॥ ८-२०

यस्य शूद्रस् तु कुरुते राज्ञो धर्मविवेचनम्। तस्य सीदति तद् राष्ट्रं पङ्के गौर् इव पश्यतः॥ ८-२१

यद् राष्ट्रं शूद्र-भूयिष्ठं नास्तिकाक्रान्तम् अद्विजम्। विनश्यत्याशु तत् कृत्स्नं दुर्भिक्ष-व्याधिपीडितम्॥ ८-२२

धर्मासनम् अधिष्ठाय संवीत-अङ्गः समाहितः। प्रणम्य लोकपालेभ्यः कार्यदर्शनम् आरभेत्॥ ८-२३

अर्थ-अनर्थाव् उभौ बुद्ध्वा धर्म-अधर्मौ च केवलौ। वर्णक्रमेण सर्वाणि पश्येत् कार्याणि कार्यिणाम्॥ ८-२४

बाह्यैर् विभावयेत् - लिङ्गैर् भावम् अन्तर्गतं नृणाम्। स्वर-वर्ण-इङ्गित-अकारैश् चक्षुषा चेष्टितेन च॥ ८-२५

आकारैर् इङ्गितैर् गत्या चेष्टया भाषितेन च। नेत्र-वक्त्रविकारैश् च गृह्यते अन्तर्गतं मनः॥ ८-२६

बालदाय-अदिकं रिक्थं तावद् राजा-अनुपालयेत्। यावत् स स्यात् समावृत्तो यावत् - च-अतीत-शैशवः ॥ ८-२७

वशा-अपुत्रासु च-एवं स्याद् रक्षणं निष्-कुलासु च। पति-व्रतासु च स्त्रीषु विधवास्व् आतुरासु च॥ ८-२८

जीवन्तीनां तु तासां ये तद् हरेयुः स्वबान्धवाः। तान् - शिष्यात् - चौरदण्डेन धार्मिकः पृथिवीपतिः॥ ८-२९

प्रणष्ट-स्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत्। अर्वाक् त्र्यब्दाद् हरेत् स्वामी परेण नृपतिर् हरेत्॥ ८-३०

मम-इदम् इति यो ब्रूयात् सो अनुयोज्यो यथाविधि। संवाद्य रूप-संख्यादीन् स्वामी तद् द्रव्यम् अर्हति॥ ८-३१

अवेदयानो नष्टस्य देशं कालं च तत्त्वतः। वर्णं रूपं प्रमाणं च तत्समं दण्डम् अर्हति॥ ८-३२

आददीत-अथ षड्भागं प्रनष्ट-अधिगतान् नृपः। दशमं द्वादशं वा-अपि सतां धर्मम् अनुस्मरन्॥ ८-३३

प्रनष्ट-अधिगतं द्रव्यं तिष्ठेद् युक्तैर् अधिष्ठितम्। यांस् तत्र चौरान् गृह्णीयात् तान् राजा-इभेन घातयेत्॥ ८-३४

ममायम् इति यो ब्रूयान् निधिं सत्येन मानवः। तस्याददीत षड्भागं राजा द्वादशम् एव वा॥ ८-३५

अनृतं तु वदन् दण्ड्यः स्ववित्तस्य-अंशम् अष्टमम्। तस्य-एव वा निधानस्य संख्यया-अल्पीयसीं कलाम्॥ ८-३६

विद्वांस् तु ब्राह्मणो दृष्ट्वा पूर्व-उपनिहितं निधिम्। अशेषतो अप्याददीत सर्वस्य-अधिपतिर् हि सः॥ ८-३८

यं तु पश्येन् निधिं राजा पुराणं निहितं क्षितौ। तस्माद् द्विजेभ्यो दत्त्वा-अर्धम् अर्धं कोशे प्रवेशयेत्॥ ८-३८

निधीनां तु पुराणानां धातूनाम् एव च क्षितौ। अर्धभाग् रक्षणाद् राजा भूमेर् अधिपतिर् हि सः॥ ८-३९

दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर् हृतं धनम्। राजा तद् उपयुञ्जानश् चौरस्य-अप्नोति किल्बिषम्॥ ८-४०

जाति-जानपदान् धर्मान् श्रेणीधर्मांश् च धर्मवित्। समीक्ष्य कुलधर्मांश् च स्वधर्मं प्रतिपादयेत्॥ ८-४१

स्वानि कर्माणि कुर्वाणा दूरे सन्तो अपि मानवाः। प्रिया भवन्ति लोकस्य स्वे स्वे कर्मण्यवस्थिताः॥ ८-४२

न-उत्पादयेत् स्वयं कार्यं राजा न-अप्यस्य पुरुषः। न च प्रापितम् अन्येन ग्रसेद् अर्थं कथं चन॥ ८-४३

यथा नयत्यसृक्पातैर् मृगस्य मृगयुः पदम्। नयेत् तथा-अनुमानेन धर्मस्य नृपतिः पदम्॥ ८-४४

सत्यम् अर्थं च संपश्येद् आत्मानम् अथ साक्षिणः। देशं रूपं च कालं च व्यवहारविधौ स्थितः॥ ८-४५

सद्भिर् आचरितं यत् स्याद् धार्मिकैश् च द्विजातिभिः। तद् देश-कुल-जातीनाम् अविरुद्धं प्रकल्पयेत्॥ ८-४६

अधमर्णार्थसिद्ध्यर्थम् उत्तमर्णेन चोदितः। दापयेद् धनिकस्य-अर्थम् अधमर्णाद् विभावितम्॥ ८-४७

यैर् यैर् उपायैर् अर्थं स्वं प्राप्नुयाद् उत्तमर्णिकः। तैर् तैर् उपायैः संगृह्य दापयेद् अधमर्णिकम्॥ ८-४८

धर्मेण व्यवहारेण चलेन-अचरितेन च। प्रयुक्तं साधयेद् अर्थं पञ्चमेन बलेन च॥ ८-४९

यः स्वयं साधयेद् अर्थम् उत्तमर्णो अधमर्णिकात्। न स राज्ञा-अभियोक्तव्यः स्वकं संसाधयन् धनम्॥ ८-५०

अर्थे अपव्ययमानं तु करणेन विभावितम्। दापयेद् धनिकस्य-अर्थं दण्डलेशं च शक्तितः॥ ८-५१

अपह्नवे अधमर्णस्य देहि-इत्युक्तस्य संसदि। अभियोक्ता दिशेद् देश्यं करणं वा-अन्यद् उद्दिशेत्॥ ८-५२

अदेश्यं यश् च दिशति निर्दिश्य-अपह्नुते च यः। यश् च-अधर-उत्तरान् अर्थान् विगीतान् न-अवबुध्यते॥ ८-५३

अपदिश्य-अपदेश्यं च पुनर् यस् त्व् अपधावति। सम्यक् प्रणिहितं च-अर्थं पृष्टः सन् न-अभिनन्दति॥ ८-५४

असंभाष्ये साक्षिभिश् च देशे संभाषते मिथः। निरुच्यमानं प्रश्नं च न-इच्छेद् यश् च-अपि निष्पतेत्॥ ८-५५

ब्रूहि-इत्युक्तश् च न ब्रूयाद् उक्तं च न विभावयेत्। न च पूर्व-अपरं विद्यात् तस्माद् अर्थात् स हीयते॥ ८-५६

साक्षिणः सन्ति मेत्युक्त्वा दिश-इत्युक्तो दिशेन् न यः। धर्मस्थः कारणैर् एतैर् हीनं तम् अपि निर्दिशेत्॥ ८-५७

अभियोक्ता न चेद् ब्रूयाद् बध्यो दण्ड्यश् च धर्मतः। न चेत् त्रिपक्षात् प्रब्रूयाद् धर्मं प्रति पराजितः॥ ८-५८

यो यावत् - निह्नुवीत-अर्थं मिथ्या यावति वा वदेत्। तौ नृपेण ह्यधर्मज्ञौ दाप्यो तद्द्विगुणं दमम्॥ ८-५९

पृष्टो अपव्ययमानस् तु कृत-अवस्थो धन-एषिणा । त्र्यवरैः साक्षिभिर् भाव्यो नृप-ब्राह्मणसंनिधौ ॥ ८-६०

यादृशा धनिभिः कार्या व्यवहारेषु साक्षिणः । तादृशान् संप्रवक्ष्यामि यथा वाच्यम् ऋतं च तैः ॥ ८-६१

गृहिणः पुत्रिणो मौलाः क्षत्र-विश्-शूद्र-योनयः । अर्थ्युक्ताः साक्ष्यम् अर्हन्ति न ये के चिद् अनापदि ॥ ८-६२

आप्ताः सर्वेषु वर्णेषु कार्याः कार्येषु साक्षिणः । सर्वधर्मविदो अलुब्धा विपरीतांस् तु वर्जयेत् ॥ ८-६३

न-अर्थसंबन्धिनो न-अप्ता न सहाया न वैरिणः । न दृष्टदोषाः कर्तव्या न व्याध्यार्ता न दूषिताः ॥ ८-६४

न साक्षी नृपतिः कार्यो न कारुक-कुशीलवौ । न श्रोत्रियो न लिङ्गस्थो न सङ्गेभ्यो विनिर्गतः ॥ ८-६५

न-अध्यधीनो न वक्तव्यो न दस्युर् न विकर्मकृत् । न वृद्धो न शिशुर् न-एको न-अन्त्यो न विकल-इन्द्रियः ॥ ८-६६

न-अर्तो न मत्तो न-उन्मत्तो न क्षुत् - तृष्णा-उपपीडितः । न श्रमार्तो न कामार्तो न क्रुद्धो न-अपि तस्करः ॥ ८-६७

स्त्रीणां साक्ष्यं स्त्रियः कुर्युर् द्विजानां सदृशा द्विजाः । शूद्राश् च सन्तः शूद्राणाम्  अन्त्यानाम् अन्त्य-योनयः ॥ ८-६८

अनुभावी तु यः कश् चित् कुर्यात् साक्ष्यं विवादिनाम् । अन्तर्वेश्मन्यरण्ये वा शरीरस्य-अपि च-अत्यये ॥ ८-६९

स्त्रिया-अप्यसंभावे कार्यं बालेन स्थविरेण वा । शिष्येण बन्धुना वा-अपि दासेन भृतकेन वा ॥ ८-७०

बाल-वृद्ध-अतुराणां च साक्ष्येषु वदतां मृषा । जानीयाद् अस्थिरां वाचम् उत्सिक्त-मनसां तथा ॥ ८-७१

साहसेषु च सर्वेषु स्तेय-संग्रहणेषु च । वाग्-दण्डयोश् च पारुष्ये न परीक्षेत साक्षिणः ॥ ८-७२

बहुत्वं परिगृह्णीयात् साक्षिद्वैधे नराधिपः । समेषु तु गुण-उत्कृष्टान् गुणिद्वैधे द्विजोत्तमान् ॥ ८-७३

समक्षदर्शनात् साक्ष्यं श्रवणाच् च-एव सिध्यति । तत्र सत्यं ब्रुवन् साक्षी धर्म-अर्थाभ्यां न हीयते ॥ ८-७४

साक्षी दृष्ट-श्रुताद् अन्यद् विब्रुवन्न् आर्यसंसदि । अवाङ् नरकम् अभ्येति प्रेत्य स्वर्गाच् च हीयते ॥ ८-७५

यत्र-अनिबद्धो अपीक्षेत शृणुयाद् वा-अपि किं चन । पृष्टस् तत्र-अपि तद् ब्रूयाद् यथादृष्टं यथाश्रुतम् ॥ ८-७६

एको अलुब्धस् तु साक्षी स्याद् बह्व्यः शुच्यो अपि न स्त्रियः । स्त्रीबुद्धेर् अस्थिरत्वात् तु दोषैश् च-अन्ये अपि ये वृताः ॥ ८-७७

स्वभावेन-एव यद् ब्रूयुस् तद् ग्राह्यं व्यावहारिकम् । अतो यद् अन्यद् विब्रूयुर् धर्मार्थं तद् अपार्थकम् ॥ ८-७८

सभान्तः साक्षिणः प्राप्तान् अर्थि-प्रत्यर्थि-संनिधौ । प्राड्विवाको अनुयुञ्जीत विधिना-अनेन सान्त्वयन् ॥  ८-७९

यद् द्वयोर् अनयोर् वेत्थ कार्ये अस्मिंश् चेष्टितं मिथः । तद् ब्रूत सर्वं सत्येन युष्माकं ह्यत्र साक्षिता ॥ ८-८०

सत्यं साक्ष्ये ब्रुवन् साक्षी लोकान् आप्नोत्यपुष्कलान्। इह च-अन् - उत्तमां कीर्तिं वाग् एषा ब्रह्मपूजिता॥ ८-८१
साक्ष्ये अनृतं वदन् पाशैर् बध्यते वारुणैर् भृशम्। विवशः शतम् आजातीस् तस्मात् साक्ष्यं वदेद् ऋतम्॥ ८-८२
सत्येन पूयते साक्षी धर्मः सत्येन वर्धते। तस्मात् सत्यं हि वक्तव्यं सर्ववर्णेषु साक्षिभिः॥ ८-८३
आत्मा-एव ह्यात्मनः साक्षी गतिर् आत्मा तथा-अत्मनः। मा-अवमंस्थाः स्वम् आत्मानं नृणां साक्षिणम् उत्तमम्॥ ८-८४
मन्यन्ते वै पापकृतो न कश् चित् पश्यति-इति नः। तांस् तु देवाः प्रपश्यन्ति स्वस्य-एव-अन्तरपूरुषः॥ ८-८५
द्यौर् भूमिर् आपो हृदयं चन्द्र-अर्क-अग्नि-यम-अनिलाः। रात्रिः संध्ये च धर्मश् च वृत्तज्ञाः सर्वदेहिनाम्॥ ८-८६
देव-ब्राह्मणसांनिध्ये साक्ष्यं पृच्छेद् ऋतं द्विजान्। उदङ्-मुखान् प्राङ्-मुखान् वा पूर्वाह्णे वै शुचिः शुचीन्॥ ८-८७
ब्रूहि-इति ब्राह्मणं पृच्छेत् सत्यं ब्रूहि-इति पार्थिवम्। गो-बीज-काञ्चनैर् वैश्यं शूद्रं सर्वैस् तु पातकैः॥ ८-८८
ब्रह्मघ्नो ये स्मृता लोका ये च स्त्री-बाल-घातिनः। मित्रद्रुहः कृत-घ्नस्य ते ते स्युर् ब्रुवतो मृषा॥ ८-८९
जन्मप्रभृति यत् किं चित् पुण्यं भद्र त्वया कृतम्। तत् ते सर्वं शुनो गच्छेद् यदि ब्रूयास् त्वम् अन्यथा॥ ८-९०
एको अहम् अस्मि-इत्यात्मानं यस् त्वं कल्याण मन्यसे। नित्यं स्थितस् ते हृद्येष पुण्य-पाप-ईक्षिता मुनिः॥ ८-९१
यमो वैवस्वतो देवो यस् तव-एष हृदि स्थितः। तेन चेद् अविवादस् ते मा गङ्गां मा कुरून् गमः॥ ८-९२
नग्नो मुण्डः कपालेन च भिक्षार्थी क्षुत् - पिपासितः। अन्धः शत्रुकुलं गच्छेद् यः साक्ष्यम् अनृतं वदेत्॥ ८-९३
अवाक्-शिरास् तमस्यन्धे किल्बिषी नरकं व्रजेत्। यः प्रश्नं वितथं ब्रूयात् पृष्टः सन् धर्मनिश्चये॥ ८-९४
अन्धो मत्स्यान् इव-अश्नाति स नरः कण्टकैः सह। यो भाषते अर्थवैकल्यम् अप्रत्यक्षं सभां गतः॥ ८-९५
यस्य विद्वान् हि वदतः क्षेत्रज्ञो न-अभिशङ्कते । तस्मान् न देवाः श्रेयांसं लोके अन्यं पुरुषं विदुः॥ ८-९६
यावतो बान्धवान् यस्मिन् हन्ति साक्ष्ये अनृतं वदन्। तावतः संख्यया तस्मिन् शृणु सौम्य-अनुपूर्वशः॥ ८-९७
पञ्च पशु-अनृते हन्ति दश हन्ति गवानृते। शतम् अश्वानृते हन्ति सहस्रं पुरुषानृते॥ ८-९८
हन्ति जातान् अजातांश् च हिरण्यार्थे अनृतं वदन्। सर्वं भूमि-अनृते हन्ति मा स्म भूमि-अनृतं वदीः॥ ८-९९
अप्सु भूमिवद् इत्याहुः स्त्रीणां भोगे च मैथुने। अब्जेषु च-एव रत्नेषु सर्वेष्व् अश्ममयेषु च॥ ८-१००
एतान् दोषान् अवेक्ष्य त्वं सर्वान् अनृतभाषणे। यथाश्रुतं यथादृष्टं सर्वम् एव-अञ्जसा वद॥ ८-१०१

गोरक्षकान् वाणिजिकांस्  तथा कारु-कुशीलवान्। प्रेष्यान् वार्धुषिकांश् च-एव विप्रान् शूद्रवद् आचरेत्॥ ८-१०२

तद् वदन् धर्मतो अर्थेषु जानन्न् अप्यन्यथा नरः। न स्वर्गाच् च्यवते लोकाद् दैवीं वाचं वदन्ति ताम्॥ ८-१०३

शूद्र-विश्-क्षत्र-विप्राणां यत्र-ऋत-उक्तौ भवेद् वधः। तत्र वक्तव्यम् अनृतं तद् हि सत्याद् विशिष्यते॥ ८-१०४

वाच्-दैवत्यैश् च चरुभिर् यजेरंस् ते सरस्वतीम्। अनृतस्य-एनसस् तस्य कुर्वाणा निष्कृतिं पराम्॥ ८-१०५

कूष्माण्डैर् वा-अपि जुहुयाद् घृतम् अग्नौ यथाविधि। उद् इत्यृचा वा वारुण्या तृचेन-अप्-दैवतेन वा॥  ८-१०६

त्रिपक्षाद् अब्रुवन् साक्ष्यम् ऋणादिषु नरो अ-गदः। तदृणं प्राप्नुयात् सर्वं दशबन्धं च सर्वतः॥ ८-१०७

यस्य दृश्येत सप्ताहाद् उक्त-वाक्यस्य साक्षिणः। रोगो अग्निर् ज्ञातिमरणम् ऋणं दाप्यो दमं च सः॥ ८-१०८

असाक्षिकेषु त्व् अर्थेषु मिथो विवादमानयोः। अविन्दंस् तत्त्वतः सत्यं शपथेन-अपि लम्भयेत्॥ ८-१०९

महर्षिभिश् च देवैश् च कार्यार्थं शपथाः कृताः। वसिष्ठश् च-अपि शपथं शेपे पैजवने नृपे॥ ८-११०

न वृथा शपथं कुर्यात् स्वल्पे अप्यर्थे नरो बुधः। वृथा हि शपथं कुर्वन् प्रेत्य च-इह च नश्यति।८-१११

कामिनीषु विवाहेषु गवां भक्ष्ये तथा-इन्धने। ब्राह्मण-अभ्युपपत्तौ च शपथे न-अस्ति पातकम्॥ ८-११२

सत्येन शापयेद् विप्रं क्षत्रियं वाहन-अयुधैः। गो-बीज-काञ्चनैर् वैश्यं शूद्रं सर्वैस् तु पातकैः॥ ८-११३

अग्निं वा-अहारयेद् एनम् अप्सु च-एनं निमज्जयेत्। पुत्र-दारस्य वा-अप्येनं शिरांसि स्पर्शयेत् पृथक्॥ ८-११४

यम् इद्धो न दहत्यग्निर् आपो न-उन्मज्जयन्ति च। न च-आर्तिम् ऋच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः॥ ८-११५

वत्सस्य ह्यभिशस्तस्य पुरा भ्रात्रा यवीयसा। न-अग्निर् ददाह रोम-अपि सत्येन जगतः स्पशः॥ ८-११६

यस्मिन् यस्मिन् विवादे तु कौटसाक्ष्यं कृतं भवेत्। तत् तत् कार्यं निवर्तेत कृतं च-अप्यकृतं भवेत्॥ ८-११७

लोभात् - मोहाद् भयात् - मैत्रात् कामात् क्रोधात् तथा-एव च। अज्ञानाद् बालभावात् - च साक्ष्यं वितथम् उच्यते।८-११८

एषाम् अन्यतमे स्थाने यः साक्ष्यम् अनृतं वदेत्। तस्य दण्डविशेषांस् तु प्रवक्ष्याम्यनुपूर्वशः॥ ८-११९

लोभात् सहस्रं दण्ड्यस् तु मोहात् पूर्वं तु साहसम्। भयाद् द्वौ मध्यमौ दण्डौ मैत्रात् पूर्वं चतुर्गुणम्॥ ८-१२०

कामाद् दशगुणं पूर्वं क्रोधात् तु त्रिगुणं परम्। अज्ञानाद् द्वे शते पूर्णे बालिश्यात् - शतम् एव तु॥ ८-१२१

एतान् आहुः कौटसाक्ष्ये प्रोक्तान् दण्डान् मनीषिभिः। धर्मस्य-अव्यभिचारार्थम् अधर्मनियमाय च॥ ८-१२२

कौटसाक्ष्यं तु कुर्वाणांस् त्रीन् वर्णान् धार्मिको नृपः। प्रवासयेद् दण्डयित्वा ब्राह्मणं तु विवासयेत्॥ ८-१२३

दश स्थानानि दण्डस्य मनुः स्वयंभुवो अब्रवीत्। त्रिषु वर्णेषु यानि स्युर् अक्षतो ब्राह्मणो व्रजेत्॥ ८-१२४

उपस्थम् उदरं जिह्वा हस्तौ पादौ च पञ्चमम्। चक्षुर् नासा च कर्णौ च धनं देहस् तथा-एव च॥ ८-१२५

अनुबन्धं परिज्ञाय देश-कालौ च तत्त्वतः। सार-अपराधो च-अलोक्य दण्डं दण्ड्येषु पातयेत्॥ ८-१२६

अधर्मदण्डनं लोके यशोघ्नं कीर्तिनाशनम्। अस्वर्ग्यं च परत्र-अपि तस्मात् तत् परिवर्जयेत्॥ ८-१२७

अदण्ड्यान् दण्डयन् राजा दण्ड्यांश् च-एव-अप्यदण्डयन्। अयशो महद् आप्नोति नरकं च-एव गच्छति॥ ८-१२८

वाग्दण्डं प्रथमं कुर्याद् धिग्दण्डं तदनन्तरम्। तृतीयं धनदण्डं तु वधदण्डम् अतः परम्॥ ८-१२९

वधेन-अपि यदा त्व् एतान् निग्रहीतुं न शक्नुयात्। तदा-एषु सर्वम् अप्येतत् प्रयुञ्जीत चतुष्टयम्॥ ८-१३०

लोकसंव्यवहारार्थं याः संज्ञाः प्रथिता भुवि। ताम्र-रूप्य-सुवर्णानां ताः प्रवक्ष्याम्यशेषतः॥ ८-१३१

जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः। प्रथमं तत् प्रमाणानां त्रसरेणुं प्रचक्षते॥ ८-१३२

त्रसरेणवो अष्टौ विज्ञेया लिक्षा-एका परिमाणतः। ता राजसर्षपस् तिस्रस् ते त्रयो गौरसर्षपः॥ ८-१३३

सर्षपाः षड् यवो मध्यस् त्रियवं त्व् एककृष्णलम्। पञ्चकृष्णलको माषस् ते सुवर्णस् तु षोडश॥ ८-१३४

पलं सुवर्णाश् चत्वारः पलानि धरणं दश। द्वे कृष्णले समधृते विज्ञेयो रौप्यमाषकः॥ ८-१३५

ते षोडश स्याद् धरणं पुराणश् च-एव राजतः। कार्षापणस् तु विज्ञेयस् ताम्रिकः कार्षिकः पणः॥ ८-१३६

धरणानि दश ज्ञेयः शतमानस् तु राजतः। चतुःसौवर्णिको निष्को विज्ञेयस् तु प्रमाणतः॥ ८-१३७

पणानां द्वे शते सार्धे प्रथमः साहसः स्मृतः। मध्यमः पञ्च विज्ञेयः सहस्रं त्व् एव च-उत्तमः॥ ८-१३८

ऋणे देये प्रतिज्ञाते पञ्चकं शतम् अर्हति। अपह्नवे तद्द्विगुणं तन् मनोर् अनुशासनम्॥ ८-१३९

वसिष्ठविहितां वृद्धिं सृजेद् वित्तविवर्धिनीम्। अशीतिभागं गृह्णीयान् मासाद् वार्धुषिकः शते॥ ८-१४०

द्विकं शतं वा गृह्णीयात् सतां धर्मम् अनुस्मरन्। द्विकं शतं हि गृह्णानो न भवत्यर्थकिल्बिषी॥ ८-१४१

द्विकं त्रिकं चतुष्कं च पञ्चकं च शतं समम्। मासस्य वृद्धिं गृह्णीयाद् वर्णानाम् अनुपूर्वशः॥ ८-१४२

न त्व् एव-अधौ स-उपकारे कौसीदीं वृद्धिम् आप्नुयात्। न च-अधेः कालसंरोधात् - निसर्गो अस्ति न विक्रयः॥
८-१४३

न भोक्तव्यो बलाद् आधिर् भुञ्जानो वृद्धिम् उत्सृजेत्। मूल्येन तोषयेच् च-एनम् आधिस्तेनो अन्यथा भवेत्॥ ८-१४४

आधिश् च-उपनिधिश् च-उभौ न कालात्ययम् अर्हतः। अवहार्यौ भवेतां तौ दीर्घकालम् अवस्थितौ॥ ८-१४५

संप्रीत्या भुज्यमानानि न नश्यन्त

यत् किं चिद् दशवर्षाणि संनिधौ प्रेक्षते धनी। भुज्यमानं परैस् तूष्णीं न स तत् - लब्धुम् अर्हति॥ ८-१४७

अजडश् चेद् अपोगण्डो विषये च-अस्य भुज्यते। भग्नं तद् व्यवहारेण भोक्ता तद् द्रव्यम् अर्हति॥ ८-१४८

आधिः सीमा बालधनं निक्षेप-उपनिधिः स्त्रियः। राजस्वं श्रोत्रियस्वं च न भोगेन प्रणश्यति॥ ८-१४९

यः स्वामिना-अननुज्ञातम् आधिं भुङ्क्ते अविचक्षणः। तेन-अर्धवृद्धिर् मोक्तव्या तस्य भोगस्य निष्कृतिः॥ ८-१५०

कुसीदवृद्धिर् द्वैगुण्यं न-अत्येति सकृद् आहृता। धान्ये सदे लवे वाह्ये न-अतिक्रामति पञ्चताम्॥ ८-१५१

कृतानुसाराद् अधिका व्यतिरिक्ता न सिध्यति। कुसीदपथम् आहुस् तं पञ्चकं शतम् अर्हति॥ ८-१५२

न-अति-सांवत्सरीं वृद्धिं न च-अदृष्टां पुनर् हरेत्। चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या।८-१५३

ऋणं दातुम् अशक्तो यः कर्तुम् इच्चेत् पुनः क्रियाम्। स दत्त्वा निर्जितां वृद्धिं करणं परिवर्तयेत्॥ ८-१५४

अदर्शयित्वा तत्र-एव हिरण्यं परिवर्तयेत्। यावती संभवेद् वृद्धिस् तावतीं दातुम् अर्हति॥ ८-१५५

चक्रवृद्धिं समारूढो देश-कालव्यवस्थितः। अतिक्रामन् देश-कालौ न तत्फलम् अवाप्नुयात्॥ ८-१५६

समुद्रयानकुशला देश-काल-अर्थदर्शिनः। स्थापयन्ति तु यां वृद्धिं सा तत्र-अधिगमं प्रति॥ ८-१५७

यो यस्य प्रतिभूस् तिष्ठेद् दर्शनाय-इह मानवः। अदर्शयन् स तं तस्य प्रयच्चेत् स्वधनाद् ऋणम्॥ ८-१५८

प्रातिभाव्यं वृथादानम् आक्षिकं सौरिकां च यत्। दण्ड-शुल्कावशेषं च न पुत्रो दातुम् अर्हति॥ ८-१५९

दर्शनप्रातिभाव्ये तु विधिः स्यात् पूर्वचोदितः। दानप्रतिभुवि प्रेते दायादान् अपि दापयेत्॥ ८-१६०

अदातरि पुनर् दाता विज्ञातप्रकृताव् ऋणम्। पश्चात् प्रतिभुवि प्रेते परीप्सेत् केन हेतुना॥ ८-१६१

निरादिष्टधनश् चेत् तु प्रतिभूः स्याद् अलंधनः। स्वधनाद् एव तद् दद्यान् निरादिष्ट इति स्थितिः॥ ८-१६२

मत्त-उन्मत्त-अर्त-अध्यधीनैर् बालेन स्थविरेण वा। असंबद्धकृतश् च-एव व्यावहारो न सिध्यति॥ ८-१६३

सत्या न भाषा भवति यद्यपि स्यात् प्रतिष्ठिता। बहिश् चेद् भाष्यते धर्मात् - नियताद् व्यवहारिकात्॥ ८-१६४

योगाधमनविक्रीतं योगदानप्रतिग्रहम्। यत्र वा-अप्युपधिं पश्येत् तत् सर्वं विनिवर्तयेत्॥ ८-१६५

ग्रहीता यदि नष्टः स्यात् कुटुम्बार्थे कृतो व्ययः। दातव्यं बान्धवैस् तत् स्यात् प्रविभक्तैर् अपि स्वतः॥ ८-१६६

कुटुम्बार्थे अध्यधीनो अपि व्यवहारं यम् आचरेत्। स्वदेशे वा विदेशे वा तं ज्यायान् न विचालयेत्॥ ८-१६७

बलाद् दत्तं बलाद् भुक्तं बलाद् यच् च-अपि लेखितम्। सर्वान् बलकृतान् अर्थान् अकृतान् मनुर् अब्रवीत्॥ ८-१६८

त्रयः परार्थे क्लिश्यन्ति साक्षिणः प्रतिभूः कुलम्। चत्वारस् तु-उपचीयन्ते विप्र आढ्यो वणिङ् नृपः॥ ८-१६९

अन् - आदेयं न-अददीत परिक्षीणो अपि पार्थिवः। न च-अदेयं समृद्धो अपि सूक्ष्मम् अप्यर्थम् उत्सृजेत्॥ ८-१७०

अन् - आदेयस्य च-अदानाद् आदेयस्य च वर्जनात्। दौर्बल्यं ख्याप्यते राज्ञः स प्रेत्य-इह च नश्यति॥ ८-१७१

स्वादानाद् वर्णसंसर्गात् त्व् अबलानां च रक्षणात्। बलं संजायते राज्ञः स प्रेत्य-इह च वर्धते॥ ८-१७२

तस्माद् यम इव स्वामी स्वयं हित्वा प्रिय-अप्रिये। वर्तेत याम्यया वृत्त्या जित-क्रोधो जित-इन्द्रियः॥ ८-१७३

यस् त्व् अधर्मेण कार्याणि मोहात् कुर्यान् नराधिपः। अचिरात् तं दु-अत्मानं वशे कुर्वन्ति शत्रवः॥ ८-१७४

काम-क्रोधौ तु संयम्य यो अर्थान् धर्मेण पश्यति। प्रजास् तम् अनुवर्तन्ते समुद्रम् इव सिन्धवः॥ ८-१७५

यः साधयन्तं चन्देन वेदयेद् धनिकं नृपे। स राज्ञा तत् - चतुर्भागं दाप्यस् तस्य च तद् धनम्॥ ८-१७६

कर्मणा-अपि समं कुर्याद् धनिकाय-अधमर्णिकः। समो अवकृष्टजातिस् तु दद्यात् - श्रेयांस् तु तत् - शनैः॥ ८-१७७

अनेन विधिना राजा मिथो विवदतां नृणाम्। साक्षिप्रत्ययसिद्धानि कार्याणि समतां नयेत्॥ ८-१७८

कुलजे वृत्तसंपन्ने धर्मज्ञे सत्यवादिनि। महापक्षे धनिन्यार्ये निक्षेपं निक्षिपेद् बुधः॥ ८-१७९

यो यथा निक्षिपेद् हस्ते यम् अर्थं यस्य मानवः। स तथा-एव ग्रहीतव्यो यथा दायस् तथा ग्रहः॥ ८-१८०

यो निक्षेपं याच्यमानो निक्षेप्तुर् न प्रयच्छति। स याच्यः प्राड्विवाकेन तत् - निक्षेप्तुर् असंनिधौ॥ ८-१८१

साक्षि-अभावे प्रणिधिभिर् वयो-रूप-समन्वितैः। अपदेशैश् च संन्यस्य हिरण्यं तस्य तत्त्वतः॥ ८-१८२

स यदि प्रतिपद्येत यथान्यस्तं यथाकृतम्। न तत्र विद्यते किं चिद् यत् परैर् अभियुज्यते॥ ८-१८३

तेषां न दद्याद् यदि तु तद् हिरण्यं यथाविधि। उभौ निगृह्य दाप्यः स्याद् इति धर्मस्य धारणा॥ ८-१८४

निक्षेप-उपनिधी नित्यं न देयौ प्रत्यनन्तरे। नश्यतो विनिपाते ताव् अनिपाते त्व् अनाशिनौ॥ ८-१८५

स्वयम् एव तु यौ दद्यान् मृतस्य प्रत्यनन्तरे। न स राज्ञा-अभियोक्तव्यो न निक्षेप्तुश् च बन्धुभिः॥ ८-१८६

अच्चलेन-एव च-अन्विच्चेत् तम् अर्थं प्रीतिपूर्वकम्। विचार्य तस्य वा वृत्तं साम्ना-एव परिसाधयेत्॥ ८-१८७

निक्षेपेष्व् एषु सर्वेषु विधिः स्यात् परिसाधने। स-मुद्रे न-अप्नुयात् किं चिद् यदि तस्मान् न संहरेत्॥ ८-१८८

चौरैर् हृतं जलेन-ऊढम् अग्निना दग्धम् एव वा। न दद्याद् यदि तस्मात् स न संहरति किं चन॥ ८-१८९

निक्षेपस्य-अपहर्तारम् अनिक्षेप्तारम् एव च। सर्वैर् उपायैर् अन्विच्चेत् - शपथैश् च-एव वैदिकैः॥ ८-१९०

यो निक्षेपं न-अर्पयति यश् च-अ-निक्षिप्य याचते। ताव् उभौ चौरवत् - शास्यौ दाप्यौ वा तत्समं दमम्॥ ८-१९१

निक्षेपस्य-अपहर्तारं तत्समं दापयेद् दमम्। तथा-उपनिधिहर्तारम् अविशेषेण पार्थिवः॥ ८-१९२

उपधाभिश् च यः कश् चित् परद्रव्यं हरेन् नरः। स-सहायः स हन्तव्यः प्रकाशं विविधैर् वधैः॥ ८-१९३

निक्षेपो यः कृतो येन यावांश् च कुलसंनिधौ। तावान् एव स विज्ञेयो विब्रुवन् दण्डम् अर्हति॥ ८-१९४

मिथो दायः कृतो येन गृहीतो मिथ एव वा। मिथ एव प्रदातव्यो यथा दायस् तथा ग्रहः॥ ८-१९५

निक्षिप्तस्य धनस्य-एवं प्रीत्या-उपनिहितस्य च। राजा विनिर्णयं कुर्याद् अक्षिण्वन् न्यासधारिणम्॥ ८-१९६

विक्रीणीते परस्य स्वं यो अस्वामी स्वाम्यसम्मतः। न तं नयेत साक्ष्यं तु स्तेनम् अस्तेनमानिनम्॥ ८-१९७

अवहार्यो भवेत् - च-एव स-अन्वयः षट्शतं दमम्। नि-अन्वयो अन् - अपसरः प्राप्तः स्याच् चौरकिल्बिषम्॥
८-१९८

अस्वामिना कृतो यस् तु दायो विक्रय एव वा। अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः॥ ८-१९९

संभोगो दृश्यते यत्र न दृश्येत-अगमः क्व चित्। आगमः कारणं तत्र न संभोग इति स्थितिः॥ ८-२००

विक्रयाद् यो धनं किं चिद् गृह्णीयत् कुलसंनिधौ। क्रयेण स विशुद्धं हि न्यायतो लभते धनम्॥ ८-२०१

अथ मूलम् अनाहार्यं प्रकाशक्रयशोधितः। अदण्ड्यो मुच्यते राज्ञा नाष्टिको लभते धनम्॥ ८-२०२

न-अन्यद् अन्येन संसृष्टरूपं विक्रयम् अर्हति। न च-अ-सारं न च न्यूनं न दूरेण तिरोहितम्॥ ८-२०३

अन्यां चेद् दर्शयित्वा-अन्या वोढुः कन्या प्रदीयते। उभे त एकशुल्केन वहेद् इत्यब्रवीन् मनुः॥ ८-२०४

न-उन्मत्ताया न कुष्ठिन्या न च या स्पृष्ट-मैथुना। पूर्वं दोषान् अभिख्याप्य प्रदाता दण्डम् अर्हति॥ ८-२०५

ऋत्विग् यदि वृतो यज्ञे स्वकर्म परिहापयेत्। तस्य कर्मानुरूपेण देयो अंशः सहकर्तृभिः॥ ८-२०६

दक्षिणासु च दत्तासु स्वकर्म परिहापयन्। कृत्स्नम् एव लभेत-अंशम् अन्येन-एव च कारयेत्॥ ८-२०७

यस्मिन् कर्मणि यास् तु स्युर् उक्ताः प्रत्यङ्गदक्षिणाः। स एव ता आददीत भजेरन् सर्व एव वा॥ ८-२०८

रथं हरेत् च-अध्वर्युर् ब्रह्मा-अधाने च वाजिनम्। होता वा-अपि हरेद् अश्वम् उद्गाता च-अप्यनः क्रये॥ ८-२०९

सर्वेषाम् अर्धिनो मुख्यास् तदर्धेन-अर्धिनो अपरे। तृतीयिनस् तृतीयांशाश् चतुर्थांशाश् च पादिनः॥ ८-२१०

संभूय स्वानि कर्माणि कुर्वद्भिर् इह मानवैः। अनेन विधियोगेन कर्तव्या-अंशप्रकल्पना॥ ८-२११

धर्मार्थं येन दत्तं स्यात् कस्मै चिद् याचते धनम्। पश्चाच् च न तथा तत् स्यान् न देयं तस्य तद् भवेत्॥ ८-२१२

यदि संसाधयेत् तत् तु दर्पात् - लोभेन वा पुनः। राज्ञा दाप्यः सुवर्णं स्यात् तस्य स्तेयस्य निष्कृतिः॥ ८-२१३

दत्तस्य-एषा-उदिता धर्म्या यथावद् अनपक्रिया। अत ऊर्ध्वं प्रवक्ष्यामि वेतनस्य-अनपक्रियाम्॥ ८-२१४

भृतो न-अर्तो न कुर्याद् यो दर्पात् कर्म यथा-उदितम्। स दण्ड्यः कृष्णलान्यष्टौ न देयं च-अस्य वेतनम्॥ ८-२१५

आर्तस् तु कुर्यात् स्वस्थः सन् यथाभाषितम् आदितः। स दीर्घस्य-अपि कालस्य तत् - लभेत-एव वेतनम्॥ ८-२१६

यथा-उक्तम् आर्तः सुस्थो वा यस् तत् कर्म न कारयेत्। न तस्य वेतनं देयम् अल्प-ऊनस्य-अपि कर्मणः॥ ८-२१७

एष धर्मो अखिलेन-उक्तो वेतनादानकर्मणः। अत ऊर्ध्वं प्रवक्ष्यामि धर्मं समयभेदिनाम्॥ ८-२१८

यो ग्राम-देश-संघानां कृत्वा सत्येन संविदम्। विसंवदेन् नरो लोभात् तं राष्ट्राद् विप्रवासयेत्॥ ८-२१९

निगृह्य दापयेच् च-एनं समयव्यभिचारिणम्। चतुःसुवर्णान् षण्निष्कांश्- शतमानं च राजकम्॥ ८-२२०

एतद् दण्डविधिं कुर्याद् धार्मिकः पृथिवीपतिः। ग्राम-जाति-समूहेषु समयव्यभिचारिणाम्॥ ८-२२१

क्रीत्वा विक्रीय वा किं चिद् यस्य-इहानुशयो भवेत्। सो अन्तर् दशाहात् तद् द्रव्यं दद्याच् च-एवाददीत वा॥ ८-२२२

परेण तु दशाहस्य न दद्यान् नापि दापयेत्। आददानो ददत् च-एव राज्ञा दण्ड्यौ शतानि षट्॥ ८-२२३

यस् तु दोषवतीं कन्याम् अनाख्याय प्रयच्छति। तस्य कुर्यान् नृपो दण्डं स्वयं षण्णवतिं पणान्॥ ८-२२४

अकन्या-इति तु यः कन्यां ब्रूयाद् द्वेषेण मानवः। स शतं प्राप्नुयाद् दण्डं तस्या दोषम् अदर्शयन्॥ ८-२२५

पाणिग्रहणिका मन्त्राः कन्यास्व् एव प्रतिष्ठिताः। न-अकन्यासु क्व चिन् नृणां लुप्त-धर्मक्रिया हि ताः॥ ८-२२६

पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्। तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे॥ ८-२२७

यस्मिन् यस्मिन् कृते कार्ये यस्य-इहानुशयो भवेत्। तम् अनेन विधानेन धर्म्ये पथि निवेशयेत्॥ ८-२२८

पशुषु स्वामिनां च-एव पालानां च व्यतिक्रमे। विवादं संप्रवक्ष्यामि यथावद् धर्मतत्त्वतः॥ ८-२२९

दिवा वक्तव्यता पाले रात्रौ स्वामिनि तद्गृहे। योगक्षेमे अन्यथा चेत् तु पालो वक्तव्यताम् इयात्॥ ८-२३०

गोपः क्षीरभृतो यस् तु स दुह्याद् दशतो वराम्। गोस्वाम्यनुमते भृत्यः सा स्यात् पाले अभृते भृतिः॥ ८-२३१

नष्टं विनष्टं कृमिभिः श्वहतं विषमे मृतम्। हीनं पुरुषकारेण प्रदद्यात् पाल एव तु॥ ८-२३२

विघुष्य तु हृतं चौरैर् न पालो दातुम् अर्हति। यदि देशे च काले च स्वामिनः स्वस्य शंसति॥ ८-२३३

कर्णौ चर्म च वालांश् च बस्तिं स्नायुं च रोचनाम्। पशुषु स्वामिनां दद्यान् मृतेष्व् अङ्गानि दर्शयेत्॥ ८-२३४

अज-अविके तु संरुद्धे वृकैः पाले त्व् अनायति। यां प्रसह्य वृको हन्यात् पाले तत् किल्बिषं भवेत्॥ ८-२३५

तासां चेद् अवरुद्धानां चरन्तीनां मिथो वने। याम् उत्प्लुत्य वृको हन्यान् न पालस् तत्र किल्बिषी॥ ८-२३६

धनुःशतं परीहारो ग्रामस्य स्यात् समन्ततः। शम्यापातास् त्रयो वा-अपि त्रिगुणो नगरस्य तु॥ ८-२३७

तत्र-अपरिवृतं धान्यं विहिंस्युः पशवो यदि। न तत्र प्रणयेद् दण्डं नृपतिः पशुरक्षिणाम्॥ ।८-२३८

वृतिं तत्र प्रकुर्वीत याम् उष्ट्रो न विलोकयेत्। छिद्रं च वारयेत् सर्वं श्व-सूकरमुखानुगम्॥ ८-२३९

पथि क्षेत्रे परिवृते ग्रामान्तीये अथ वा पुनः। स-पालः शतदण्ड-अर्हो विपालान् वारयेत् पशून्॥ ८-२४०

क्षेत्रेष्व् अन्येषु तु पशुः स-पादं पणम् अर्हति। सर्वत्र तु सदो देयः क्षेत्रिकस्य-इति धारणा॥ ८-२४१

अनिर्दशाहां गां सूतां वृषान् देवपशूंस् तथा। स-पालान् वा वि-पालान् वा न दण्ड्यान् मनुर् अब्रवीत्॥ ८-२४२

क्षेत्रियस्य-अत्यये दण्डो भागाद् दशगुणो भवेत्। ततो अर्धदण्डो भृत्यानाम् अज्ञानात् क्षेत्रिकस्य तु॥ ८-२४३

एतद् विधानम् आतिष्ठेद् धार्मिकः पृथिवीपतिः। स्वामिनां च पशूनां च पालानां च व्यतिक्रमे॥ ८-२४४

सीमां प्रति समुत्पन्ने विवादे ग्रामयोर् द्वयोः। ज्येष्ठे मासि नयेत् सीमां सु-प्रकाशेषु सेतुषु॥ ८-२४५

सींअवृक्षांश् च कुर्वीत न्यग्रोध-अश्वत्थ-किंशुकान्। शाल्मलीन् सालतालांश् च क्षीरिणश् च-एव पादपान्॥ ८-२४६

गुल्मान् वेणूंश् च विविधान् शमी-वल्ली-स्थलानि च। शरान् कुब्जकगुल्मांश् च तथा सीमा न नश्यति॥ ८-२४७

तडागान्युदपानानि वाप्यः प्रस्रवणानि च। सीमासंधिषु कार्याणि देवतायतनानि च॥ ८-२४८

उपच्छन्नानि चान्यानि सीमालिङ्गानि कारयेत्। सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्ययम्॥ ८-२४९

अश्मनो अस्थीनि गोवालांस् तुषान् भस्म कपालिकाः। करीषम् इष्टका-अङ्गारांश्-शर्करा वालुकास् तथा॥ ८-२५०

यानि च-एवंप्रकाराणि कालाद् भूमिर् न भक्षयेत्। तानि संधिषु सीमायाम् अप्रकाशानि कारयेत्॥ ८-२५१

एतैर् लिङ्गैर् नयेत् सीमां राजा विवदमानयोः। पूर्वभुक्त्या च सततम् उदकस्य-अगमेन च॥ ८-२५२

यदि संशय एव स्यात् - लिङ्गानाम् अपि दर्शने। साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णयः॥ ८-२५३

ग्रामीयक-कुलानां च समक्षं सीम्नि साक्षिणः। प्रष्टव्याः सीमलिङ्गानि तयोश् च-एव विवादिनोः॥ ८-२५४

ते पृष्तास् तु यथा ब्रूयुः समस्ताः सीम्नि निश्चयम्। निबध्नीयात् तथा सीमां सर्वांस् तांश् च-एव नामतः॥ ८-२५५

शिरोभिस् ते गृहीत्वा-उर्वीं स्रग्विणो रक्त-वाससः। सुकृतैः शापिथाः स्वैः स्वैर् नयेयुस् ते समञ्जसम्॥ ८-२५६

यथा-उक्तेन नयन्तस् ते पूयन्ते सत्यसाक्षिणः। विपरीतं नयन्तस् तु दाप्याः स्युर् द्विशतं दमम्॥ ८-२५७

साक्ष्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः । सीमाविनिर्णयं कुर्युः प्रयता राजसंनिधौ॥ ८-२५८

सामन्तानाम् अभावे तु मौलानां सीम्नि साक्षिणाम्। इमान् अप्यनुयुञ्जीत पुरुषान् वन-गोचरान्॥ ८-२५९

व्याधान् - शाकुनिकान् गोपान् कैवर्तान् मूलखानकान्। व्यालग्राहान् उञ्छवृत्तीन् अन्यांश् च वनचारिणः॥ ८-२६०

ते पृष्टास् तु यथा ब्रूयुः सीमासंधिषु लक्षणम्। तत् तथा स्थापयेद् राजा धर्मेण ग्रामयोर् द्वयोः॥ ८-२६१

क्षेत्र-कूप-तडागानाम् आरामस्य गृहस्य च। सामन्तप्रत्ययो ज्ञेयः सीमासेतुविनिर्णयः॥ ८-२६२

सामन्ताश् चेत् - मृषा ब्रूयुः सेतौ विवादतां नृणाम्। सर्वे पृथक् पृथग् दण्ड्या राज्ञा मध्यमसाहसम्॥ ८-२६३

गृहं तडागम् आरामं क्षेत्रं वा भीषया हरन्। शतानि पञ्च दण्ड्यः स्याद् अज्ञानाद् द्विशतो दमः॥ ८-२६४

सीमायाम् अविषह्यायां स्वयं राजा-एव धर्मवित्। प्रदिशेद् भूमिम् एकेषाम् उपकाराद् इति स्थितिः॥ ८-२६५

एषो अखिलेन-अभिहितो धर्मः सीमाविनिर्णये। अत ऊर्ध्वं प्रवक्ष्यामि वाक्पारुष्यविनिर्णयम्॥ ८-२६६

शतं ब्राह्मणम् आक्रुश्य क्षत्रियो दण्डम् अर्हति। वैश्यो अप्यर्धशतं द्वे वा शूद्रस् तु वधम् अर्हति॥ ८-२६७

पञ्चाशद् ब्राह्मणो दण्ड्यः क्षत्रियस्य-अभिशंसने। वैश्ये स्याद् अर्धपञ्चाशत् - शूद्रे द्वादशको दमः॥ ८-२६८

समवर्णे द्विजातीनां द्वादश-एव व्यतिक्रमे। वादेष्व् अवचनीयेषु तद् एव द्विगुणं भवेत्॥ ८-२६९

एकजातिर् द्विजातींस् तु वाचा दारुणया क्षिपन्। जिह्वायाः प्राप्नुयाच् छेदं जघन्य-प्रभवो हि सः॥ ८-२७०

नाम-जातिग्रहं त्व् एषाम् अभिद्रोहेण कुर्वतः। निक्षेप्यो अयोमयः शङ्कुर् ज्वलन्न् आस्ये दशाङ्गुलः॥ ८-२७१

धर्म-उपदेशं दर्पेण विप्राणाम् अस्य कुर्वतः। तप्तम् आसेचयेत् तैलं वक्त्रे श्रोत्रे च पार्थिवः॥ ८-२७२

श्रुतं देशं च जातिं च कर्म शरीरम् एव च। वितथेन ब्रुवन् दर्पाद् दाप्यः स्याद् द्विशतं दमम्॥ ८-२७३

काणं वा-अप्यथ वा खञ्जम् अन्यं वा-अपि तथाविधम्। तथ्येन-अपि ब्रुवन् दाप्यो दण्डं कार्षापण-अवरम्॥ ८-२७४

मातरं पितरं जायां भ्रातरं तनयं गुरुम्। आक्षारयन् - शतं दाप्यः पन्थानं च-अददद् गुरोः॥ ८-२७५

ब्राह्मण-क्षत्रियाभ्यां तु दण्डः कार्यो विजानता। ब्राह्मणे साहसः पूर्वः क्षत्रिये त्व् एव मध्यमः॥ ८-२७६

विश-शूद्रयोर् एवम् एव स्वजातिं प्रति तत्त्वतः। चेद-वर्जं प्रणयनं दण्डस्य-इति विनिश्चयः॥ ८-२७७

एष दण्डविधिः प्रोक्तो वाक्पारुष्यस्य तत्त्वतः। अत ऊर्ध्वं प्रवक्ष्यामि दण्डपारुष्यनिर्णयम्॥ ८-२७८

येन केन चिद् अङ्गेन हिंस्याच् चेत् - श्रेष्ठम् अन्त्यजः। चेत्तव्यं तद् तद् एव-अस्य तन् मनोर् अनुशासनम्॥ ८-२७९

पाणिम् उद्यम्य दण्डं वा पाणिच्चेदनम् अर्हति। पादेन प्रहरन् कोपात् पादच्चेदनम् अर्हति॥ ८-२८०

सहासनम् अभिप्रेप्सुर् उत्कृष्टस्य-अपकृष्टजः। कट्यां कृत-अङ्को निर्वास्यः स्फिचं वा-अस्य-अवकर्तयेत्॥ ८-२८१

अवनिष्ठीवतो दर्पाद् द्वाव् ओष्ठौ चेदयेन् नृपः। अवमूत्रयतो मेढ्रम् अवशर्धयतो गुदम्॥ ८-२८२

केशेषु गृह्णतो हस्तौ चेदयेद् अविचारयन्। पादयोर् दाढिकायां च ग्रीवायां वृषणेषु च॥ ८-२८३

त्वग्भेदकः शतं दण्ड्यो लोहितस्य च दर्शकः। मांसभेत्ता तु षट्-निष्कान् प्रवास्यस् त्व् अस्थिभेदकः॥ ८-२८४

वनस्पतीनां सर्वेषाम् उपभोगो यथा यथा। यथा तथा दमः कार्यो हिंसायाम् इति धारणा॥ ८-२८५

मनुष्याणां पशूनां च दुःखाय प्रहृते सति। यथा यथा महद् दुःखं दण्डं कुर्यात् तथा तथा॥ ८-२८६

अङ्गावपीडनायां च व्रण-शोनितयोस् तथा। समुत्थानव्ययं दाप्यः सर्वदण्डम् अथ-अपि वा॥ ८-२८७

द्रव्याणि हिंस्याद् यो यस्य ज्ञानतो अज्ञानतो अपि वा। स तस्य-उत्पादयेत् तुष्टिं राज्ञे दद्याच् च तत्समम्॥ ८-२८८

चर्म-चार्मिकभाण्डेषु काष्ठ-लोष्टमयेषु। मूल्यात् पञ्चगुणो दण्डः पुष्प-मूल-फलेषु च॥ ८-२८९

यानस्य च-एव यातुश् च यानस्वामिन एव च। दशातिवर्तनान्याहुः शेषे दण्डो विधीयते॥ ८-२९०

चिन्न-नास्ये भग्न-युगे तिर्यक्-प्रतिमुख-अगते। अक्ष-भङ्गे च यानस्य चक्र-भङ्गे तथा-एव च।८-२९१

चेदने च-एव यन्त्राणां योक्त्र-रश्म्योस् तथा-एव च। आक्रन्दे च-अप्यपैहि-इति न दण्डं मनुर् अब्रवीत्॥ ८-२९२

यत्र-अपवर्तते युग्यं वैगुण्यात् प्राजकस्य तु। तत्र स्वामी भवेद् दण्ड्यो हिंसायां द्विशतं दमम्॥ ८-२९३

प्राजकश् चेद् भवेद् आप्तः प्राजको दण्डम् अर्हति। युग्यस्थाः प्राजके अनाप्ते सर्वे दण्ड्याः शतं शतम्॥ ८-२९४

स चेत् तु पथि संरुद्धः पशुभिर् वा रथेन वा। प्रमापयेत् प्राणभृतस् तत्र दण्डो अविचारितः॥ ८-२९५

मनुष्यमारणे क्षिप्रं चौरवत् किल्बिषं भवेत्। प्राणभृत्सु महत्स्व् अर्धं गो-गज-उष्ट्र-हयादिषु॥ ८-२९६

क्षुद्रकाणां पशूनां तु हिंसायां द्विशतो दमः। पञ्चाशत् तु भवेद् दण्डः शुभेषु मृगपक्षिषु॥ ८-२९७

गर्धभ-अज-अविकानां तु दण्डः स्यात् पञ्चमाषिकः। माषिकस् तु भवेद् दण्डः श्व-सूकरनिपातने॥ ८-२९८

भार्या पुत्रश् च दासश् च प्रेष्यो भ्रात्रा च स-उदरः। प्राप्त-अपराधास् ताड्याः स्यू रज्ज्वा वेणुदलेन वा॥ ८-२९९

पृष्ठतस् तु शरीरस्य न-उत्तमाङ्गे कथं चन। अतो अन्यथा तु प्रहरन् प्राप्तः स्याच् चौरकिल्बिषम्॥ ८-३००

एषो अखिलेन-अभिहितो दण्डपारुष्यनिर्णयः। स्तेनस्य-अतः प्रवक्ष्यामि विधिं दण्डविनिर्णये॥ ८-३०१

परमं यत्नम् आतिष्ठेत् स्तेनानां निग्रहे नृपः। स्तेनानां निग्रहाद् अस्य यशो राष्ट्रं च वर्धते॥ ८-३०२

अभयस्य हि यो दाता स पूज्यः सततं नृपः। सत्त्रं हि वर्धते तस्य सदा-एव-अभय-दक्षिणम्॥ ८-३०३

सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः। अधर्माद् अपि षड्भागो भवत्यस्य ह्यरक्षतः॥ ८-३०४

यद् अधीते यद् यजते यद् ददाति यद् अर्चति। तस्य षड्भागभाग् राजा सम्यग् भवति रक्षणात्॥ ८-३०५

रक्षन् धर्मेण भूतानि राजा वध्यांश् च घातयन्। यजते अहर् अहर् यज्ञैः सहस्रशत-दक्षिणैः॥ ८-३०६

यो अ-रक्षन् बलिम् आदत्ते करं शुल्कं च पार्थिवः। प्रतिभागं च दण्डं च स सद्यो नरकं व्रजेत्॥ ८-३०७

अरक्षितारम् राजानं बलिषड्भाग-हारिणम्। तम् आहुः सर्वलोकस्य समग्रमल-हारकम्॥ ८-३०८

अनपेक्षित-मर्यादं नास्तिकं विप्रलुंपकम्। अरक्षितारम् अत्तारं नृपं विद्याद् अधो-गतिम्॥ ८-३०९

अधार्मिकं त्रिभिर् न्यायैर् निगृह्णीयात् प्रयत्नतः। निरोधनेन बन्धेन विविधेन वधेन च॥ ८-३१०

निग्रहेण हि पापानां साधूनां संग्रहेण च। द्विजातय इव-इज्याभिः पूयन्ते सततं नृपाः॥ ८-३११

क्षन्तव्यं प्रभुणा नित्यं क्षिपतां कार्यिणां नृणाम्। बाल-वृद्ध-अतुराणां च कुर्वता हितम् आत्मनः॥ ८-३१२

यः क्षिप्तो मर्षयत्यार्तैस् तेन स्वर्गे महीयते। यस् त्व् ऐश्वर्यान् न क्षमते नरकं तेन गच्छति॥ ८-३१३

राजा स्तेनेन गन्तव्यो मुक्त-केशेन धावता। आचक्षाणेन तत् स्तेयम् एवंकर्मा-अस्मि शाधि माम्॥ ८-३१४

स्कन्धेन-अदाय मुसलं लगुडं वा-अपि खादिरम्। शक्तिं च-उभयतस् तीक्ष्णाम् आयसं दण्डम् एव वा॥ ८-३१५

शासनाद् वा विमोक्षाद् वा स्तेनः स्तेयाद् विमुच्यते। अशासित्वा तु तं राजा स्तेनस्य-आप्नोति किल्बिषम्॥ ८-३१६

अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्या-अपचारिणी। गुरौ शिष्यश् च याज्यश् च स्तेनो राजनि किल्बिषम्॥ ८-३१७

राजभिः कृतदण्डास् तु कृत्वा पापानि मानवाः। नि-र्मलाः स्वर्गम् आयान्ति सन्तः सुकृतिनो यथा॥ ८-३१८

यस् तु रज्जुं घटं कूपाद् हरेद् भिन्द्याच् च यः प्रपाम्। स दण्डं प्राप्नुयान् माषं तच् च तस्मिन् समाहरेत्॥ ८-३१९

धान्यं दशभ्यः कुम्भेभ्यो हरतो अभ्यधिकं वधः। शेषे अप्येकादशगुणं दाप्यस् तस्य च तद् धनम्॥ ८-३२०

तथा धरिममेयानां शताद् अभ्यधिके वधः। सुवर्ण-रजतादीनाम् उत्तमानां च वाससाम्॥ ८-३२१

पञ्चाशतस् त्व् अभ्यधिके हस्तच्चेदनम् इष्यते। शेषे त्व् एकादशगुणं मूल्याद् दण्डं प्रकल्पयेत्॥ ८-३२२

पुरुषाणां कुलीनानां नारीणां च विशेषतः। मुख्यानां च-एव रत्नानां हरणे वधम् अर्हति॥ ८-३२३

महापशूनां हरणे शस्त्राणाम् औषधस्य च। कालम् आसाद्य कार्यं च दण्डं राजा प्रकल्पयेत्॥ ८-३२४

गोषु ब्राह्मणसंस्थासु चुरिकायाश् च भेदने। पशूनां हरणे च-एव सद्यः कार्यो अर्धपादिकः॥ ८-३२५

सूत्र-कार्पास-किण्वानां गोमयस्य गुडस्य च। दध्नः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च॥ ८-३२६

वेणुवैदलभाण्डानां लवणानां तथा-एव च। मृण्मयानां च हरणे मृदो भस्मन एव च॥ ८-३२७

मत्स्यानां पक्षिणां च-एव तैलस्य च घृतस्य च। मांसस्य मधुनश् च-एव यच् च-अन्यत् पशु-संभवम्॥ ८-३२८

अन्येषां च-एवम्-अदीनां मद्यानाम् ओदनस्य च। पक्वान्नानां च सर्वेषां तन्मुल्याद् द्विगुणो दमः॥ ८-३२९

पुष्पेषु हरिते धान्ये गुल्म-वल्ली-नगेषु च। अन्येष्व् अपरिपूतेषु दण्डः स्यात् पञ्चकृष्णलः॥ ८-३३०

परिपूतेषु धान्येषु शाक-मूल-फलेषु च। निरन्वये शतं दण्डः सान्वये अर्धशतं दमः॥ ८-३३१

स्यात् साहसं त्व् अन्वयवत् प्रसभं कर्म यत् कृतम्। निरन्वयं भवेत् स्तेयं हृत्वा-अपव्ययते च यत्॥ ८-३३२

यस् त्व् एतान्युपक्ळ्प्तानि द्रव्याणि स्तेनयेन् नरः। तम् आद्यं दण्डयेद् राजा यश् चाग्निं चोरयेद् गृहात्॥ ८-३३३

येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते। तत् तद् एव हरेत् तस्य प्रत्यादेशाय पार्थिवः॥ ८-३३४

पिता-अचार्यः सुहृत् - माता भार्या पुत्रः पुरोहितः। न-अदण्ड्यो नाम राज्ञो अस्ति यः स्वधर्मे न तिष्ठति॥ ८-३३५

कार्षापणं भवेद् दण्ड्यो यत्र-अन्यः प्राकृतो जनः। तत्र राजा भवेद् दण्ड्यः सहस्रम् इति धारणा॥ ८-३३६

अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्बिषम्। षोडश-एव तु वैश्यस्य द्वात्रिंशत् क्षत्रियस्य च॥ ८-३३७

ब्राह्मणस्य चतुःषष्टिः पूर्णं वा-अपि शतं भवेत्। द्विगुणा वा चतुःषष्टिस् तद्दोषगुणविद् हि सः॥ ८-३३८

वानस्पत्यं मूल-फलं दारु-अग्न्य-अर्थं तथा-एव च। तृणं च गोभ्यो ग्रास-अर्थम् अस्तेयं मनुर् अब्रवीत्॥ ८-३३९

यो अदत्तादायिनो हस्तात्- लिप्सेत ब्राह्मणो धनम्। याजन-अध्यापनेन-अपि यथा स्तेनस् तथा-एव सः॥ ८-३४०

द्विजो अध्वगः क्षीण-वृत्तिर् द्वाव् इक्षू द्वे च मूलके। आददानः परक्षेत्रात्- न दण्डं दातुम् अर्हति॥ ८-३४१

असंदितानां संदाता संदितानां च मोक्षकः। दास-अश्व-रथहर्ता च प्राप्तः स्याच् चोरकिल्बिषम्॥ ८-३४२

अनेन विधिना राजा कुर्वाणः स्तेननिग्रहम्। यशो अस्मिन् प्राप्नुयात्- लोके प्रेत्य च-अनुत्तमं सुखम्॥ ८-३४३

ऐन्द्रं स्थानम् अभिप्रेप्सुर् यशश् च-अक्षयम् अव्ययम्। न-उपेक्षेत क्षणम् अपि राजा साहसिकं नरम्॥ ८-३४४

वाग्दुष्टात् तस्कराच् च-एव दण्डेन-एव च हिंसतः। साहसस्य नरः कर्ता विज्ञेयः पापकृत्तमः॥ ८-३४५

साहसे वर्तमानं तु यो मर्षयति पार्थिवः। स विनाशं व्रजत्याशु विद्वेषं च-अधिगच्छति॥ ८-३४६

न मित्रकारणाद् राजा विपुलाद् वा धनागमात्। समुत्सृजेत् साहसिकान् सर्वभूतभयावहान्॥ ८-३४७

शस्त्रं द्विजातिभिर् ग्राह्यं धर्मो यत्र-उपरुध्यते। द्विजातीनां च वर्णानां विप्लवे कालकारिते॥ ८-३४८

आत्मनश् च परित्राणे दक्षिणानां च संगरे। स्त्री-विप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यति॥ ८-३४९

गुरुं वा बाल-वृद्धौ वा ब्राह्मणं वा बहु-श्रुतम्। आततायिनम् आयान्तं हन्याद् एव-अ-विचारयन्॥ ८-३५०

न-अततायिवधे दोषो हन्तुर् भवति कश् चन। प्रकाशं वा-अप्रकाशं वा मन्युस् तं मन्युम् ऋच्छति॥ ८-३५१

परदाराभिमर्शेषु प्रवृत्तान् नॄन् महीपतिः। उद्वेजनकरैर् दण्डैश् चिन्नयित्वा प्रवासयेत्॥ ८-३५२

तत्- समुत्थो हि लोकस्य जायते वर्णसंकरः। येन मूलहरो अधर्मः सर्वनाशाय कल्पते॥ ८-३५३

परस्य पत्न्या पुरुषः संभाषां योजयन् रहः। पूर्वम् आक्षारितो दोषैः प्राप्नुयात् पूर्वसाहसम्॥ ८-३५४

यस् त्व् अनाक्षारितः पूर्वम् अभिभाषते कारणात्। न दोषं प्राप्नुयात् किं चिन् न हि तस्य व्यतिक्रमः॥ ८-३५५

परस्त्रियं यो अभिवदेत् तीर्थे अरण्ये वने अपि वा। नदीनां वा-अपि संभेदे स संग्रहणम् आप्नुयात्॥ ८-३५६

उपचारक्रिया केलिः स्पर्शो भूषण-वाससाम्। सह खट्वा-असनं च-एव सर्वं संग्रहणं स्मृतम्॥ ८-३५७

स्त्रियं स्पृशेद् अदेशे यः स्पृष्टो वा मर्षयेत् तया। परस्परस्य-अनुमते सर्वं संग्रहणं स्मृतम्॥ ८-३५८

अब्राह्मणः संग्रहणे प्राणान्तं दण्डम् अर्हति। चतुर्णाम् अपि वर्णानां दारा रक्ष्यतमाः सदा॥ ८-३५९

भिक्षुका बन्दिनश् च-एव दीक्षिताः कारवस् तथा। संभाषनं सह स्त्रीभिः कुर्युर् अप्रतिवारिताः॥ ८-३६०

न संभाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत्। निषिद्धो भाषमाणस् तु सुवर्णं दण्डम् अर्हति॥ ८-३६१

न-एष चारणदारेषु विधिर् न-अत्म-उपजीविषु। सज्जयन्ति हि ते नारीर् निगूढाश् चारयन्ति च॥ ८-३६२

किं चिद् एव तु दाप्यः स्यात् संभाषां ताभिर् आचरन्। प्रैष्यासु च-एकभक्तासु रहः प्रव्रजितासु च॥ ८-३६३

यो अ-कामां दूषयेत् कन्यां स सद्यो वधम् अर्हति। स-कामां दूषयंस् तुल्यो न वधं प्राप्नुयान् नरः॥ ८-३६४

कन्याम् भजन्तीम् उत्कृष्टं न किं चिद् अपि दापयेत्। जघन्यं सेवमानां तु संयतां वासयेद् गृहे॥ ८-३६५

उत्तमां सेवमानस् तु जघन्यो वधम् अर्हति। शुल्कं दद्यात् सेवमानः समाम् इच्चेत् पिता यदि॥ ८-३६६

अभिषह्य तु यः कन्यां कुर्याद् दर्पेण मानवः। तस्य-अशु कर्त्ये अङ्गुल्यौ दण्डं च-अर्हति षट्शतम्॥ ८-३६७

स-कामां दूषयंस् तुल्यो न-अङ्गुलिचेदम् आप्नुयात्। द्विशतं तु दमम् दाप्यः प्रसङ्गविनिवृत्तये॥ ८-३६८

कन्या-एव कन्यां या कुर्यात् तस्याः स्याद् द्विशतो दमः। शुल्कं च द्विगुणं दद्यात् - शिफाश् च-एव-अप्नुयाद् दश॥
८-३६९

या तु कन्यां प्रकुर्यात् स्त्री सा सद्यो मौण्ड्यम् अर्हति। अङ्गुल्योर् एव वा चेदं खरेण-उद्वहनं तथा॥ ८-३७०

भर्तारं लङ्घयेद् या तु स्त्री ज्ञाति-गुणदर्पिता। तां श्वभिः खादयेद् राजा संस्थाने बहुसंस्थिते॥ ८-३७१

पुमांसं दाहयेत् पापं शयने तप्त आयसे। अभ्यादध्युश् च काष्ठानि तत्र दह्येत पापकृत्॥ ८-३७२

संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः। व्रात्यया सह संवासे चाण्डाल्या तावद् एव तु॥ ८-३७३

शूद्रो गुप्तम् अगुप्तं वा द्वैजातं वर्णम् आवसन्। अगुप्तम् अङ्ग-सर्वस्वैर् गुप्तं सर्वेण हीयते॥ ८-३७४

वैश्यः सर्वस्व-दण्डः स्यात् संवत्सरनिरोधतः। सहस्रं क्षत्रियो दण्ड्यो मौण्ड्यं मूत्रेण च-अर्हति॥ ८-३७५

ब्राह्मणीं यद्यगुप्तां तु गच्चेतां वैश्य-पार्थिवौ। वैश्यं पञ्चशतं कुर्यात् क्षत्रियं तु सहस्रिणम्॥ ८-३७६

उभाव् अपि तु ताव् एव ब्राह्मण्या गुप्तया सह। विप्लुतौ शूद्रवद् दण्ड्यौ दग्धव्यौ वा कटाग्निना॥ ८-३७७

सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद् व्रजन्। शतानि पञ्च दण्ड्यः स्याद् इच्चन्त्या सह संगतः॥ ८-३७८

मौण्ड्यं प्राणान्तिकं दण्डो ब्राह्मणस्य विधीयते। इतरेषां तु वर्णानां दण्डः प्राणान्तिको भवेत्॥ ८-३७९

न जातु ब्राह्मणं हन्यात् सर्वपापेष्व् अपि स्थितम्। राष्ट्राद् एनं बहिः कुर्यात् समग्र-धनम् अक्षतम्॥ ८-३८०

न ब्राह्मणवधाद् भूयान् अधर्मो विद्यते भुवि। तस्माद् अस्य वधं राजा मनसा-अपि न चिन्तयेत्॥ ८-३८१

वैश्यश् चेत् क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत्। यो ब्राह्मण्याम् अगुप्तायां ताव् उभौ दण्डम् अर्हतः॥ ८-३८२

सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन्। शूद्रायां क्षत्रिय-विशोः साहस्रो वै भवेद् दमः॥ ८-३८३

क्षत्रियायाम् अगुप्तायां वैश्ये पञ्चशतं दमः। मूत्रेण मौण्ड्यम् इच्छेत् तु क्षत्रियो दण्डम् एव वा॥ ८-३८४

अगुप्ते क्षत्रिया-वैश्ये शूद्रां वा ब्राह्मणो व्रजन्। शतानि पञ्च दण्ड्यः स्यात् सहस्रं त्व् अन्त्यजस्त्रियम्॥ ८-३८५

यस्य स्तेनः पुरे न-अस्ति न-अन्यस्त्रीगो न दुष्ट-वाक्। न साहसिक-दण्डघ्नो स राजा शक्रलोकभाक्॥ ८-३८६

एतेषां निग्रहो राज्ञः पञ्चानां विषये स्वके। सांराज्यकृत् सजात्येषु लोके च-एव यशस्करः॥ ८-३८७

ऋत्विजं यस् त्यजेद् याज्यो याज्यं च र्त्विक् त्यजेद् यदि। शक्तं कर्मण्यदुष्टं च तयोर् दण्डः शतं शतम्॥ ८-३८८

न माता न पिता न स्त्री न पुत्रस् त्यागम् अर्हति। त्यजन्न् अपतितान् एतान् राज्ञा दण्ड्यः शतानि षट्॥ ८-३८९

आश्रमेषु द्विजातीनां कार्ये विवदतां मिथः। न विब्रूयान् नृपो धर्मं चिकीर्षन् हितम् आत्मनः॥ ८-३९०

यथार्हम् एतान् अभ्यर्च्य ब्राह्मणैः सह पार्थिवः। सान्त्वेन प्रशमय्य-अदौ स्वधर्मं प्रतिपादयेत्॥ ८-३९१

प्रतिवेश्य-अनुवेश्यौ च कल्याणे विंशतिद्विजे। अर्हाव् अभोजयन् विप्रो दण्डम् अर्हति माषकम्॥ ८-३९२

श्रोत्रियः श्रोत्रियं साधुं भूतिकृत्येष्व् अभोजयन्। तद्-अन्नं द्विगुणं दाप्यो हिरण्यं च-एव माषकम्॥ ८-३९३

अन्धो जडः पीठसर्पी सप्तत्या स्थविरश् च यः। श्रोत्रियेषूपकुर्वंश् च न दाप्याः केन चित् करम्॥ ८-३९४

श्रोत्रियं व्याधित-अर्तौ च बाल-वृद्धाव् अकिंचनम्। महाकुलीनम् आर्यं च राजा संपूजयेत् सदा॥ ८-३९५

शाल्मलीफलके श्लक्ष्णे नेनिज्यान् नेजकः शनैः। न च वासांसि वासोभिर् निर्हरेन् न च वासयेत्॥ ८-३९६

तन्तुवायो दशपलं दद्याद् एकपल-अधिकम्। अतो अन्यथा वर्तमानो दाप्यो द्वादशकं दमम्॥ ८-३९७

शुल्कस्थानेषु कुशलाः सर्वपण्य-विचक्षणाः। कुर्युर् अर्घं यथापण्यं ततो विंशं नृपो हरेत्॥ ८-३९८

राज्ञः प्रख्यातभाण्डानि प्रतिषिद्धानि यानि च। ताणि निर्हरतो लोभात् सर्वहारं हरेन् नृपः॥ ८-३९९

शुल्कस्थानं परिहरन्न् अकाले क्रय-विक्रयी। मिथ्यावादी च संख्याने दाप्यो अष्टगुणम् अत्ययम्॥ ८-४००

आगमं निर्गमं स्थानं तथा वृद्धि-क्षयाव् उभौ। विचार्य सर्वपण्यानां कारयेत् क्रय-विक्रयौ॥ ८-४०१

पञ्चरात्रे पञ्चरात्रे पक्षे पक्षे अथ वा गते। कुर्वीत च-एषां प्रत्यक्षम् अर्घसंस्थापनं नृपः॥ ८-४०२

तुलामानं प्रतीमानं सर्वं च स्यात् सुलक्षितम्। षट्सु षट्सु च मासेषु पुनर् एव परीक्षयेत्॥ ८-४०३

पणं यानं तरे दाप्यं पौरुषो अर्धपणं तरे। पादं पशुश् च योषित् - च पादार्धं रिक्तकः पुमान्॥ ८-४०४

भाण्डपूर्णानि यानानि तार्यं दाप्यानि सारतः। रिक्तभाण्डानि यत् किं चित् पुमांसश् च-अपरिच्छदाः ॥ ८-४०५

दीर्घाध्वनि यथादेशं यथाकालं तरो भवेत्। नदीतीरेषु तद् विद्यात् समुद्रे न-अस्ति लक्षणम्॥ ८-४०६

गर्भिणी तु द्विमासादिस् तथा प्रव्रजितो मुनिः। ब्राह्मणा लिङ्गिनश् च-एव न दाप्यास् तारिकं तरे॥ ८-४०७

यन् नावि किं चिद् दाशानां विशीर्येत-अपराधतः। तद् दाशैर् एव दातव्यं समागम्य स्वतो अंशतः॥ ८-४०८

एष नौयायिनाम् उक्तो व्यवहारस्य निर्णयः। दाशापराधतस् तोये दैविके न-अस्ति निग्रहः॥ ८-४०९

वाणिज्यं कारयेद् वैश्यं कुसीदं कृषिम् एव च। पशूनां रक्षणं च-एव दास्यं शूद्रं द्विजन्मनाम्॥ ८-४१०

क्षत्रियं च-एव वैश्यं च ब्राह्मणो वृत्तिकर्शितौ। बिभृयाद् आनृशंस्येन स्वानि कर्माणि कारयेत्॥ ८-४११

दास्यं तु कारयन् - लोभाद् ब्राह्मणः संस्कृतान् द्विजान्। अनिच्चतः प्राभवत्याद् राज्ञा दण्ड्यः शतानि षट्॥ ८-४१२

शूद्रं तु कारयेद् दास्यं क्रीतम् अक्रीतम् एव वा। दास्याय-एव हि सृष्टो असौ ब्राह्मणस्य स्वयंभुवा॥ ८-४१३

न स्वामिना निसृष्टो अपि शूद्रो दास्याद् विमुच्यते। निसर्गजं हि तत् तस्य कस् तस्मात् तद् अपोहति॥ ८-४१४

ध्वजाहृतो भक्तदासो गृहजः क्रीत-दत्त्रिमौ। पैत्रिको दण्डदासश् च सप्त-एते दासयोनयः॥ ८-४१५

भार्या पुत्रश् च दासश् च त्रय एव-अ-धनाः स्मृताः। यत् ते समधिगच्चन्ति यस्य ते तस्य तद् धनम्॥ ८-४१६

विस्रब्धं ब्राह्मणः शूद्राद् द्रव्य-उपादानम् आचरेत्। न हि तस्य-अस्ति किं चित् स्वं भर्तृहार्य-धनो हि सः॥ ८-४१७

वैश्य-शूद्रौ प्रयत्नेन स्वानि कर्माणि कारयेत्। तौ हि च्युतौ स्वकर्मभ्यः क्षोभयेताम् इदं जगत्॥ ८-४१८

अहन्यहन्यवेक्षेत कर्मान्तान् वाहनानि च। आय-व्ययौ च नियताव् आकरान् कोशम् एव च॥ ८-४१९

एवं सर्वान् इमान् राजा व्यवहारान् समापयन्। व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिम्॥ ८-४२०

पुरुषस्य स्त्रियाश् च-एव धर्मे वर्त्मनि तिष्ठतोः। संयोगे विप्रयोगे च धर्मान् वक्ष्यामि शाश्वतान्॥ ९-०१

अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर् दिवा-निशम्। विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे॥ ९-०२

पिता रक्षति कौमारे भर्ता रक्षति यौवने। रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यम् अर्हति॥ ९-०३

काले अ-दाता पिता वाच्यो वाच्यश् च-अन् - उपयन् पतिः। मृते भर्तरि पुत्रस् तु वाच्यो मातुर् अरक्षिता॥ ९-०४

सूक्ष्मेभ्यो अपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः। द्वयोर् हि कुलयोः शोकम् आवहेयुर् अरक्षिताः॥ ९-०५

इमं हि सर्ववर्णानां पश्यन्तो धर्मम् उत्तमम्। यतन्ते रक्षितुं भार्यां भर्तारो दुर्बला अपि॥ ९-०६

स्वां प्रसूतिं चरित्रं च कुलम् आत्मानम् एव च। स्वं च धर्मं प्रयत्नेन जायां रक्षन् हि रक्षति॥ ९-०७

पतिर् भार्यां संप्रविश्य गर्भो भूत्वा-इह जायते। जायायास् तद् हि जायात्वं यद् अस्यां जायते पुनः॥ ९-०८

यादृशं भजते हि स्त्री सुतं सूते तथाविधम्। तस्मात् प्रजाविशुद्धि-अर्थं स्त्रियं रक्षेत् प्रयत्नतः॥ ९-०९

न कश् चिद् योषितः शक्तः प्रसह्य परिरक्षितुम्। एतैर् उपाययोगैस् तु शक्यास् ताः परिरक्षितुम्॥ ९-१०

अर्थस्य संग्रहे च-एनां व्यये च-एव नियोजयेत्। शौचे धर्मे अन्नपक्त्यां च पारिणाह्यस्य वेक्षणे॥ ९-११

अरक्षिता गृहे रुद्धाः पुरुषैर् आप्तकारिभिः। आत्मानम् आत्मना यास् तु रक्षेयुस् ताः सुरक्षिताः॥ ९-१२

पानं दुर्जनसंसर्गः पत्या च विरहो अटनम्। स्वप्नो अन्यगेहवासश् च नारीसंदूषणानि षट्॥ ९-१३

न-एता रूपं परीक्षन्ते न-असां वयसि संस्थितिः। सुरूपं वा विरूपं वा पुमान् इत्येव भुञ्जते॥ ९-१४

पौंश्चल्याच् चलचित्ताच् च नैस्नेह्याच् च स्वभावतः। रक्षिता यत्नतो अपि-इह भर्तृष्व् एता विकुर्वते॥ ९-१५

एवं स्वभावं ज्ञात्वा-असां प्रजापतिनिसर्गजम्। परमं यत्नम् आतिष्ठेत् पुरुषो रक्षणं प्रति॥ ९-१६

शय्या-असनम् अलङ्कारं कामं क्रोधम् अनार्जवम्। द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुर् अकल्पयत्॥ ९-१७

न-अस्ति स्त्रीणां क्रिया मन्त्रैर् इति धर्मे व्यवस्थितिः

नि-ईन्द्रिया ह्यमन्त्राश् च स्त्रीभ्यो अनृतम् इति स्थितिः॥ ९-१८

तथा च श्रुतयो बह्व्यो निगीता निगमेष्व् अपि। स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतीः॥ ९-१९

यन् मे माता प्रलुलुभे विचरन्त्यपतिव्रता। तन् मे रेतः पिता वृङ्क्ताम् इत्यस्य-एतन् निदर्शनम्॥ ९-२०

ध्यायत्यनिष्टं यत् किं चित् पाणिग्राहस्य चेतसा। तस्य-एष व्यभिचारस्य निह्नवः सम्यग् उच्यते॥ ९-२१

यादृग्-गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि। तादृग्-गुणा सा भवति समुद्रेण-इव निम्नगा॥ ९-२२

अक्षमाला वसिष्ठेन संयुक्ता-अधमयोनिजा। शारङ्गी मन्दपालेन जगाम-अभ्यर्हणीयताम्॥ ९-२३

एताश् च-अन्याश् च लोके अस्मिन्न् अपकृष्टप्रसूतयः। उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर् भर्तृगुणैः शुभैः॥ ९-२४

एषा-उदिता लोकयात्रा नित्यं स्त्री-पुंसयोः शुभा। प्रेत्य-इह च सुख-उदर्कान् प्रजाधर्मान् निबोधत॥ ९-२५

प्रजनार्थं महा-भागाः पूज-अर्हा गृहदीप्तयः। स्त्रियः श्रियश् च गेहेषु न विशेषो अस्ति कश् चन॥ ९-२६

उत्पादनम् अपत्यस्य जातस्य परिपालनम्। प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्री निबन्धनम्॥ ९-२७

अपत्यं धर्मकार्याणि शुश्रूषा रतिर् उत्तमा। दारा-अधीनस् तथा स्वर्गः पितॄणाम् आत्मनश् च ह॥ ९-२८

पतिं या न-अभिचरति मनो-वाग्-देहसंयता। सा भर्तृलोकान् आप्नोति सद्भिः साध्वी-इति च-उच्यते॥ ९-२९

व्यभिचारात् तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम्। सृगालयोनिं च-अप्नोति पापरोगैश् च पीड्यते॥ ९-३०

पुत्रं प्रत्युदितं सद्भिः पूर्वजैश् च महर्षिभिः। विश्वजन्यम् इमं पुण्यम् उपन्यासं निबोधत॥ ९-३१

भर्तरि पुत्रं विजानन्ति श्रुतिद्वैधं तु कर्तरि। आहुर् उत्पादकं के चिद् अपरे क्षेत्रिणं विदुः॥ ९-३२

क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान्। क्षेत्र-बीजसमायोगात् संभवः सर्वदेहिनाम्॥ ९-३३

विशिष्टं कुत्र चिद् बीजं स्त्रीयोनिस् त्व् एव कुत्र चित्। उभयं तु समं यत्र सा प्रसूतिः प्रशस्यते॥ ९-३४

बीजस्य च-एव योन्याश् च बीजम् उत्कृष्टम् उच्यते। सर्वभूतप्रसूतिर् हि बीजलक्षणलक्षिता।९-३५

यादृशं तु-उप्यते बीजं क्षेत्रे काल-उपपादिते। तादृग् रोहति तत् तस्मिन् बीजं स्वैर् व्यञ्जितं गुणैः॥ ९-३६

इयं भूमिर् हि भूतानां शाश्वती योनिर् उच्यते। न च योनिगुणान् कांश् चिद् बीजं पुष्यति पुष्टिषु॥ ९-३७

भूमाव् अप्येककेदारे काल-उप्तानि कृषीवलैः। नानारूपाणि जायन्ते बीजानि-इह स्वभावतः॥ ९-३८

व्रीहयः शालयो मुद्गास् तिला माषास् तथा यवाः। यथाबीजं प्ररोहन्ति लशुनानि-इक्षवस् तथा॥ ९-३९

अन्यद् उप्तं जातम् अन्यद् इत्येतत् - न-उपपद्यते। उप्यते यद् हि यद् बीजं तत् तद् एव प्ररोहति॥ ९-४०

तत् प्राज्ञेन विनीतेन ज्ञान-विज्ञानवेदिना। आयुष्कामेन वप्तव्यं न जातु परयोषिति॥ ९-४१

अत्र गाथा वायुगीताः कीर्तयन्ति पुराविदः। यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे॥ ९-४२

नश्यति-इषुर् यथा विद्धः खे विद्धम् अनुविध्यतः। तथा नश्यति वै क्षिप्रं बीजं परपरिग्रहे॥ ९-४३

पृथोर् अपि-इमां पृथिवीं भार्यां पूर्वविदो विदुः। स्थाणु-चेदस्य केदारम् आहुः शाल्यवतो मृगम्॥ ९-४४

एतावान् एव पुरुषो यत् - जाया-अत्मा प्रजा-इति ह। विप्राः प्राहुस् तथा च-एतद् यो भर्ता सा स्मृत-अङ्गना॥ ९-४५

न निष्क्रय-विसर्गाभ्यां भर्तुर् भार्या विमुच्यते। एवं धर्मं विजानीमः प्राक् प्रजापतिनिर्मितम्॥ ९-४६

सकृद् अंशो निपतति सकृत् कन्या प्रदीयते। सकृद् आह ददानि-इति त्रीण्येतानि सतां सकृत्॥ ९-४७

यथा गो-अश्व-उष्ट्र-दासीषु महिष्य्-अजा-अविकासु च । न-उत्पादकः प्रजाभागी तथा-एव-अन्याङ्गनास्व् अपि ॥ ९-४८

ये अक्षेत्रिणो बीजवन्तः परक्षेत्रप्रवापिणः । ते वै सस्यस्य जातस्य न लभन्ते फलं क्व चित् ॥ ९-४९

यद् अन्यगोषु वृषभो वत्सानां जनयेत् - शतम् । गोमिनाम् एव ते वत्सा मोघं स्कन्दितम् आर्षभम् ॥ ९-५०

तथा-एव-अक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः । कुर्वन्ति क्षेत्रिणाम् अर्थं न बीजी लभते फलम् ॥ ९-५१

फलं त्व् अनभिसंधाय क्षेत्रिणां बीजिनाम् तथा । प्रत्यक्षं क्षेत्रिणाम् अर्थो बीजाद् योनिर् गलीयसी ॥ ९-५२

क्रियाभ्युपगमात् त्व् एतद् बीजार्थं यत् प्रदीयते । तस्य-इह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च ॥ ९-५३

ओघ-वाताहृतं बीजं यस्य क्षेत्रे प्ररोहति । क्षेत्रिकस्य-एव तद् बीजं न वप्ता लभते फलम् ॥ ९-५४

एष धर्मो गव-अश्वस्य दास्य-उष्ट्र-अज-अविकस्य च । विहंग-महिषीणां च विज्ञेयः प्रसवं प्रति ॥ ९-५५

एतद् वः सारफल्गुत्वं बीज-योन्योः प्रकीर्तितम् । अतः परं प्रवक्ष्यामि योषितां धर्मम् आपदि ॥ ९-५६

भ्रातुर् ज्येष्ठस्य भार्या या गुरुपत्न्यनुजस्य सा । यवीयसस् तु या भार्या स्नुषा ज्येष्ठस्य सा स्मृता ॥ ९-५७

ज्येष्ठो यवीयसो भार्यां यवीयान् वा-अग्रजस्त्रियम् । पतितौ भवतो गत्वा नियुक्ताव् अप्यनापदि ॥ ९-५८

देवराद् वा सपिण्डाद् वा स्त्रिया सम्यक्-नियुक्तया । प्रजा-ईप्सिता-अधिगन्तव्या संतानस्य परिक्षये ॥ ९-५९

ंविधवायां नियुक्तस् तु घृताक्तो वाग्यतो निशि । एकम् उत्पादयेत् पुत्रं न द्वितीयं कथं चन ॥ ९-६०

द्वितीयम् एके प्रजनं मन्यन्ते स्त्रीषु तद्विदः । अनिर्वृतं नियोगार्थं पश्यन्तो धर्मतस् तयोः ॥ ९-६१

विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि । गुरुवत् - च स्नुषावत् - च वर्तेयातां परस्परम् ॥ ९-६२

नियुक्तौ यौ विधिं हित्वा वर्तेयातां तु कामतः । ताव् उभौ पतितौ स्यातां स्नुषाग-गुरुतल्पगौ ॥ ९-६३

न-अन्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः । अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम् ॥ ९-६४

न-उद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्व चित् । न विवाहविधाव् उक्तं विधवावेदनं पुनः ॥ ९-६५

अयं द्विजैर् हि विद्वद्भिः पशुधर्मो विगर्हितः । मनुष्याणाम् अपि प्रोक्तो वेने राज्यं प्रशासति ॥ ९-६६

स महीम् अखिलां भुञ्जन् राजर्षिप्रवरः पुरा । वर्णानां संकरं चक्रे काम-उपहत-चेतनः ॥ ९-६७

ततः प्रभृति यो मोहात् प्रमीत-पतिकां स्त्रियम् । नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः ॥ ९-६८

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः। ताम् अनेन विधानेन निजो विन्देत देवरः॥ ९-६९

यथाविधि-अधिगम्य-एनां शुक्ल-वस्त्रां शुचि-व्रताम्। मिथो भजेत-अ प्रसवात् सकृत् - सकृद् ऋताव्-ऋतौ॥ ९-७०

न दत्त्वा कस्य चित् कन्यां पुनर् दद्याद् विचक्षणः। दत्त्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतम्॥ ९-७१

विधिवत् प्रतिगृह्य-अपि त्यजेत् कन्यां विगर्हिताम्। व्याधितां विप्रदुष्टां वा छद्मना च-उपपादिताम्॥ ९-७२

यस् तु दोषवतीं कन्याम् अनाख्याय-उपपादयेत्। तस्य तद् वितथं कुर्यात् कन्यादातुर् दुरात्मनः॥ ९-७३

विधाय वृत्तिं भार्यायाः प्रवसेत् कार्यवान् नरः। अवृत्तिकर्शिता हि स्त्री प्रदुष्येत् स्थितिमत्यपि॥ ९-७४

विधाय प्रोषिते वृत्तिं जीवेन् नियमम् आस्थिता। प्रोषिते त्व् अविधाय-एव जीवेत् - शिल्पैर् अगर्हितैः॥ ९-७५

प्रोषितो धर्मकार्यार्थं प्रतीक्ष्यो अष्टौ नरः समाः। विद्यार्थं षड् यशो-अर्थं वा कामार्थं त्रींस् तु वत्सरान्॥ ९-७६

संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः। ऊर्ध्वं संवत्सरात् त्व् एनां दायं हृत्वा न संवसेत्॥ ९-७७

अतिक्रामेत् प्रमत्तं या मत्तं रोगार्तम् एव वा। सा त्रीन् मासान् परित्याज्या विभूषण-परिच्छदा॥ ९-७८

उन्मत्तं पतितं क्लीबम् अबीजं पापरोगिणम्। न त्यागो अस्ति द्विषन्त्याश् च न च दायापवर्तनम्॥ ९-७९

मद्यपा-असाधुवृत्ता च प्रतिकूला च या भवेत्। व्याधिता वा-अधिवेत्तव्या हिंस्रा-अर्थघ्नी च सर्वदा॥ ९-८०

वन्ध्याष्टमे अधिवेद्या-अब्दे दशमे तु मृत-प्रजा। एकादशे स्त्रीजननी सद्यस् त्व् अप्रियवादिनी॥ ९-८१

या रोगिणी स्यात् तु हिता संपन्ना च-एव शीलतः। सा-अनुज्ञाप्य-अधिवेत्तव्या न-अवमान्या च कर्हिं चित्॥ ९-८२

अधिविन्ना तु या नारी निर्गच्छेद् रुषिता गृहात्। सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसंनिधौ॥ ९-८३

प्रतिषिद्धा-अपि चेद् या तु मद्यम् अभ्युदयेष्व् अपि। प्रेक्षा-समाजं गच्छेद् वा सा दण्ड्या कृष्णलानि षट्॥ ९-८४

यदि स्वाश् च-अपराश् च-एव विन्देरन् योषितो द्विजाः। तासां वर्णक्रमेण स्याज् ज्येष्ठ्यं पूजा च वेश्म च॥ ९-८५

भर्तुः शरीरशुश्रूषां धर्मकार्यं च नैत्यकम्। स्वा च-एव कुर्यात् सर्वेषां न-अस्वजातिः कथं चन॥ ९-८६

यस् तु तत् कारयेन् मोहात् स-जात्या स्थितया-अन्यया। यथा ब्राह्मणचाण्डालः पूर्वदृष्टस् तथा-एव सः॥ ९-८७

उत्कृष्टाय-अभिरूपाय वराय सदृशाय च। अप्राप्ताम् अपि तां तस्मै कन्यां दद्याद् यथाविधि॥ ९-८८

कामम् आ मरणात् तिष्ठेद् गृहे कन्या-ऋतुमत्यपि। न च-एव-एनां प्रयच्छेत् तु गुण-हीनाय कर्हिं चित्॥ ९-८९

त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती। ऊर्ध्वं तु कालाद् एतस्माद् विन्देत सदृशं पतिम्॥ ९-९०

अदीयमाना भर्तारम् अधिगच्छेद् यदि स्वयम्। न-एनः किं चिद् अवाप्नोति न च यं सा-अधिगच्छति॥ ९-९१

अलङ्कारं न-अददीत पित्र्यं कन्या स्वयंवरा। मातृकं भ्रातृदत्तं वा स्तेना स्याद् यदि तं हरेत्॥ ९-९२

पित्रे न दद्यात्- शुल्कं तु कन्याम् ऋतुमतीं हरन्। स च स्वाम्याद् अतिक्रामेद् ऋतूनां प्रतिरोधनात्॥ ९-९३

त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्। त्र्यष्टवर्षो अष्टवर्षां वा धर्मे सीदति सत्वरः॥ ९-९४

देवदत्तां पतिर् भार्यां विन्दते न-इच्छया-अत्मनः। तां साध्वीं बिभृयान् नित्यं देवानां प्रियम् आचरन्॥ ९-९५

प्रजनार्थं स्त्रियः सृष्टाः संतानार्थं च मानवः। तस्मात् साधारणो धर्मः श्रुतौ पत्न्या सह-उदितः॥ ९-९६

कन्यायां दत्त-शुल्कायां म्रियेत यदि शुल्कदः। देवराय प्रदातव्या यदि कन्या-अनुमन्यते॥ ९-९७

आददीत न शूद्रो अपि शुल्कं दुहितरं ददन्। शुल्कं हि गृह्णन् कुरुते छन्नं दुहितृविक्रयम्॥ ९-९८

एतत् तु न परे चक्रुर् न-अपरे जातु साधवः। यद् अन्यस्य प्रतिज्ञाय पुनर् अन्यस्य दीयते॥ ९-९९

न-अनुशुश्रुम जातु-एतत् पूर्वेष्व् अपि हि जन्मसु। शुल्क-संज्ञेन मूल्येन छन्नं दुहितृविक्रयम्॥ ९-१००

अन्योन्यस्य-अव्यभिचारो भवेद् आ-मरणान्तिकः। एष धर्मः समासेन ज्ञेयः स्त्री-पुंसयोः परः॥ ९-१०१

तथा नित्यं यतेयातां स्त्री-पुंसौ तु कृत-क्रियौ। यथा नाभिचरेतां तौ वियुक्ताव् इतरेतरम्॥ ९-१०२

एष स्त्री-पुंसयोर् उक्तो धर्मो वो रतिसंहितः। आपद्यपत्यप्राप्तिश् च दायधर्मं निबोधत॥ ९-१०३

ऊर्ध्वं पितुश् च मातुश् च समेत्य भ्रातरः समम्। भजेरन् पैतृकं रिक्थम् अनीशास् ते हि जीवतोः॥ ९-१०४

ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनम् अशेषतः। शेषास् तम् उपजीवेयुर् यथा-एव पितरं तथा॥ ९-१०५

ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः। पितॄणाम् अनृणश् च-एव स तस्मात् सर्वम् अर्हति॥ ९-१०६

यस्मिन्न् ऋणं संनयति येन च-अनन्त्यम् अश्नुते। स एव धर्मजः पुत्रः कामजान् इतरान् विदुः॥ ९-१०७

पिता-इव पालयेत् पूत्रान् ज्येष्ठो भ्रातृण् यवीयसः। पुत्रवत् - च-अपि वर्तेरन् ज्येष्ठे भ्रातरि धर्मतः॥ ९-१०८

ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः। ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिर् अगर्हितः॥ ९-१०९

यो ज्येष्ठो ज्येष्ठ-वृत्तिः स्यान् माता-इव स पिता-इव सः। अज्येष्ठवृत्तिर् यस् तु स्यात् स संपूज्यस् तु बन्धुवत्॥
९-११०

एवं सह वसेयुर् वा पृथग् वा धर्मकाम्यया। पृथग् विवर्धते धर्मस् तस्माद् धर्म्या पृथक्क्रिया॥ ९-१११

ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच् च यद् वरम् । ततो अर्धं मध्यमस्य स्यात् तुरीयं तु यवीयसः ॥ ९-११२

ज्येष्ठश् च-एव कनिष्ठश् च संहरेतां यथा-उदितम् । ये अन्ये ज्येष्ठ-कनिष्ठाभ्यां तेषां स्यान् मध्यमं धनम् ॥ ९-११३

सर्वेषां धनजातानाम् आददीत-अग्र्यम् अग्रजः । यच् च सातिशयं किं चिद् दशतश् च-अप्नुयाद् वरम् ॥ ९-११४

उद्धारो न दशस्व् अस्ति संपन्नानां स्वकर्मसु । यत् किं चिद् एव देयं तु ज्यायसे मान-वर्धनम् ॥ ९-११५

एवं समुद्धृत-उद्धारे समान् अंशान् प्रकल्पयेत् । उद्धारे अन् - उद्धृते त्व् एषाम् इयं स्याद् अंशकल्पना ॥ ९-११६

एकाधिकं हरेज् ज्येष्ठः पुत्रो अध्यर्धं ततो अनुजः । अंशम् अंशं यवीयांस इति धर्मो व्यवस्थितः ॥ ९-११७

स्वेभ्यो अंशेभ्यस् तु कन्याभ्यः प्रदद्युर् भ्रातरः पृथक् । स्वात् स्वाद् अंशाच् चतुर्भागं पतिताः स्युर् अदित्सवः ॥
९-११८

अज-अविकं स-एकशफं न जातु विषमं भजेत् । अज-अविकं तु विषमं ज्येष्ठस्य-एव विधीयते ॥ ९-११९

यवीयान् - ज्येष्ठभार्यायां पुत्रम् उत्पादयेद् यदि । समस् तत्र विभागः स्याद् इति धर्मो व्यवस्थितः ॥ ९-१२०

उपसर्जनं प्रधानस्य धर्मतो न-उपपद्यते । पिता प्रधानं प्रजने तस्माद् धर्मेण तं भजेत् ॥ ९-१२१

पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायां च पूर्वजः । कथं तत्र विभागः स्याद् इति चेत् संशयो भवेत् ॥ ९-१२२

एकं वृषभम् उद्धारं संहरेत स पूर्वजः । ततो अपरे ज्येष्ठवृषास् तद्-ऊनानां स्वमातृतः ॥ ९-१२३

ज्येष्ठस् तु जातो ज्येष्ठायां हरेद् वृषभ-षोडशाः । ततः स्वमातृतः शेषा भजेरन्न् इति धारणा ॥ ९-१२४

सदृशस्त्रीषु जातानां पुत्राणाम् अविशेषतः । न मातृतो ज्यैष्ठ्यम् अस्ति जन्मतो ज्यैष्ठ्यम् उच्यते ॥ ९-१२५

जन्मज्येष्ठेन च-अह्वानं सुब्रह्मण्यास्व् अपि स्मृतम् । यमयोश् च-एव गर्भेषु जन्मतो ज्येष्ठता स्मृता ॥ ९-१२६

अपुत्रो अनेन विधिना सुतां कुर्वीत पुत्रिकाम् । यद् अपत्यं भवेद् अस्यां तन् मम स्यात् स्वधाकरम् ॥ ९-१२७

अनेन तु विधानेन पुरा चक्रे अथ पुत्रिकाः । विवृद्ध्यर्थं स्ववंशस्य स्वयं दक्षः प्रजापतिः ॥ ९-१२८

ददौ स दश धर्माय कश्यपाय त्रयोदश । सोमाय राज्ञे सत्कृत्य प्रीत-अत्मा सप्तविंशतिम् ॥ ९-१२९

यथा-एव-अत्मा तथा पुत्रः पुत्रेण दुहिता समा । तस्याम् आत्मनि तिष्ठन्त्यां कथम् अन्यो धनं हरेत् ॥ ९-१३०

मातुस् तु यौतकं यत् स्यात् कुमारीभाग एव सः । दौहित्र एव च हरेद् अपुत्रस्य-अखिलं धनम् ॥ ९-१३१

दौहित्रो ह्यखिलं रिक्थम् अपुत्रस्य पितुर् हरेत् । स एव दद्याद् द्वौ पिण्डौ पित्रे मातामहाय च ॥ ९-१३२

पौत्र-दौहित्रयोर् लोके न विशेषो अस्ति धर्मतः। तयोर् हि माता-पितरौ संभूतौ तस्य देहतः॥ ९-१३३

पुत्रिकायां कृतायां तु यदि पुत्रो अनुजायते। समस् तत्र विभागः स्यात् - ज्येष्ठता न-अस्ति हि स्त्रियाः॥ ९-१३४

अपुत्रायां मृतायां तु पुत्रिकायां कथं चन। धनं तत् पुत्रिकाभर्ता हरेत-एव-अ-विचारयन्॥ ९-१३५

अकृता वा कृता वा-अपि यं विन्देत् सदृशात् सुतम्। पौत्री मातामहस् तेन दद्यात् पिण्डं हरेद् धनम्॥ ९-१३६

पुत्रेण लोकान् - जयति पौत्रेण-अनन्त्यम् अश्नुते। अथ पुत्रस्य पौत्रेण ब्रध्नस्य-अप्नोति विष्टपम्॥ ९-१३७

पुत् - नाम्नो नरकाद् यस्मात् त्रायते पितरं सुतः। तस्मात् पुत्र इति प्रोक्तः स्वयम् एव स्वयंभुवा॥ ९-१३८

पौत्र-दौहित्रयोर् लोके विशेषो न-उपपद्यते। दौहित्रो अपि ह्यमुत्र-एनं संतारयति पौत्रवत्॥ ९-१३९

मातुः प्रथमतः पिण्डं निर्वपेत् पुत्रिकासुतः। द्वितीयं तु पितुस् तस्यास् तृतीयं तत्पितुः पितुः॥ ९-१४०

किं चिद् एव तु दाप्यः स्यात् संभाषां ताभिर् आचरन्। प्रैष्यासु च-एकभक्तासु रहः प्रव्रजितासु च॥ ८-३६३

यो अ-कामां दूषयेत् कन्यां स सद्यो वधम् अर्हति। स-कामां दूषयंस् तुल्यो न वधं प्राप्नुयान् नरः॥ ८-३६४

कन्याम् भजन्तीम् उत्कृष्टं न किं चिद् अपि दापयेत्। जघन्यं सेवमानां तु संयतां वासयेद् गृहे॥ ८-३६५

उत्तमां सेवमानस् तु जघन्यो वधम् अर्हति। शुल्कं दद्यात् सेवमानः समाम् इच्चेत् पिता यदि॥ ८-३६६

अभिषह्य तु यः कन्यां कुर्याद् दर्पेण मानवः। तस्य-अशु कर्त्ये अङ्गुल्यौ दण्डं च-अर्हति षट्शतम्॥ ८-३६७

स-कामां दूषयंस् तुल्यो न-अङ्गुलिचेदम् आप्नुयात्। द्विशतं तु दमम् दाप्यः प्रसङ्गविनिवृत्तये॥ ८-३६८

कन्या-एव कन्यां या कुर्यात् तस्याः स्याद् द्विशतो दमः। शुल्कं च द्विगुणं दद्यात् - शिफाश् च-एव-अप्नुयाद् दश॥
८-३६९

या तु कन्यां प्रकुर्यात् स्त्री सा सद्यो मौण्ड्यम् अर्हति। अङ्गुल्योर् एव वा चेदं खरेण-उद्वहनं तथा॥ ८-३७०

भर्तारं लङ्घयेद् या तु स्त्री ज्ञाति-गुणदर्पिता। तां श्वभिः खादयेद् राजा संस्थाने बहुसंस्थिते॥ ८-३७१

पुमांसं दाहयेत् पापं शयने तप्त आयसे। अभ्यादध्युश् च काष्ठानि तत्र दह्येत पापकृत्॥ ८-३७२

संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः। व्रात्यया सह संवासे चाण्डाल्या तावद् एव तु॥ ८-३७३

शूद्रो गुप्तम् अगुप्तं वा द्वैजातं वर्णम् आवसन्। अगुप्तम् अङ्ग-सर्वस्वैर् गुप्तं सर्वेण हीयते॥ ८-३७४

वैश्यः सर्वस्व-दण्डः स्यात् संवत्सरनिरोधतः। सहस्रं क्षत्रियो दण्ड्यो मौण्ड्यं मूत्रेण च-अर्हति॥ ८-३७५

ब्राह्मणीं यद्यगुप्तां तु गच्छेतां वैश्य-पार्थिवौ। वैश्यं पञ्चशतं कुर्यात् क्षत्रियं तु सहस्रिणम्॥ ८-३७६

उभाव् अपि तु ताव् एव ब्राह्मण्या गुप्तया सह। विप्लुतौ शूद्रवद् दण्ड्यौ दग्धव्यौ वा कटाग्निना॥ ८-३७७

सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद् व्रजन्। शतानि पञ्च दण्ड्यः स्याद् इच्छन्त्या सह संगतः॥ ८-३७८

मौण्ड्यं प्राणान्तिकं दण्डो ब्राह्मणस्य विधीयते। इतरेषां तु वर्णानां दण्डः प्राणान्तिको भवेत्॥ ८-३७९

न जातु ब्राह्मणं हन्यात् सर्वपापेष्व् अपि स्थितम्। राष्ट्राद् एनं बहिः कुर्यात् समग्र-धनम् अक्षतम्॥ ८-३८०

न ब्राह्मणवधाद् भूयान् अधर्मो विद्यते भुवि। तस्माद् अस्य वधं राजा मनसा-अपि न चिन्तयेत्॥ ८-३८१

वैश्यश् चेत् क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो व्रजेत्। यो ब्राह्मण्याम् अगुप्तायां ताव् उभौ दण्डम् अर्हतः॥ ८-३८२

सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन्। शूद्रायां क्षत्रिय-विशोः साहस्रो वै भवेद् दमः॥ ८-३८३

क्षत्रियायाम् अगुप्तायां वैश्ये पञ्चशतं दमः। मूत्रेण मौण्ड्यम् इच्छेत् तु क्षत्रियो दण्डम् एव वा॥ ८-३८४

अगुप्ते क्षत्रिया-वैश्ये शूद्रां वा ब्राह्मणो व्रजन्। शतानि पञ्च दण्ड्यः स्यात् सहस्रं त्व् अन्त्यजस्त्रियम्॥ ८-३८५

यस्य स्तेनः पुरे न-अस्ति न-अन्यस्त्रीगो न दुष्ट-वाक्। न साहसिक-दण्डघ्नो स राजा शक्रलोकभाक्॥ ८-३८६

एतेषां निग्रहो राज्ञः पञ्चानां विषये स्वके। सांराज्यकृत् सजात्येषु लोके च-एव यशस्करः॥ ८-३८७

ऋत्विजं यस् त्यजेद् याज्यो याज्यं च त्विक् त्यजेद् यदि। शक्तं कर्मण्यदुष्टं च तयोर् दण्डः शतं शतम्॥ ८-३८८

न माता न पिता न स्त्री न पुत्रस् त्यागम् अर्हति। त्यजन्न् अपतितान् एतान् राज्ञा दण्ड्यः शतानि षट्॥ ८-३८९

आश्रमेषु द्विजातीनां कार्ये विवदतां मिथः। न विब्रूयान् नृपो धर्मं चिकीर्षन् हितम् आत्मनः॥ ८-३९०

यथार्हम् एतान् अभ्यर्च्य ब्राह्मणैः सह पार्थिवः। सान्त्वेन प्रशमय्य-अदौ स्वधर्मं प्रतिपादयेत्॥ ८-३९१

प्रतिवेश्य-अनुवेश्यौ च कल्याणे विंशतिद्विजे। अर्हाव् अभोजयन् विप्रो दण्डम् अर्हति माषकम्॥ ८-३९२

श्रोत्रियः श्रोत्रियं साधुं भूतिकृत्येष्व् अभोजयन्। तद्-अन्नं द्विगुणं दाप्यो हिरण्यं च-एव माषकम्॥ ८-३९३

अन्धो जडः पीठसर्पी सप्तत्या स्थविरश् च यः। श्रोत्रियेषूपकुर्वंश् च न दाप्याः केन चित् करम्॥ ८-३९४

श्रोत्रियं व्याधित-अर्तौ च बाल-वृद्धाव् अकिंचनम्। महाकुलीनम् आर्यं च राजा संपूजयेत् सदा॥ ८-३९५

शाल्मलीफलके श्लक्ष्णे नेनिज्यान् नेजकः शनैः। न च वासांसि वासोभिर् निर्हरेन् न च वासयेत्॥ ८-३९६

तन्तुवायो दशपलं दद्याद् एकपल-अधिकम्। अतो अन्यथा वर्तमानो दाप्यो द्वादशकं दमम्॥ ८-३९७

शुल्कस्थानेषु कुशलाः सर्वपण्य-विचक्षणाः। कुर्युर् अर्घं यथापण्यं ततो विंशं नृपो हरेत्॥ ८-३९८

राज्ञः प्रख्यातभाण्डानि प्रतिषिद्धानि यानि च। तानि निर्हरतो लोभात् सर्वहारं हरेन् नृपः॥ ८-३९९

शुल्कस्थानं परिहरन्न् अकाले क्रय-विक्रयी। मिथ्यावादी च संख्याने दाप्यो अष्टगुणम् अत्ययम्॥ ८-४००

आगमं निर्गमं स्थानं तथा वृद्धि-क्षयाव् उभौ। विचार्य सर्वपण्यानां कारयेत् क्रय-विक्रयौ॥ ८-४०१

पञ्चरात्रे पञ्चरात्रे पक्षे पक्षे अथ वा गते। कुर्वीत च-एषां प्रत्यक्षम् अर्घसंस्थापनं नृपः॥ ८-४०२

तुलामानं प्रतीमानं सर्वं च स्यात् सुलक्षितम्। षट्सु षट्सु च मासेषु पुनर् एव परीक्षयेत्॥ ८-४०३

पणं यानं तरे दाप्यं पौरुषो अर्धपणं तरे। पादं पशुश् च योषित् - च पादार्धं रिक्तकः पुमान्॥ ८-४०४

भाण्डपूर्णानि यानानि तार्यं दाप्यानि सारतः। रिक्तभाण्डानि यत् किं चित् पुमांसश् च-अपरिच्चदाः॥ ८-४०५

दीर्घाध्वनि यथादेशं यथाकालं तरो भवेत्। नदीतीरेषु तद् विद्यात् समुद्रे न-अस्ति लक्षणम्॥ ८-४०६

गर्भिणी तु द्विमासादिस् तथा प्रव्रजितो मुनिः। ब्राह्मणा लिङ्गिनश् च-एव न दाप्यास् तारिकं तरे॥ ८-४०७

यन् नावि किं चिद् दाशानां विशीर्येत-अपराधतः। तद् दाशैर् एव दातव्यं समागम्य स्वतो अंशतः॥ ८-४०८

एष नौयायिनाम् उक्तो व्यवहारस्य निर्णयः। दाशापराधतस् तोये दैविके न-अस्ति निग्रहः॥ ८-४०९

वाणिज्यं कारयेद् वैश्यं कुसीदं कृषिम् एव च। पशूनां रक्षणं च-एव दास्यं शूद्रं द्विजन्मनाम्॥ ८-४१०

क्षत्रियं च-एव वैश्यं च ब्राह्मणो वृत्तिकर्शितौ। बिभृयाद् आनृशंस्येन स्वानि कर्माणि कारयेत्॥ ८-४११

दास्यं तु कारयन् - लोभाद् ब्राह्मणः संस्कृतान् द्विजान्। अनिच्चतः प्राभवत्याद् राज्ञा दण्ड्यः शतानि षट्॥ ८-४१२

शूद्रं तु कारयेद् दास्यं क्रीतम् अक्रीतम् एव वा। दास्याय-एव हि सृष्टो असौ ब्राह्मणस्य स्वयंभुवा॥ ८-४१३

न स्वामिना निसृष्टो अपि शूद्रो दास्याद् विमुच्यते। निसर्गजं हि तत् तस्य कस् तस्मात् तद् अपोहति॥ ८-४१४

ध्वजाहृतो भक्तदासो गृहजः क्रीत-दत्त्रिमौ। पैत्रिको दण्डदासश् च सप्त-एते दासयोनयः॥ ८-४१५

भार्या पुत्रश् च दासश् च त्रय एव-अ-धनाः स्मृताः। यत् ते समधिगच्चन्ति यस्य ते तस्य तद् धनम्॥ ८-४१६

विस्रब्धं ब्राह्मणः शूद्राद् द्रव्य-उपादानम् आचरेत्। न हि तस्य-अस्ति किं चित् स्वं भर्तृहार्य-धनो हि सः॥ ८-४१७

वैश्य-शूद्रौ प्रयत्नेन स्वानि कर्माणि कारयेत्। तौ हि च्युतौ स्वकर्मभ्यः क्षोभयेताम् इदं जगत्॥ ८-४१८

अहन्यहन्यवेक्षेत कर्मान्तान् वाहनानि च । आय-व्ययौ च नियताव् आकरान् कोशम् एव च ॥ ८-४१९

एवं सर्वान् इमान् राजा व्यवहारान् समापयन् । व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिम् ॥ ८-४२०

पुरुषस्य स्त्रियाश् च-एव धर्मे वर्त्मनि तिष्ठतोः । संयोगे विप्रयोगे च धर्मान् वक्ष्यामि शाश्वतान् ॥ ९-०१

अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर् दिवा-निशम् । विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे ॥ ९-०२

पिता रक्षति कौमारे भर्ता रक्षति यौवने । रक्षन्ति स्थविरे पुत्रा न स्त्री स्वातन्त्र्यम् अर्हति ॥ ९-०३

काले अ-दाता पिता वाच्यो वाच्यश् च-अन् - उपयन् पतिः । मृते भर्तरि पुत्रस् तु वाच्यो मातुर् अरक्षिता ॥ ९-०४

सूक्ष्मेभ्यो अपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः । द्वयोर् हि कुलयोः शोकम् आवहेयुर् अरक्षिताः ॥ ९-०५

इमं हि सर्ववर्णानां पश्यन्तो धर्मम् उत्तमम् । यतन्ते रक्षितुं भार्यां भर्तारो दुर्बला अपि ॥ ९-०६

स्वां प्रसूतिं चरित्रं च कुलम् आत्मानम् एव च । स्वं च धर्मं प्रयत्नेन जायां रक्षन् हि रक्षति ॥ ९-०७

पतिर् भार्यां संप्रविश्य गर्भो भूत्वा-इह जायते । जायायास् तद् हि जायात्वं यद् अस्यां जायते पुनः ॥ ९-०८

यादृशं भजते हि स्त्री सुतं सूते तथाविधम् । तस्मात् प्रजाविशुद्धि-अर्थं स्त्रियं रक्षेत् प्रयत्नतः ॥ ९-०९

न कश् चिद् योषितः शक्तः प्रसह्य परिरक्षितुम् । एतैर् उपाययोगैस् तु शक्यास् ताः परिरक्षितुम् ॥ ९-१०

अर्थस्य संग्रहे च-एनां व्यये च-एव नियोजयेत् । शौचे धर्मे अन्नपक्त्यां च पारिणाह्यस्य वेक्षणे ॥ ९-११

अरक्षिता गृहे रुद्धाः पुरुषैर् आप्तकारिभिः । आत्मानम् आत्मना यास् तु रक्षेयुस् ताः सुरक्षिताः ॥ ९-१२

पानं दुर्जनसंसर्गः पत्या च विरहो अटनम् । स्वप्नो अन्यगेहवासश् च नारीसंदूषणानि षट् ॥ ९-१३

न-एता रूपं परीक्षन्ते न-असां वयसि संस्थितिः । सुरूपं वा विरूपं वा पुमान् इत्येव भुञ्जते ॥ ९-१४

पौंश्चल्याच् चलचित्ताच् च नैस्नेह्याच् च स्वभावतः । रक्षिता यत्नतो अपि-इह भर्तृष्व् एता विकुर्वते ॥ ९-१५

एवं स्वभावं ज्ञात्वा-असां प्रजापतिनिसर्गजम् । परमं यत्नम् आतिष्ठेत् पुरुषो रक्षणं प्रति ॥ ९-१६

शय्या-असनम् अलङ्कारं कामं क्रोधम् अनार्जवम् । द्रोहभावं कुचर्यां च स्त्रीभ्यो मनुर् अकल्पयत् ॥ ९-१७

न-अस्ति स्त्रीणां क्रिया मन्त्रैर् इति धर्मे व्यवस्थितिः नि-ईन्द्रिया ह्यमन्त्राश् च स्त्रीभ्यो अनृतम् इति स्थितिः ॥ ९-१८

तथा च श्रुतयो बह्व्यो निगीता निगमेष्व् अपि । स्वालक्षण्यपरीक्षार्थं तासां शृणुत निष्कृतीः ॥ ९-१९

यन् मे माता प्रलुलुभे विचरन्त्यपतिव्रता । तन् मे रेतः पिता वृङ्क्ताम् इत्यस्य-एतन् निदर्शनम् ॥ ९-२०

ध्यायत्यनिष्टं यत् किं चित् पाणिग्राहस्य चेतसा। तस्य-एष व्यभिचारस्य निह्नवः सम्यग् उच्यते॥ ९-२१

यादृग्-गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि। तादृग्-गुणा सा भवति समुद्रेण-इव निम्नगा॥ ९-२२

अक्षमाला वसिष्ठेन संयुक्ता-अधमयोनिजा। शारङ्गी मन्दपालेन जगाम-अभ्यर्हणीयताम्॥ ९-२३

एताश् च-अन्याश् च लोके अस्मिन्न् अपकृष्टप्रसूतयः। उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर् भर्तृगुणैः शुभैः॥ ९-२४

एषा-उदिता लोकयात्रा नित्यं स्त्री-पुंसयोः शुभा। प्रेत्य-इह च सुख-उदर्कान् प्रजाधर्मान् निबोधत॥ ९-२५

प्रजनार्थं महा-भागाः पूज-अर्हा गृहदीप्तयः। स्त्रियः श्रियश् च गेहेषु न विशेषो अस्ति कश् चन॥ ९-२६

उत्पादनम् अपत्यस्य जातस्य परिपालनम्। प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्री निबन्धनम्॥ ९-२७

अपत्यं धर्मकार्याणि शुश्रूषा रतिर् उत्तमा। दारा-अधीनस् तथा स्वर्गः पितृणाम् आत्मनश् च ह॥ ९-२८

पतिं या न-अभिचरति मनो-वाग्-देहसंयता। सा भर्तृलोकान् आप्नोति सद्भिः साध्वी-इति च-उच्यते॥ ९-२९

व्यभिचारात् तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम्। सृगालयोनिं च-अप्नोति पापरोगैश् च पीड्यते॥ ९-३०

पुत्रं प्रत्युदितं सद्भिः पूर्वजैश् च महर्षिभिः। विश्वजन्यम् इमं पुण्यम् उपन्यासं निबोधत॥ ९-३१

भर्तरि पुत्रं विजानन्ति श्रुतिद्वैधं तु कर्तरि। आहुर् उत्पादकं के चिद् अपरे क्षेत्रिणं विदुः॥ ९-३२

क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान्। क्षेत्र-बीजसमायोगात् संभवः सर्वदेहिनाम्॥ ९-३३

विशिष्टं कुत्र चिद् बीजं स्त्रीयोनिस् त्व् एव कुत्र चित्। उभयं तु समं यत्र सा प्रसूतिः प्रशस्यते॥ ९-३४

बीजस्य च-एव योन्याश् च बीजम् उत्कृष्टम् उच्यते। सर्वभूतप्रसूतिर् हि बीजलक्षणलक्षिता।९-३५

यादृशं तु-उप्यते बीजं क्षेत्रे काल-उपपादिते। तादृग् रोहति तत् तस्मिन् बीजं स्वैर् व्यञ्जितं गुणैः॥ ९-३६

इयं भूमिर् हि भूतानां शाश्वती योनिर् उच्यते। न च योनिगुणान् कांश् चिद् बीजं पुष्यति पुष्टिषु॥ ९-३७

भूमाव् अप्येककेदारे काल-उप्तानि कृषीवलैः। नानारूपाणि जायन्ते बीजानि-इह स्वभावतः॥ ९-३८

व्रीहयः शालयो मुद्गास् तिला माषास् तथा यवाः। यथाबीजं प्ररोहन्ति लशुनानि-इक्षवस् तथा॥ ९-३९

अन्यद् उप्तं जातम् अन्यद् इत्येतत् - न-उपपद्यते। उप्यते यद् हि यद् बीजं तत् तद् एव प्ररोहति॥ ९-४०

तत् प्राज्ञेन विनीतेन ज्ञान-विज्ञानवेदिना। आयुष्कामेन वप्तव्यं न जातु परयोषिति॥ ९-४१

अत्र गाथा वायुगीताः कीर्तयन्ति पुराविदः। यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे॥ ९-४२

नश्यति-इषुर् यथा विद्धः खे विद्धम् अनुविध्यतः। तथा नश्यति वै क्षिप्रं बीजं परपरिग्रहे॥ ९-४३
पृथोर् अपि-इमां पृथिवीं भार्यां पूर्वविदो विदुः। स्थाणु-चेदस्य केदारम् आहुः शाल्यवतो मृगम्॥ ९-४४
एतावान् एव पुरुषो यत् - जाया-अत्मा प्रजा-इति ह। विप्राः प्राहुस् तथा च-एतद् यो भर्ता सा स्मृत-अङ्गना॥ ९-४५
न निष्क्रय-विसर्गाभ्यां भर्तुर् भार्या विमुच्यते। एवं धर्मं विजानीमः प्राक् प्रजापतिनिर्मितम्॥ ९-४६
सकृद् अंशो निपतति सकृत् कन्या प्रदीयते। सकृद् आह ददानि-इति त्रीण्येतानि सतां सकृत्॥ ९-४७
यथा गो-अश्व-उष्ट्र-दासीषु महिष्य-अजा-अविकासु च। न-उत्पादकः प्रजाभागी तथा-एव-अन्याङ्गनास्व् अपि॥ ९-४८
ये अक्षेत्रिणो बीजवन्तः परक्षेत्रप्रवापिणः। ते वै सस्यस्य जातस्य न लभन्ते फलं क्व चित्॥ ९-४९
यद् अन्यगोषु वृषभो वत्सानां जनयेत् - शतम्। गोमिनाम् एव ते वत्सा मोघं स्कन्दितम् आर्षभम्॥ ९-५०
तथा-एव-अक्षेत्रिणो बीजं परक्षेत्रप्रवापिणः। कुर्वन्ति क्षेत्रिणाम् अर्थं न बीजी लभते फलम्॥ ९-५१
फलं त्व् अनभिसंधाय क्षेत्रिणां बीजिनाम् तथा। प्रत्यक्षं क्षेत्रिणाम् अर्थो बीजाद् योनिर् गलीयसी॥ ९-५२
क्रियाभ्युपगमात् त्व् एतद् बीजार्थं यत् प्रदीयते। तस्य-इह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च॥ ९-५३
ओघ-वाताहृतं बीजं यस्य क्षेत्रे प्ररोहति। क्षेत्रिकस्य-एव तद् बीजं न वप्ता लभते फलम्॥ ९-५४
एष धर्मो गव-अश्वस्य दास्य-उष्ट्र-अज-अविकस्य च। विहंग-महिषीणां च विज्ञेयः प्रसवं प्रति॥ ९-५५
एतद् वः सारफल्गुत्वं बीज-योन्योः प्रकीर्तितम्। अतः परं प्रवक्ष्यामि योषितां धर्मम् आपदि॥ ९-५६
भ्रातुर् ज्येष्ठस्य भार्या या गुरुपत्न्यनुजस्य सा। यवीयसस् तु या भार्या स्नुषा ज्येष्ठस्य सा स्मृता॥ ९-५७
ज्येष्ठो यवीयसो भार्यां यवीयान् वा-अग्रजस्त्रियम्। पतितौ भवतो गत्वा नियुक्ताव् अप्यनापदि॥ ९-५८
देवराद् वा सपिण्डाद् वा स्त्रिया सम्यक्-नियुक्तया। प्रजा-ईप्सिता-अधिगन्तव्या संतानस्य परिक्षये॥ ९-५९
ं विधवायां नियुक्तस् तु घृताक्तो वाग्यतो निशि। एकम् उत्पादयेत् पुत्रं न द्वितीयं कथं चन॥ ९-६०
द्वितीयम् एके प्रजनं मन्यन्ते स्त्रीषु तद्विदः। अनिर्वृतं नियोगार्थं पश्यन्तो धर्मतस् तयोः॥ ९-६१
विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि। गुरुवत् - च स्नुषावत् - च वर्तेयातां परस्परम्॥ ९-६२
नियुक्तौ यौ विधिं हित्वा वर्तेयातां तु कामतः। ताव् उभौ पतितौ स्यातां स्नुषाग-गुरुतल्पगौ॥ ९-६३

न-अन्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः। अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम्॥ ९-६४

न-उद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्व चित्। न विवाहविधाव् उक्तं विधवावेदनं पुनः॥ ९-६५

अयं द्विजैर् हि विद्वद्भिः पशुधर्मो विगर्हितः। मनुष्याणाम् अपि प्रोक्तो वेने राज्यं प्रशासति॥ ९-६६

स महीम् अखिलां भुञ्जन् राजर्षिप्रवरः पुरा। वर्णानां संकरं चक्रे काम-उपहत-चेतनः॥ ९-६७

ततः प्रभृति यो मोहात् प्रमीत-पतिकां स्त्रियम्। नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः॥ ९-६८

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः। ताम् अनेन विधानेन निजो विन्देत देवरः॥ ९-६९

यथाविधि-अधिगम्य-एनां शुक्ल-वस्त्रां शुचि-व्रताम्। मिथो भजेत-अ प्रसवात् सकृत् - सकृद् ऋताव्-ऋतौ॥ ९-७०

न दत्त्वा कस्य चित् कन्यां पुनर् दद्याद् विचक्षणः। दत्त्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषानृतम्॥ ९-७१

विधिवत् प्रतिगृह्य-अपि त्यजेत् कन्यां विगर्हिताम्। व्याधितां विप्रदुष्टां वा छद्मना च-उपपादिताम्॥ ९-७२

यस् तु दोषवतीं कन्याम् अनाख्याय-उपपादयेत्। तस्य तद् वितथं कुर्यात् कन्यादातुर् दुरात्मनः॥ ९-७३

विधाय वृत्तिं भार्यायाः प्रवसेत् कार्यवान् नरः। अवृत्तिकर्शिता हि स्त्री प्रदुष्येत् स्थितिमत्यपि॥ ९-७४

विधाय प्रोषिते वृत्तिं जीवेन् नियमम् आस्थिता। प्रोषिते त्व् अविधाय-एव जीवेत् - शिल्पैर् अगर्हितैः॥ ९-७५

प्रोषितो धर्मकार्यार्थं प्रतीक्ष्यो अष्टौ नरः समाः। विद्यार्थं षड् यशो-अर्थं वा कामार्थं त्रींस् तु वत्सरान्॥ ९-७६

संवत्सरं प्रतीक्षेत द्विषन्तीं योषितं पतिः। ऊर्ध्वं संवत्सरात् त्व् एनां दायं हृत्वा न संवसेत्॥ ९-७७

अतिक्रामेत् प्रमत्तं या मत्तं रोगार्तम् एव वा। सा त्रीन् मासान् परित्याज्या विभूषण-परिच्छदा॥ ९-७८

उन्मत्तं पतितं क्लीबम् अबीजं पापरोगिणम्। न त्यागो अस्ति द्विषन्त्याश् च न च दायापवर्तनम्॥ ९-७९

मद्यपा-असाधुवृत्ता च प्रतिकूला च या भवेत्। व्याधिता वा-अधिवेत्तव्या हिंस्रा-अर्थघ्नी च सर्वदा॥ ९-८०

वन्ध्याष्टमे अधिवेद्या-अब्दे दशमे तु मृत-प्रजा। एकादशे स्त्रीजननी सद्यस् त्व् अप्रियवादिनी॥ ९-८१

या रोगिणी स्यात् तु हिता संपन्ना च-एव शीलतः। सा-अनुज्ञाप्य-अधिवेत्तव्या न-अवमान्या च कर्हि चित्॥ ९-८२

अधिविन्ना तु या नारी निर्गच्छेद् रुषिता गृहात्। सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसंनिधौ॥ ९-८३

प्रतिषिद्धा-अपि चेद् या तु मद्यम् अभ्युदयेष्व् अपि। प्रेक्षा-समाजं गच्छेद् वा सा दण्ड्या कृष्णलानि षट्॥ ९-८४

यदि स्वाश् च-अपराश् च-एव विन्देरन् योषितो द्विजाः। तासां वर्णक्रमेण स्याज् ज्येष्ठ्यं पूजा च वेश्म च॥ ९-८५

भर्तुः शरीरशुश्रूषां धर्मकार्यं च नैत्यकम्। स्वा च-एव कुर्यात् सर्वेषां न-अस्वजातिः कथं चन॥ ९-८६

यस् तु तत् कारयेन् मोहात् स-जात्या स्थितया-अन्यया। यथा ब्राह्मणचाण्डालः पूर्वदृष्टस् तथा-एव सः॥ ९-८७

उत्कृष्टाय-अभिरूपाय वराय सदृशाय च। अप्राप्ताम् अपि तां तस्मै कन्यां दद्याद् यथाविधि॥ ९-८८

कामम् आ मरणात् तिष्ठेद् गृहे कन्या-ऋतुमत्यपि। न च-एव-एनां प्रयच्चेत् तु गुण-हीनाय कर्हि चित्॥ ९-८९

त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती। ऊर्ध्वं तु कालाद् एतस्माद् विन्देत सदृशं पतिम्॥ ९-९०

अदीयमाना भर्तारम् अधिगच्चेद् यदि स्वयम्। न-एनः किं चिद् अवाप्नोति न च यं सा-अधिगच्चति॥ ९-९१

अलङ्कारं न-अददीत पित्र्यं कन्या स्वयंवरा। मातृकं भ्रातृदत्तं वा स्तेना स्याद् यदि तं हरेत्॥ ९-९२

पित्रे न दद्यात्- शुल्कं तु कन्याम् ऋतुमतीं हरन्। स च स्वाम्याद् अतिक्रामेद् ऋतूनां प्रतिरोधनात्॥ ९-९३

त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्। त्र्यष्टवर्षो अष्टवर्षां वा धर्मे सीदति सत्वरः॥ ९-९४

देवदत्तां पतिर् भार्यां विन्दते न-इच्चया-अत्मनः। तां साध्वीं बिभृयान् नित्यं देवानां प्रियम् आचरन्॥ ९-९५

प्रजनार्थं स्त्रियः सृष्टाः संतानार्थं च मानवः। तस्मात् साधारणो धर्मः श्रुतौ पत्न्या सह-उदितः॥ ९-९६

कन्यायां दत्त-शुल्कायां म्रियेत यदि शुल्कदः। देवराय प्रदातव्या यदि कन्या-अनुमन्यते॥ ९-९७

आददीत न शूद्रो अपि शुल्कं दुहितरं ददन्। शुल्कं हि गृह्णन् कुरुते चन्नं दुहितृविक्रयम्॥ ९-९८

एतत् तु न परे चक्रुर् न-अपरे जातु साधवः। यद् अन्यस्य प्रतिज्ञाय पुनर् अन्यस्य दीयते॥ ९-९९

न-अनुशुश्रुम जातु-एतत् पूर्वेष्व् अपि हि जन्मसु। शुल्क-संज्ञेन मूल्येन चन्नं दुहितृविक्रयम्॥ ९-१००

अन्योन्यस्य-अव्यभिचारो भवेद् आ-मरणान्तिकः। एष धर्मः समासेन ज्ञेयः स्त्री-पुंसयोः परः॥ ९-१०१

तथा नित्यं यतेयातां स्त्री-पुंसौ तु कृत-क्रियौ। यथा नाभिचरेतां तौ वियुक्ताव् इतरेतरम्॥ ९-१०२

एष स्त्री-पुंसयोर् उक्तो धर्मो वो रतिसंहितः। आपद्यपत्यप्राप्तिश् च दायधर्मं निबोधत॥ ९-१०३

ऊर्ध्वं पितुश् च मातुश् च समेत्य भ्रातरः समम्। भजेरन् पैतृकं रिक्थम् अनीशास् ते हि जीवतोः॥ ९-१०४

ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनम् अशेषतः। शेषास् तम् उपजीवेयुर् यथा-एव पितरं तथा॥ ९-१०५

ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः। पितॄणाम् अनृणश् च-एव स तस्मात् सर्वम् अर्हति॥ ९-१०६

यस्मिन्न् ऋणं संनयति येन च-अनन्त्यम् अश्नुते। स एव धर्मजः पुत्रः कामजान् इतरान् विदुः॥ ९-१०७

पिता-इव पालयेत् पूत्रान् ज्येष्ठो भ्रातॄण् यवीयसः। पुत्रवत् - च-अपि वर्तेरन् ज्येष्ठे भ्रातरि धर्मतः॥ ९-१०८
ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः। ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिर् अगर्हितः॥ ९-१०९
यो ज्येष्ठो ज्येष्ठ-वृत्तिः स्यान् माता-इव स पिता-इव सः। अज्येष्ठवृत्तिर् यस् तु स्यात् स संपूज्यस् तु बन्धुवत्॥
९-११०
एवं सह वसेयुर् वा पृथग् वा धर्मकाम्यया। पृथग् विवर्धते धर्मस् तस्माद् धर्म्या पृथक्क्रिया॥ ९-१११
ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच् च यद् वरम्। ततो अर्धं मध्यमस्य स्यात् तुरीयं तु यवीयसः॥ ९-११२
ज्येष्ठश् च-एव कनिष्ठश् च संहरेतां यथा-उदितम्। ये अन्ये ज्येष्ठ-कनिष्ठाभ्यां तेषां स्यान् मध्यमं धनम्॥ ९-११३
सर्वेषां धनजातानाम् आददीत-अग्र्यम् अग्रजः। यच् च सातिशयं किं चिद् दशतश् च-आप्नुयाद् वरम्॥ ९-११४
उद्धारो न दशस्व् अस्ति संपन्नानां स्वकर्मसु। यत् किं चिद् एव देयं तु ज्यायसे मान-वर्धनम्॥ ९-११५
एवं समुद्धृत-उद्धारे समान् अंशान् प्रकल्पयेत्। उद्धारे अन् - उद्धृते त्व् एषाम् इयं स्याद् अंशकल्पना॥ ९-११६
एकाधिकं हरेज् ज्येष्ठः पुत्रो अध्यर्धं ततो अनुजः। अंशम् अंशं यवीयांस इति धर्मो व्यवस्थितः॥ ९-११७
स्वेभ्यो अंशेभ्यस् तु कन्याभ्यः प्रदद्युर् भ्रातरः पृथक्। स्वात् स्वाद् अंशाच् चतुर्भागं पतिताः स्युर् अदित्सवः॥
९-११८
अज-अविकं स-एकशफं  न जातु विषमं भजेत्। अज-अविकं तु विषमं ज्येष्ठस्य-एव विधीयते॥ ९-११९
यवीयान् - ज्येष्ठभार्यायां पुत्रम् उत्पादयेद् यदि। समस् तत्र विभागः स्याद् इति धर्मो व्यवस्थितः॥ ९-१२०
उपसर्जनं प्रधानस्य धर्मतो न-उपपद्यते। पिता प्रधानं प्रजने तस्माद् धर्मेण तं भजेत्॥ ९-१२१
पुत्रः कनिष्ठो ज्येष्ठायां कनिष्ठायां च पूर्वजः। कथं तत्र विभागः स्याद् इति चेत् संशयो भवेत्॥ ९-१२२
एकं वृषभम् उद्धारं संहरेत स पूर्वजः। ततो अपरे ज्येष्ठवृषास् तद्-ऊनानां स्वमातृतः॥ ९-१२३
ज्येष्ठस् तु जातो ज्येष्ठायां हरेद् वृषभ-षोडशाः। ततः स्वमातृतः शेषा भजेरन्न् इति धारणा॥ ९-१२४
सदृशस्त्रीषु जातानां पुत्राणाम् अविशेषतः। न मातृतो ज्यैष्ठ्यम् अस्ति जन्मतो ज्यैष्ठ्यम् उच्यते॥  ९-१२५
जन्मज्येष्ठेन च-अह्वानं सुब्रह्मण्यास्व् अपि स्मृतम्। यमयोश् च-एव गर्भेषु जन्मतो ज्येष्ठता स्मृता॥ ९-१२६
अपुत्रो अनेन विधिना सुतां कुर्वीत पुत्रिकाम्। यद् अपत्यं भवेद् अस्यां तन् मम स्यात् स्वधाकरम्॥ ९-१२७

अनेन तु विधानेन पुरा चक्रे अथ पुत्रिकाः। विवृद्ध्यर्थं स्ववंशस्य स्वयं दक्षः प्रजापतिः॥ ९-१२८

ददौ स दश धर्माय कश्यपाय त्रयोदश। सोमाय राज्ञे सत्कृत्य प्रीत-अत्मा सप्तविंशतिम्॥ ९-१२९

यथा-एव-अत्मा तथा पुत्रः पुत्रेण दुहिता समा। तस्याम् आत्मनि तिष्ठन्त्यां कथम् अन्यो धनं हरेत्॥ ९-१३०

मातुस् तु यौतकं यत् स्यात् कुमारीभाग एव सः। दौहित्र एव च हरेद् अपुत्रस्य-अखिलं धनम्॥ ९-१३१

दौहित्रो ह्यखिलं रिक्थम् अपुत्रस्य पितुर् हरेत्। स एव दद्याद् द्वौ पिण्डौ पित्रे मातामहाय च॥ ९-१३२

पौत्र-दौहित्रयोर् लोके न विशेषो अस्ति धर्मतः। तयोर् हि माता-पितरौ संभूतौ तस्य देहतः॥ ९-१३३

पुत्रिकायां कृतायां तु यदि पुत्रो अनुजायते। समस् तत्र विभागः स्यात् - ज्येष्ठता न-अस्ति हि स्त्रियाः॥ ९-१३४

अपुत्रायां मृतायां तु पुत्रिकायां कथं चन। धनं तत् पुत्रिकाभर्ता हरेत-एव-अ-विचारयन्॥ ९-१३५

अकृता वा कृता वा-अपि यं विन्देत् सदृशात् सुतम्। पौत्री मातामहस् तेन दद्यात् पिण्डं हरेद् धनम्॥ ९-१३६

पुत्रेण लोकान् - जयति पौत्रेण-अनन्त्यम् अश्नुते। अथ पुत्रस्य पौत्रेण ब्रध्नस्य-अप्नोति विष्टपम्॥ ९-१३७

पुत् - नाम्नो नरकाद् यस्मात् त्रायते पितरं सुतः। तस्मात् पुत्र इति प्रोक्तः स्वयम् एव स्वयंभुवा॥ ९-१३८

पौत्र-दौहित्रयोर् लोके विशेषो न-उपपद्यते। दौहित्रो अपि ह्यमुत्र-एनं संतारयति पौत्रवत्॥ ९-१३९

मातुः प्रथमतः पिण्डं निर्वपेत् पुत्रिकासुतः। द्वितीयं तु पितुस् तस्यास् तृतीयं तत्पितुः पितुः॥ ९-१४०

उपपन्नो गुणैः सर्वैः पुत्रो यस्य तु दत्त्रिमः। स हरेत-एव तद्रिक्थं संप्राप्तो अप्यन्यगोत्रतः॥ ९-१४१

गोत्र-रिक्थे जनयितुर् न हरेद् दत्त्रिमः क्व चित्। गोत्र-रिक्थानुगः पिण्डो व्यपैति ददतः स्वधा॥ ९-१४२

अनियुक्तासुतश् च-एव पुत्रिण्या-अप्तश् च देवरात्। उभौ तौ न-अर्हतो भागं जारजातक-कामजौ॥ ९-१४३

नियुक्तायाम् अपि पुमान् नार्यां जातो अविधानतः। न-एव-अर्हः पैतृकं रिक्थं पतित-उत्पादितो हि सः॥ ९-१४४

हरेत् तत्र नियुक्तायां जातः पुत्रो यथा-अरसः। क्षेत्रिकस्य तु तद् बीजं धर्मतः प्रसवश् च सः॥ ९-१४५

धनं यो बिभृयाद् भ्रातुर् मृतस्य स्त्रियम् एव च। सो अपत्यं भ्रातुर् उत्पाद्य दद्यात् तस्य-एव तद्धनम्॥ ९-१४६

या नियुक्ता-अन्यतः पुत्रं देवराद् वा-अप्यवाप्नुयात्। तं कामजम् अरिक्थीयं वृथा-उत्पन्नं प्रचक्षते॥ ९-१४७

एतद् विधानं विज्ञेयं विभागस्य-एकयोनिषु। बह्वीषु च-एकजातानां नानास्त्रीषु निबोधत॥ ९-१४८

ब्राह्मणस्य-अनुपूर्व्येण चतस्रस् तु यदि स्त्रियः। तासां पुत्रेषु जातेषु विभागे अयं विधिः स्मृतः॥ ९-१४९

कीनाशो गोवृषो यानम् अलङ्कारश् च वेश्म च। विप्रस्य-अद्धारिकं देयम् एकांशश् च प्रधानतः॥ ९-१५०

त्र्यंशं दायाद् हरेद् विप्रो द्वाव् अंशौ क्षत्रियासुतः। वैश्याजः स-अर्धम् एव-अंशम् अंशं शूद्रासुतो हरेत्॥ ९-१५१

सर्वं वा रिक्थजातं तद् दशधा परिकल्प्य च। धर्म्यं विभागं कुर्वीत विधिना-अनेन धर्मवित्॥ ९-१५२

चतुरो अंशान् हरेद् विप्रस् त्रीन् अंशान् क्षत्रियासुतः। वैश्यापुत्रो हरेद् द्व्यंशं अंशं शूद्रासुतो हरेत्। ९-१५३

यद्यपि स्यात् तु सत् - पुत्रो प्यसत् - पुत्रो पि वा भवेत्। न-अधिकं दशमाद् दद्यात् - शूद्रापुत्राय धर्मतः॥ ९-१५४

ब्राह्मण-क्षत्रिय-विशां शूद्रापुत्रो न रिक्थभाक्। यद् एव-अस्य पिता दद्यात् तद् एव-अस्य धनं भवेत्॥ ९-१५५

सम-वर्णासु वा जाताः सर्वे पुत्रा द्विजन्मनाम्। उद्धारं ज्यायसे दत्त्वा भजेरन्न् इतरे समम्॥ ९-१५६

शूद्रस्य तु सवर्णा-एव न-अन्या भार्या विधीयते। तस्यां जाताः सम-अंशाः स्युर् यदि पुत्रशतं भवेत्॥ ९-१५७

पुत्रान् द्वादश यान् आह नृणां स्वायंभुवो मनुः। तेषां षड् बन्धु-दायादाः षड् अदायाद-बान्धवाः॥ ९-१५८

औरसः क्षेत्रजश् च-एव दत्तः कृत्रिम एव च। गूढ-उत्पन्नो अपविद्धश् च दायादा बान्धवाश् च षट्॥ ९-१५९

कानीनश् च सहोढश् च क्रीतः पौनर्भवस् तथा। स्वयंदत्तश् च शौद्रश् च षड् अदायाद-बान्धवाः॥ ९-१६०

यादृशं फलम् आप्नोति कुप्लवैः संतरन् - जलम्। तादृशं फलम् आप्नोति कुपुत्रैः संतरंस् तमः॥ ९-१६१

यद्येकरिक्थिनौ स्याताम् औरस-क्षेत्रजौ सुतौ। यस्य यत् पैतृकं रिक्थं स तद् गृह्णीत न-इतरः॥ ९-१६२

एक एव-अरसः पुत्रः पित्र्यस्य वसुनः प्रभुः। शेषाणाम् आनृशंस्यार्थं प्रदद्यात् तु प्रजीवनम्॥ ९-१६३

षष्ठं तु क्षेत्रजस्य-अंशं प्रदद्यात् पैतृकाद् धनात्। औरसो विभजन् दायं पित्र्यं पञ्चमम् एव वा॥ ९-१६४

औरस-क्षेत्रजौ पुत्रौ पितृरिक्थस्य भागिनौ। दश-अपरे तु क्रमशो गोत्र-रिक्थांशभागिनः॥ ९-१६५

स्वक्षेत्रे संस्कृतायां तु स्वयम् उत्पादयेद् हि यम्। तम् औरसं विजानीयात् पुत्रं प्राथमकल्पिकम्॥ ९-१६६

यस् तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा। स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृतः॥ ९-१६७

माता पिता वा दद्यातां यम् अद्भिः पुत्रम् आपदि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः॥ ९-१६८

सदृशं तु प्रकुर्याद् यं गुण-दोष-विचक्षणम्। पुत्रं पुत्रगुणैर् युक्तं स विज्ञेयश् च कृत्रिमः॥ ९-१६९

उत्पद्यते गृहे यस् तु न च ज्ञायेत कस्य सः। स गृहे गूढ उत्पन्नस् तस्य स्याद् यस्य तल्पजः॥ ९-१७०

माता-पितृभ्याम् उत्सृष्टं तयोर् अन्यतरेण वा। यं पुत्रं परिगृह्णीयाद् अपविद्धः स उच्यते॥ ९-१७१

पितृवेश्मनि कन्या तु यं पुत्रं जनयेद् रहः। तं कानीनं वदेन् नाम्ना वोढुः कन्या-समुद्भवम्॥ ९-१७२

या गर्भिणी संस्क्रियते ज्ञाता-अज्ञाता-अपि वा सती। वोढुः स गर्भो भवति सहोढ इति च-उच्यते॥ ९-१७३

क्रीणीयाद् यस् त्व् अपत्यार्थं माता-पित्रोर् यम् अन्तिकात्। स क्रीतकः सुतस् तस्य सदृशो असदृशो अपि वा॥ ९-१७४

या पत्या वा परित्यक्ता विधवा वा स्वया-इच्छया। उत्पादयेत् पुनर् भूत्वा स पौनर्भव उच्यते॥ ९-१७५

सा चेद् अक्षत-योनिः स्याद् गत-प्रत्यागता-अपि वा। पौनर्भवेन भर्त्रा सा पुनः संस्कारम् अर्हति॥ ९-१७६

माता-पितृ-विहीनो यस् त्यक्तो वा स्याद् अकारणात्। आत्मानम् अर्पयेद् यस्मै स्वयंदत्तस् तु स स्मृतः॥ ९-१७७

यं ब्राह्मणस् तु शूद्रायां कामाद् उत्पादयेत् सुतम्। स पारयन्न् एव शवस् तस्मात् पारशवः स्मृतः॥ ९-१७८

दास्यां वा दासदास्यां वा यः शूद्रस्य सुतो भवेत्। सो अनुज्ञातो हरेद् अंशम् इति धर्मो व्यवस्थितः॥ ९-१७९

क्षेत्रज-अदीन् सुतान् एतान् एकादश यथा-उदितान्। पुत्रप्रतिनिधीन् आहुः क्रियालोपान् मनीषिणः॥ ९-१८०

य एते अभिहिताः पुत्राः प्रसङ्गाद् अन्यबीजजाः। यस्य ते बीजतो जातास् तस्य ते न-इतरस्य तु॥ ९-१८१

भ्रातृणाम् एकजातानाम् एकश् चेत् पुत्रवान् भवेत्। सर्वांस् तांस् तेन पुत्रेण पुत्रिणो मनुर् अब्रवीत्॥ ९-१८२

सर्वासाम् एक-पत्नीनाम् एका चेत् पुत्रिणी भवेत्। सर्वास् तास् तेन पुत्रेण प्राह पुत्रवतीर् मनुः॥ ९-१८३

श्रेयसः श्रेयसो अलाभे पापीयान् रिक्थम् अर्हति। बहवश् चेत् तु सदृशाः सर्वे रिक्थस्य भागिनः।९-१८४

न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः॥ पिता हरेद् अपुत्रस्य रिक्थं भ्रातर एव च।९-१८५

त्रयाणाम् उदकं कार्यं त्रिषु पिण्डः प्रवर्तते। चतुर्थः संप्रदाता-एषां पञ्चमो न-उपपद्यते।९-१८६

अनन्तरः सपिण्डाद् यस् तस्य तस्य धनं भवेत्। अत ऊर्ध्वं सकुल्यः स्याद् आचार्यः शिष्य एव वा॥ ९-१८७

सर्वेषाम् अप्यभावे तु ब्राह्मणा रिक्थभागिनः। त्रैविद्याः शुचयो दान्तास् तथा धर्मो न हीयते॥ ९-१८८

अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यम् इति स्थितिः। इतरेषां तु वर्णानां सर्व-अभावे हरेन् नृपः॥ ९-१८९

संस्थितस्य-अन् - अपत्यस्य सगोत्रात् पुत्रम् आहरेत्॥ तत्र यद् रिक्थजातं स्यात् तत् तस्मिन् प्रतिपादयेत्।९-१९०

द्वौ तु यौ विवदेयातां द्वाभ्यां जातौ स्त्रिया धने। तयोर् यद् यस्य पित्र्यं स्यात् तत् स गृह्णीत न-इतरः॥ ९-१९१

जनन्यां संस्थितायां तु समं सर्वे सह-उदराः। भजेरन् मातृकं रिक्थं भगिनीश् च स-नाभयः॥ ९-१९२

यास् तासां स्युर् दुहितरस् तासाम् अपि यथार्हतः। मातामह्या धनात् किं चित् प्रदेयं प्रीतिपूर्वकम्॥ ९-१९३

अध्यग्नि-अध्यावाहनिकं दत्तं च प्रीतिकर्मणि। भ्रातृ-मातृ-पितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम्॥ ९-१९४

अन्वाधेयं च यद् दत्तं पत्या प्रीतेन च-एव यत्। पत्यौ जीवति वृत्तायाः प्रजायास् तद् धनं भवेत्॥ ९-१९५

ब्राह्म-दैव-अर्ष-गान्धर्व-प्राजापत्येषु यद् वसु। अप्रजायाम् अतीतायां भर्तुर् एव तद् इष्यते॥ ९-१९६

यत् त्व् अस्याः स्याद् धनं दत्तं विवाहेष्व् आसुर-अदिषु। अप्रजायाम् अतीतायां माता-पित्रोस् तद् इष्यते॥ ९-१९७

स्त्रियां तु यद् भवेद् वित्तं पित्रा दत्तं कथं चन। ब्राह्मणी तद् हरेत् कन्या तदपत्यस्य वा भवेत्॥ ९-१९८

न निर्हारं स्त्रियः कुर्युः कुटुम्बाद् बहुमध्यगात्। स्वकाद् अपि च वित्ताद् हि स्वस्य भर्तुर् अनाज्ञया॥ ९-१९९

पत्यौ जीवति यः स्त्रीभिर् अलङ्कारो धृतो भवेत्। न तं भजेरन् दायादा भजमानाः पतन्ति ते॥ ९-२००

अन् - अंशौ क्लीब-पतितौ जात्यन्ध-बधिरौ तथा। उन्मत्त-जड-मूकाश् च ये च के चिन् नि-ईन्द्रियाः॥ ९-२०१

सर्वेषाम् अपि तु न्याय्यं दातुं शक्त्या मनीषिणा। ग्रास-अच्चादनम् अत्यन्तं पतितो ह्यददद् भवेत्॥ ९-२०२

यद्यर्थिता तु दारैः स्यात् क्लीबादीनां कथं चन। तेषाम् उत्पन्न-तन्तूनाम् अपत्यं दायम् अर्हति॥ ९-२०३

यत् किं चित् पितरि प्रेते धनं ज्येष्ठो अधिगच्चति। भागो यवीयसां तत्र यदि विद्यानुपालिनः॥ ९-२०४

अविद्यानां तु सर्वेषां ईहातश् चेद् धनं भवेत्। समस् तत्र विभागः स्याद् अपित्र्य इति धारणा॥ ९-२०५

विद्याधनं तु यद्यस्य तत् तस्य-एव धनं भवेत्। मैत्र्यम् औद्वाहिकं च-एव माधुपर्किकम् एव च॥ ९-२०६

भ्रातृणां यस् तु न-ईहेत धनं शक्तः स्वकर्मणा। स निर्भाज्यः स्वकाद् अंशात् किं चिद् दत्त्वा-उपजीवनम्॥ ९-२०७

अन् - उपघ्नन् पितृद्रव्यं श्रमेण यद् उपार्जितम्। स्वयम् ईहितलब्धं तन् न-अ-कामो दातुम् अर्हति॥ ९-२०८

पैतृकं तु पिता द्रव्यम् अनवाप्तं यद् आप्नुयात्। न तत् पुत्रैर् भजेत् सार्धम् अकामः स्वयम् अर्जितम्॥ ९-२०९

विभक्ताः सह जीवन्तो विभजेरन् पुनर् यदि। समस् तत्र विभागः स्याज् ज्यैष्ठ्यं तत्र न विद्यते॥ ९-२१०

येषां ज्येष्ठः कनिष्ठो वा हीयेत-अंशप्रदानतः। म्रियेत-अन्यतरो वा-अपि तस्य भागो न लुप्यते॥ ९-२११

सोदर्या विभजेरंस् तं समेत्य सहिताः समम्। भ्रातरो ये च संसृष्टा भागिन्यश् च स-नाभयः॥ ९-२१२

यो ज्येष्ठो विनिकुर्वीत लोभाद् भ्रातॄन् यवीयसः। सो अज्येष्ठः स्याद् अभागश् च नियन्तव्यश् च राजभिः॥ ९-२१३

सर्व एव विकर्मस्था न-अर्हन्ति भ्रातरो धनम्। न च-अ-दत्त्वा कनिष्ठेभ्यो ज्येष्ठः कुर्वीत यौतकम्॥ ९-२१४

भ्रातॄणाम् अविभक्तानां यद्युत्थानं भवेत् सह । न पुत्रभागं विषमं पिता दद्यात् कथं चन ॥ ९-२१५

ऊर्ध्वं विभागात् - जातस् तु पित्र्यम् एव हरेद् धनम् । संसृष्टास् तेन वा ये स्युर् विभजेत स तैः सह ॥ ९-२१६

अन् - अपत्यस्य पुत्रस्य माता दायम् अवाप्नुयात् । मातर्यपि च वृत्तायां पितुर् माता हरेद् धनम् ॥ ९-२१७

ऋणे धने च सर्वस्मिन् प्रविभक्ते यथाविधि । पश्चाद् दृश्येत यत् किं चित् तत् सर्वं समतां नयेत् ॥ ९-२१८

वस्त्रं पत्रम् अलङ्कारं कृतान्नम् उदकं स्त्रियः । योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते ॥ ९-२१९

अयम् उक्तो विभागो वः पुत्राणां च क्रियाविधिः । क्रमशः क्षेत्रजादीनां द्यूतधर्मं निबोधत ॥ ९-२२०

द्यूतं समाह्वयं च-एव राजा राष्ट्रात् - निवारयेत् । राजान्तकरणाव् एतौ द्वौ दोषौ पृथिवीक्षिताम् ॥ ९-२२१

प्रकाशम् एतत् तास्कर्यं यद् देवन-समाह्वयौ । तयोर् नित्यं प्रतीघाते नृपतिर् यत्नवान् भवेत् ॥ ९-२२२

अप्राणिभिर् यत् क्रियते तत् - लोके द्यूतम् उच्यते । प्राणिभिः क्रियते यस् तु स विज्ञेयः समाह्वयः ॥ ९-२२३

द्यूतं समाह्वयं च-एव यः कुर्यात् कारयेत वा । तान् सर्वान् घातयेद् राजा शूद्रांश् च द्विजलिङ्गिनः ॥ ९-२२४

कितवान् कुशीलवान् क्रूरान् पाषण्डस्थांश् च मानवान् । विकर्मस्थान् शौण्डिकांश् च क्षिप्रं निर्वासयेत् पुरात् ॥ ९-२२५

एते राष्ट्रे वर्तमाना राज्ञः प्रच्छन्नतस्कराः । विकर्मक्रियया नित्यं बाधन्ते भद्रिकाः प्रजाः ॥ ९-२२६

द्यूतम् एतत् पुरा कल्पे दृष्टं वैरकरं महत् । तस्माद् द्यूतं न सेवेत हास्यार्थम् अपि बुद्धिमान् ॥ ९-२२७

प्रच्छन्नं वा प्रकाशं वा तत् - निषेवेत यो नरः । तस्य दण्डविकल्पः स्याद् यथा-इष्टं नृपतेस् तथा ॥ ९-२२८

क्षत्र-विश्-शूद्रयोनिस् तु दण्डं दातुम् अशक्नुवन् । आनृण्यं कर्मणा गच्छेद् विप्रो दद्यात् - शनैः शनैः ॥ ९-२२९

स्त्री-बाल-उन्मत्त-वृद्धानां दरिद्राणां च रोगिणाम् । शिफा-विदल-रज्जु-अद्यैर् विदध्यात् - नृपतिर् दमम् ॥ ९-२३०

ये नियुक्तास् तु कार्येषु हन्युः कार्याणि कार्यिणाम् । धन-उष्मणा पच्यमानास् तान् निः-स्वान् कारयेन् नृपः ॥ ९-२३१

कूटशासनकर्तॄंश् च प्रकृतीनां च दूषकान् । स्त्री-बाल-ब्राह्मणघ्नांश् च हन्याद् द्विष्-सेविनस् तथा ॥ ९-२३२

तीरितं च-अनुशिष्टं च यत्र क्व चन यद् भवेत् । कृतं तद् धर्मतो विद्यात् - न तद् भूयो निवर्तयेत् ॥ ९-२३३

अमात्याः प्राड्विवाको वा यत् कुर्युः कार्यम् अन्यथा । तत् स्वयं नृपतिः कुर्यात् तान् सहस्रं च दण्डयेत् ॥ ९-२३४

ब्रह्महा च सुरापश् च स्तेयी च गुरुतल्पगः । एते सर्वे पृथग् ज्ञेया महापातकिनो नराः ॥ ९-२३५

चतुर्णाम् अपि च-एतेषां प्रायश्चित्तम् अकुर्वताम् । शारीरं धनसंयुक्तं दण्डं धर्म्यं प्रकल्पयेत् ॥ ९-२३६

गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः। स्तेये च श्वपदं कार्यं ब्रह्महण्यशिराः पुमान्॥ ९-२३७

असंभोज्या ह्यसंयाज्या असंपाठ्या अ-विवाहिनः। चरेयुः पृथिवीं दीनाः सर्वधर्मबहिष्कृताः॥ ९-२३८

ज्ञाति-संबन्धिभिस् त्व् एते त्यक्तव्याः कृत-लक्षणाः। नि-र्दया नि-र्नमस्कारास् तन् मनोर् अनुशासनम्॥ ९-२३९

प्रायश्चित्तं तु कुर्वाणाः सर्ववर्णा यथोदितम्। न-अङ्क्या राज्ञा ललाटे स्युर् दाप्यास् तु-उत्तमसाहसम्॥ ९-२४०

आगःसु ब्राह्मणस्य-एव कार्यो मध्यमसाहसः। विवास्यो वा भवेद् राष्ट्रात् स-द्रव्यः स-परिच्छदः॥ ९-२४१

इतरे कृतवन्तस् तु पापान्येतान्यकामतः। सर्वस्वहारम् अर्हन्ति कामतस् तु प्रवासनम्॥ ९-२४२

न-अददीत नृपः साधुर् महापातकिनो धनम्। आददानस् तु तत् - लोभात् तेन दोषेण लिप्यते॥ ९-२४३

अप्सु प्रवेश्य तं दण्डं वरुणाय-उपपादयेत्। श्रुत-वृत्त-उपपन्ने वा ब्राह्मणे प्रतिपादयेत्॥ ९-२४४

ईशो दण्डस्य वरुणो राज्ञां दण्डधरो हि सः। ईशः सर्वस्य जगतो ब्राह्मणो वेदपारगः॥ ९-२४५

यत्र वर्जयते राजा पापकृद्भ्यो धनागमम्। तत्र कालेन जायन्ते मानवा दीर्घजीविनः॥ ९-२४६

निष्पद्यन्ते च सस्यानि यथा-उप्तानि विशां पृथक्। बालाश् च न प्रमीयन्ते विकृतं च न जायते॥ ९-२४७

ब्राह्मणान् बाधमानं तु कामाद् अवरवर्णजम्। हन्याच् चित्रैर् वध-उपायैर् उद्वेजनकरैर् नृपः॥ ९-२४८

यावान् अवध्यस्य वधे तावान् वध्यस्य मोक्षणे। अधर्मो नृपतेर् दृष्टो धर्मस् तु विनियच्छतः॥ ९-२४९

उदितो अयं विस्तरशो मिथो विवादमानयोः। अष्टादशसु मार्गेषु व्यवहारस्य निर्णयः॥ ९-२५०

एवं धर्म्याणि कार्याणि सम्यक् कुर्वन् महीपतिः। देशान् अलब्धान् - लिप्सेत लब्धांश् च परिपालयेत्॥ ९-२५१

सम्यक्-निविष्ट-देशस् तु कृत-दुर्गश् च शास्त्रतः। कण्टक-उद्धरणे नित्यम् आतिष्ठेद् यत्नम् उत्तमम्॥ ९-२५२

रक्षनाद् आर्यवृत्तानां कण्टकानां च शोधनात्। नरेन्द्रास् त्रिदिवं यान्ति प्रजापालन-तत्पराः॥ ९-२५३

अशासंस् तस्करान् यस् तु बलिं गृह्णाति पार्थिवः। तस्य प्रक्षुभ्यते राष्ट्रं स्वर्गाच् च परिहीयते॥ ९-२५४

निर्भयं तु भवेद् यस्य राष्ट्रं बाहु-बलाश्रितम्। तस्य तद् वर्धते नित्यं सिच्यमान इव द्रुमः॥ ९-२५५

द्विविधांस् तस्करान् विद्यात् परद्रव्यापहारकान्। प्रकाशांश् च-अप्रकाशांश् च चार-चक्षुर् महीपतिः॥ ९-२५६

प्रकाशवञ्चकास् तेषां नानापण्य-उपजीविनः। प्रच्छन्नवञ्चकास् त्व् एते ये स्तेन-अटविकादयः॥ ९-२५७

उत्कोचकाश् च-अपधिका वञ्चकाः कितवास् तथा। मङ्गलादेश-वृत्ताश् च भद्राश् च-ईक्षणिकैः सह॥ ९-२५८

असम्यक्कारिणश् च-एव महामात्राश् चिकित्सकाः। शिल्प-उपचारयुक्ताश् च निपुणाः पण्ययोषितः॥ ९-२५९

एवमादीन् विजानीयात् प्रकाशांल् लोककण्टकान्। निगूढचारिणश् च-अन्यान् अनार्यान् आर्यलिङ्गिनः॥ ९-२६०

तान् विदित्वा सुचरितैर् गूढैस् तत्कर्मकारिभिः। चारैश् च-अनेक-संस्थानैः प्रोत्साद्य वशम् आनयेत्॥ ९-२६१

तेषां दोषान् अभिख्याप्य स्वे स्वे कर्मणि तत्त्वतः। कुर्वीत शासनं राजा सम्यक् सार-अपराधतः॥ ९-२६२

न हि दण्डाद् ऋते शक्यः कर्तुं पाप-विनिग्रहः। स्तेनानां पापबुद्धीनां निभृतं चरतां क्षितौ॥ ९-२६३

सभा-प्रपा-अपूप-शालावेश-मद्य-अन्न-विक्रयाः। चतुष्पथांश् चैत्यवृक्षाः समाजाः प्रेक्षणानि च॥ ९-२६४

जीर्ण-उद्यानान्यरण्यानि कारुकावेशनानि च। शून्यानि च-अप्यगाराणि वनान्युपवनानि च॥ ९-२६५

एवंविधान् नृपो देशान् गुल्मैः स्थावर-जङ्गमैः। तस्करप्रतिषेधार्थं चारैश् च-अप्यनुचारयेत्॥ ९-२६६

तत्सहायैर् अनुगतैर् नानाकर्मप्रवेदिभिः। विद्याद् उत्सादयेच् च-एव निपुणैः पूर्वतस्करैः॥ ९-२६७

भक्ष्य-भोज्य-उपदेशैश् च ब्राह्मणानां च दर्शनैः। शौर्यकर्मापदेशैश् च कुर्युस् तेषां समागमम्॥ ९-२६८

ये तत्र न-उपसर्पेयुर् मूलप्रणिहिताश् च ये । तान् प्रसह्य नृपो हन्यात् स-मित्र-ज्ञाति-बान्धवान्॥ ९-२६९

न ह-ऊढेन विना चौरं घातयेद् धार्मिको नृपः। सह-ऊढं स-उपकरणं घातयेद् अविचारयन्॥ ९-२७०

ग्रामेष्व् अपि च ये के चिच् चौराणां भक्तदायकाः। भाण्ड-अवकाशदाश् च-एव सर्वांस् तान् अपि घातयेत्॥ ९-२७१

राष्ट्रेषु रक्षाधिकृतान् सामन्तांश् च-एव चोदितान्। अभ्याघातेषु मध्यस्थाञ् शिष्याच् चौरान् इव द्रुतम्॥ ९-२७२

यश् च-अपि धर्मसमयात् प्रच्युतो धर्म-जीवनः। दण्डेन-एव तम् अप्योषेत् स्वकाद् धर्माद् हि विच्युतम्॥ ९-२७३

ग्रामघाते हिताभङ्गे पथि मोषाभिदर्शने। शक्तितो न-अभिधावन्तो निर्वास्याः स-परिच्चदाः॥ ९-२७४

राज्ञः कोशापहर्तॄंश् च प्रतिकूलेषु च स्थितान्। घातयेद् विविधैर् दण्डैर् अरीणां च-उपजापकान्॥ ९-२७५

संधिं चित्त्वा तु ये चौर्यं रात्रौ कुर्वन्ति तस्कराः। तेषां चित्त्वा नृपो हस्तौ तीक्ष्णे शूले निवेशयेत्॥ ९-२७६

अङ्गुलीर् ग्रन्थिभेदस्य चेदयेत् प्रथमे ग्रहे। द्वितीये हस्त-चरणौ तृतीये वधम् अर्हति॥ ९-२७७

अग्निदान् भक्तदांश् च-एव तथा शस्त्र-अवकाशदान्। संनिधातॄंश् च मोषस्य हन्याच् चौरम् इव-ईश्वरः॥ ९-२७८

तडागभेदकं हन्याद् अप्सु शुद्धवधेन वा। यद् वा-अपि प्रतिसंस्कुर्याद् दाप्यस् तु-उत्तमसाहसम्॥ ९-२७९

कोष्ठागार-अयुधागार-देवतागार-भेदकान्। हस्ति-अश्व-रथहर्तॄंश् च हन्याद् एव-अ-विचारयन्॥ ९-२८०

यस् तु पूर्वनिविष्टस्य तडागस्य-उदकं हरेत्। आगमं वा-अप्यपां भिन्द्यात् स दाप्यः पूर्वसाहसम्॥ ९-२८१

समुत्सृजेद् राजमार्गे यस् त्व् अमेध्यम् अनापदि। स द्वौ कार्षापणौ दद्याद् अमेध्यं च-अशु शोधयेत्॥ ९-२८२

आपद्गतो अथ वा वृद्धा गर्भिणी बाल एव वा। परिभाषणम् अर्हन्ति तच् च शोध्यम् इति स्थितिः॥ ९-२८३

चिकित्सकानां सर्वेषां मिथ्याप्रचरतां दमः। अमानुषेषु प्रथमो मानुषेषु तु मध्यमः॥ ९-२८४

संक्रम-ध्वज-यष्टीनां प्रतिमानां च भेदकः। प्रतिकुर्याच् च तत् सर्वं पञ्च दद्यात् - शतानि च॥ ९-२८५

अदूषितानां द्रव्याणां दूषणे भेदने तथा। मणीनाम् अपवेधे च दण्डः प्रथमसाहसः॥ ९-२८६

समैर् हि विषमं यस् तु चरेद् वै मूल्यतो अपि वा। समाप्नुयाद् दमं पूर्वं नरो मध्यमम् एव वा॥ ९-२८७

बन्धनानि च सर्वाणि राजा मार्गे निवेशयेत्। दुःखिता यत्र दृश्येरन् विकृताः पापकारिणह्॥ ९-२८८

प्राकारस्य च भेत्तारं परिखाणां च पूरकम्। द्वाराणां च-एव भङ्क्तारं क्षिप्रम् एव प्रवासयेत्॥ ९-२८९

अभिचारेषु सर्वेषु कर्तव्यो द्विशतो दमः। मूलकर्मणि च-अनाप्तेः कृत्यासु विविधासु च॥ ९-२९०

अबीजविक्रयी च-एव बीज-उत्कृष्टा तथा-एव च। मर्यादाभेदकश् च-एव विकृतं प्राप्नुयाद् वधम्॥ ९-२९१

सर्वकण्टकपापिष्ठं हेमकारं तु पार्थिवः। प्रवर्तमानम् अन्याये चेदयेत् - लवशः क्षुरैः॥ ९-२९२

सीता-द्रव्यापहरणे शस्त्राणाम् औषधस्य च। कालम् आसाद्य कार्यं च राजा दण्डं प्रकल्पयेत्॥ ९-२९३

स्वाम्य-अमात्यौ पुरं राष्ट्रं कोश-दण्डौ सुहृत् तथा। सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यम् उच्यते॥ ९-२९४

सप्तानां प्रकृतीनां तु राज्यस्य-असां यथाक्रमम्। पूर्वं पूर्वं गुरुतरं जानीयाद् व्यसनं महत्॥ ९-२९५

सप्त-अङ्गस्य-इह राज्यस्य विष्टब्धस्य त्रिदण्डवत्। अन्योन्यगुणवैशेष्यात् - न किं चिद् अतिरिच्यते॥ ९-२९६

तेषु तेषु तु कृत्येषु तत् तद् अङ्गं विशिष्यते। येन यत् साध्यते कार्यं तत् तस्मिन् - श्रेष्ठम् उच्यते॥ ९-२९७

चारेण-उत्साहयोगेन क्रियया-एव च कर्मणाम्। स्वशक्तिं परशक्तिं च नित्यं विद्यात् - महीपतिः॥ ९-२९८

पीडनानि च सर्वाणि व्यसनानि तथा-एव च। आरभेत ततः कार्यं संचिन्त्य गुरु-लाघवम्॥ ९-२९९

आरभेत-एव कर्माणि श्रान्तः श्रान्तः पुनः पुनः। कर्माण्यारभमाणं हि पुरुषं श्रीर् निषेवते॥ ९-३००

कृतं त्रेतायुगं च-एव द्वापरं कलिर् एव च। राज्ञो वृत्तानि सर्वाणि राजा हि युगम् उच्यते॥ ९-३०१

कलिः प्रसुप्तो भवति स जाग्रद् द्वापरं युगम्। कर्मस्व् अभ्युद्यतस् त्रेता विचरंस् तु कृतं युगम्॥ ९-३०२

इन्द्रस्य-अर्कस्य वायोश् च यमस्य वरुणस्य च। चन्द्रस्य-अग्नेः पृथिव्याश् च तेजोवृत्तं नृपश् चरेत्॥ ९-३०३

वार्षिकांश् चतुरो मासान् यथा-इन्द्रो अभिप्रवर्षति। तथा-अभिवर्षेत् स्वं राष्ट्रं कामैर् इन्द्रव्रतं चरन्॥ ९-३०४

अष्टौ मासान् यथा-अदित्यस् तोयं हरति रश्मिभिः। तथा हरेत् करं राष्ट्रात् - नित्यम् अर्कव्रतं हि तत्॥ ९-३०५

प्रविश्य सर्वभूतानि यथा चरति मारुतः। तथा चारैः प्रवेष्टव्यं व्रतम् एतद् हि मारुतम्॥ ९-३०६

यथा यमः प्रिय-द्वेष्यौ प्राप्ते काले नियच्छति। तथा राज्ञा नियन्तव्याः प्रजास् तद् हि यमव्रतम्॥ ९-३०७

वरुणेन यथा पाशैर् बद्ध एव-अभिदृश्यते। तथा पापान् निगृह्णीयाद् व्रतम् एतद् हि वारुणम्॥ ९-३०८

परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः। तथा प्रकृतयो यस्मिन् स चान्द्रव्रतिको नृपः॥ ९-३०९

प्रतापयुक्तस् तेजस्वी नित्यं स्यात् पापकर्मसु। दुष्टसामन्तहिंस्रश् च तद् आग्नेयं व्रतं स्मृतम्॥ ९-३१०

यथा सर्वाणि भूतानि धरा धारयते समम्। तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम्॥ ९-३११

एतैर् उपायैर् अन्यैश् च युक्तो नित्यम् अतन्द्रितः। स्तेनान् राजा निगृह्णीयात् स्वराष्ट्रे पर एव च॥ ९-३१२

पराम् अप्यापदं प्राप्तो ब्राह्मणान् न प्रकोपयेत्। ते ह्येनं कुपिता हन्युः सद्यः स-बल-वाहनम्॥ ९-३१३

यैः कृतः सर्वभक्ष्यो अग्निर् अपेयश् च महोदधिः। क्षयी च-अप्यायितः सोमः को न नश्येत् प्रकोप्य तान्॥ ९-३१४

लोकान् अन्यान् सृजेयुर् ये लोकपालांश् च कोपिताः। देवान् कुर्युर् अदेवांश् च कः क्षिण्वंस् तान् समृध्नुयात्॥ ९-३१५

यान् उपाश्रित्य तिष्ठन्ति लोका देवाश् च सर्वदा। ब्रह्म च-एव धनं येषां को हिंस्यात् ताञ् जिजीविषुः॥ ९-३१६

अविद्वांश् च-एव विद्वांश् च ब्राह्मणो दैवतं महत्। प्रणीतश् च-अ-प्रणीतश् च यथा-अग्निर् दैवतं महत्॥ ९-३१७

श्मशानेष्व् अपि तेजस्वी पावको न-एव दुष्यति। हूयमानश् च यज्ञेषु भूय एव-अभिवर्धते॥ ९-३१८

एवं यद्यप्यनिष्टेषु वर्तन्ते सर्वकर्मसु। सर्वथा ब्राह्मणाः पूज्याः परमं दैवतम् हि तत्॥ ९-३१९

क्षत्रस्य-अतिप्रवृद्धस्य ब्राह्मणान् प्रति सर्वशः। ब्रह्म-एव संनियन्तृ स्यात् क्षत्रं हि ब्रह्म-संभवम्॥ ९-३२०

अद्भ्यो अग्निर् ब्रह्मतः क्षत्रम् अश्मनो लोहम् उत्थितम्। तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति॥ ९-३२१

न-अ-ब्रह्म क्षत्रम् ऋध्नोति न-अ-क्षत्रं ब्रह्म वर्धते। ब्रह्म क्षत्रं च संपृक्तम् इह च-अमुत्र वर्धते॥ ९-३२२

दत्त्वा धनं तु विप्रेभ्यः सर्वदण्डसमुत्थितम्। पुत्रे राज्यं समासृज्य कुर्वीत प्रायणं रणे॥ ९-३२३

एवं चरन् सदा युक्तो राजधर्मेषु पार्थिवः। हितेषु च-एव लोकस्य सर्वान् भृत्यान् नियोजयेत्॥ ९-३२४

एषो अ-खिलः कर्मविधिर् उक्तो राज्ञः सनातनः। इमं कर्मविधिं विद्यात् क्रमशो वैश्य-शूद्रयोः॥ ९-३२५

वैश्यस् तु कृत-संस्कारः कृत्वा दारपरिग्रहम्। वार्तायां नित्ययुक्तः स्यात् पशूनां च-एव रक्षणे॥ ९-३२६

प्रजापतिर् हि वैश्याय सृष्ट्वा परिददे पशून्। ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः॥ ९-३२७

न च वैश्यस्य कामः स्यान् न रक्षेयं पशून् इति। वैश्ये च-इच्छति न-अन्येन रक्षितव्याः कथं चन॥ ९-३२८

मणि-मुक्ता-प्रवालानां लोहानां तान्तवस्य च। गन्धानां च रसानां च विद्याद् अर्घ-बल-अबलम्॥ ९-३२९

बीजानाम् उप्तिविद्-च स्यात् क्षेत्रदोष-गुणस्य च। मानयोगं च जानीयात् तुलायोगांश् च सर्वशः।९-३३०

सार-असारं च भाण्डानां देशानां च गुण-अगुणान्। लाभ-अलाभं च पण्यानां पशूनां परिवर्धनम्॥ ९-३३१

भृत्यानां च भृतिं विद्याद् भाषाश् च विविधा नृणां। द्रव्याणां स्थान-योगांश् च क्रय-विक्रयम् एव च॥ ९-३३२

धर्मेण च द्रव्यवृद्धाव् आतिष्ठेद् यत्नम् उत्तमम्। दद्याच् च सर्वभूतानाम् अन्नम् एव प्रयत्नतः॥ ९-३३३

विप्राणां वेदविदुषां गृहस्थानां यशस्विनाम्। शुश्रूषा-एव तु शूद्रस्य धर्मो नैश्रेयसः परः॥ ९-३३४

शुचिर् उत्कृष्टशुश्रूषुर् मृदु-वाग् अनहंकृतः। ब्राह्मणादि-अश्रयो नित्यम् उत्कृष्टां जातिम् अश्नुते॥ ९-३३५

एषो अनापदि वर्णानाम् उक्तः कर्मविधिः शुभः। आपद्यपि हि यस् तेषां क्रमशस् तन् निबोधत॥ ९-३३६

१अधीयीरंस् त्रयो वर्णाः स्वकर्मस्था द्विजातयः। प्रब्रूयाद् ब्राह्मणस् त्व् एषां न-इतराव् इति निश्चयः॥ १०-०१

सर्वेषां ब्राह्मणो विद्याद् वृत्त्युपायान् यथाविधि। प्रब्रूयाद् इतरेभ्यश् च स्वयं च-एव तथा भवेत्॥ १०-०२

वैशेष्यात् प्रकृतिश्रैष्ठ्यात्- नियमस्य च धारणात्। संस्कारस्य विशेषाच् च वर्णानां ब्राह्मणः प्रभुः॥ १०-०३

ब्राह्मणः क्षत्रियो वैश्यस् त्रयो वर्णा द्विजातयः। चतुर्थ एकजातिस् तु शूद्रो न-अस्ति तु पञ्चमः॥ १०-०४

सर्ववर्णेषु तुल्यासु पत्नीष्व् अक्षत-योनिषु। आनुलोम्येन संभूता जात्या ज्ञेयास् त एव ते॥ १०-०५

स्त्रीष्व् अनन्तरजातासु द्विजैर् उत्पादितान् सुतान्। सदृशान् एव तान् आहुर् मातृदोषविगर्हितान्॥ १०-०६

अनन्तरासु जातानां विधिर् एष सनातनः। द्वि-एकान्तरासु जातानां धर्म्यं विद्याद् इमं विधिम्॥ १०-०७

ब्राह्मणाद् वैश्यकन्यायाम् अम्बष्ठो नाम जायते। निषादः शूद्रकन्यायां यः पारशव उच्यते॥ १०-०८

क्षत्रियात्- शूद्रकन्यायां क्रूराचारविहारवान्। क्षत्र-शूद्र-वपुर् जन्तुर् उग्रो नाम प्रजायते॥ १०-०९

विप्रस्य त्रिषु वर्णेषु नृपतेर् वर्णयोर् द्वयोः। वैश्यस्य वर्णे च-एकस्मिन् षड् एते अपसदाः स्मृताः॥ १०-१०

क्षत्रियाद् विप्रकन्यायां सूतो भवति जातितः। वैश्यान् मागध-वैदेहौ राज-विप्र-अङ्गनासुतौ ॥ १०-११

शूद्राद् आयोगवः क्षत्ता चण्डालश् च-अधमो नृणाम्। वैश्य-राजन्य-विप्रासु जायन्ते वर्णसंकराः ॥ १०-१२

एकान्तरे त्व् आनुलोम्याद् अम्बष्ठ-उग्रौ यथा स्मृतौ। क्षत्तृ-वैदेहकौ तद्वत् प्रातिलोम्ये अपि जन्मनि ॥ १०-१३

पुत्रा ये अनन्तरस्त्रीजाः क्रमेण-उक्ता द्विजन्मनाम्। तान् अनन्तर-नाम्नस् तु मातृदोषात् प्रचक्षते ॥ १०-१४

ब्राह्मणाद् उग्रकन्यायाम् आवृतो नाम जायते। आभीरो अम्बष्ठकन्यायाम् आयोगव्यां तु धिग्वणः ॥ १०-१५

आयोगवश् च क्षत्ता च चण्डालश् च-अधमो नृणाम्। प्रातिलोम्येन जायन्ते शूद्राद् अपसदास् त्रयः ॥ १०-१६

वैश्यान् मागध-वैदेहौ क्षत्रियात् सूत एव तु। प्रतीपम् एते जायन्ते परे अप्यपसदास् त्रयः ॥ १०-१७

जातो निषादात् - शूद्रायां जात्या भवति पुक्कसः। शूद्राज् जातो निषाद्यां तु स वै कुक्कुटकः स्मृतः ॥ १०-१८

क्षत्तुर् जातस् तथा-उग्रायां श्वपाक इति कीर्त्यते। वैदेहकेन त्व् अम्बष्ठ्याम् उत्पन्नो वेण उच्यते ॥ १०-१९

द्विजातयः सवर्णासु जनयन्त्यव्रतांस् तु यान्। तान् सावित्रीपरिभ्रष्टान् व्रात्यान् इति विनिर्दिशेत् ॥ १०-२०

व्रात्यात् तु जायते विप्रात् पाप-अत्मा भूर्जकण्टकः। आवन्त्य-वाटधानौ च पुष्पधः शैख एव च ॥ १०-२१

झल्लो मल्लश् च राजन्याद् व्रात्यात् - निच्छिविर् एव च। नटश् च करणश् च-एव खसो द्रविड एव च ॥ १०-२२

वैश्यात् तु जायते व्रात्यात् सुधन्वा-अचार्य एव च। कारुषश् च विजन्मा च मैत्रः सात्वत एव च ॥ १०-२३

व्यभिचारेण वर्णानाम् अवेद्यावेदनेन च। स्वकर्मणां च त्यागेन जायन्ते वर्णसंकराः ॥ १०-२४

संकीर्ण-योनयो ये तु प्रतिलोम-अनुलोम-जाः। अन्योन्यव्यतिषक्ताश् च तान् प्रवक्ष्याम्यशेषतः ॥ १०-२५

सूतो वैदेहकश् च-एव चण्डालश् च नराधमः। मागधः तथा-अयोगव एव च क्षत्रजातिश् च ॥ १०-२६

एते षट् सदृशान् वर्णाञ् जनयन्ति स्वयोनिषु। मातृजात्यां प्रसूयन्ते प्रवारासु च योनिषु ॥ १०-२७

यथा त्रयाणां वर्णानां द्वयोर् आत्मा-अस्य जायते। आनन्तर्यात् स्वयोन्यां तु तथा बाह्येष्व् अपि क्रमात् ॥ १०-२८

ते च-अपि बाह्यान् सुबहूंस् ततो अप्यधिकदूषितान्। परस्परस्य दारेषु जनयन्ति विगर्हितान् ॥ १०-२९

यथा-एव शूद्रो ब्राह्मण्यां बाह्यं जन्तुं प्रसूयते। तथा बाह्यतरं बाह्यश् चातुर्वर्ण्ये प्रसूयते ॥ १०-३०

प्रतिकूलं वर्तमाना बाह्या बाह्यतरान् पुनः। हीना हीनान् प्रसूयन्ते वर्णान् पञ्चदश-एव तु ॥ १०-३१

प्रसाधन-उपचारज्ञम् अदासं दासजीवनम्। सैरिन्ध्रं वागुरा-वृत्तिं सूते दस्युर् अयोगवे ॥ १०-३२

मैत्रेयकं तु वैदेहो माधूकं संप्रसूयते। नृन् प्रशंसत्यजस्त्रं यो घण्टाताडो अरुण-उदये॥ १०-३३

निषादो मार्गवं सूते दासं नौकर्मजीविनम्। कैवर्तम् इति यं प्राहुर् आर्यावर्तनिवासिनः॥ १०-३४

मृतवस्त्रभृत्स्व् नारीषु गर्हित-अन्न-अशनासु च। भवन्त्यायोगवीष्व् एते जातिहीनाः पृथक् त्रयः॥ १०-३५

कारावरो निषादात् तु चर्मकारः प्रसूयते। वैदेहिकाद् अन्ध्र-मेदौ बहिर्ग्राम-प्रतिश्रयौ॥ १०-३६

चण्डालात् पाण्डुसोपाकस् त्वक्सारव्यवहारवान्। आहिण्डिको निषादेन वैदेह्याम् एव जायते॥ १०-३७

चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान्। पुक्कस्यां जायते पापः सदा सज्जनगर्हितः॥ १०-३८

निषादस्त्री तु चण्डालात् पुत्रम् अन्त्यावसायिनम्। श्मशान-गोचरं सूते बाह्यानाम् अपि गर्हितम्॥ १०-३९

संकरे जातयस् त्व् एताः पितृ-मातृ-प्रदर्शिताः। प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः॥ १०-४०

स्वजातिज-अनन्तरजाः षट् सुता द्विजधर्मिणः। शूद्राणां तु स-धर्माणः सर्वे अपध्वंसजाः स्मृताः॥ १०-४१

तपो-बीज-प्रभावैस् तु ते गच्छन्ति युगे युगे। उत्कर्षं च-अपकर्षं च मनुष्येष्व् इह जन्मतः॥ १०-४२

शनकैस् तु क्रियालोपाद् इमाः क्षत्रिय-जातयः। वृषलत्वं गता लोके ब्राह्मणादर्शनेन च॥ १०-४३

पौण्ड्रकाश् चौड्र-द्रविडाः काम्बोजा यवनाः शकाः। पारदा-पह्लवाश् चीनाः किराता दरदाः खशाः॥ १०-४४

मुख-बाहु-ऊरु-पद्-जानां या लोके जातयो बहिः। म्लेच्छ-वाचश् च-अर्य-वाचः सर्वे ते दस्यवः स्मृताः॥ १०-४५

ये द्विजानाम् अपसदा ये च-अपध्वंसजाः स्मृताः। ते निन्दितैर् वर्तयेयुर् द्विजानाम् एव कर्मभिः॥ १०-४६

सूतानाम् अश्व-सारथ्यम् अम्बष्ठानां चिकित्सनम्। वैदेहकानां स्त्रीकार्यं मागधानां वणिक्पथः॥ १०-४७

मत्स्यघातो निषादानां त्वष्टिस् त्व् आयोगवस्य च। मेद-अन्ध्र-चुञ्चु-मद्गूनाम् आरण्यपशुहिंसनम्॥ १०-४८

क्षत्तृ-उग्र-पुक्कसानां तु बिलौकोवध-बन्धनम्। धिग्वणानां चर्मकार्यं वेणानां भाण्डवादनम्॥ १०-४९

चैत्यद्रुम-श्मशानेषु शैलेषु-उपवनेषु च। वसेयुर् एते विज्ञाता वर्तयन्तः स्वकर्मभिः॥ १०-५०

चण्डाल-श्वपचानां तु बहिर् ग्रामात् प्रतिश्रयः। अपपात्राश् च कर्तव्या धनम् एषां श्व-गर्दभम्॥ १०-५१

वासांसि मृतचैलानि भिन्नभाण्डेषु भोजनम्। कार्ष्णायसम् अलङ्कारः परिव्रज्या च नित्यशः॥ १०-५२

न तैः समयम् अन्विच्छेत् पुरुषो धर्मम् आचरन्। व्यवहारो मिथस् तेषां विवाहः सदृशैः सह॥ १०-५३

अन्नम् एषां पराधीनं देयं स्याद् भिन्नभाजने। रात्रौ न विचरेयुस् ते ग्रामेषु नगरेषु च॥ १०-५४

दिवा चरेयुः कार्यार्थं चिह्निता राजशासनैः। अबान्धवं शवं च-एव निर्हरेयुर् इति स्थितिः॥ १०-५५

वध्यांश् च हन्युः सततं यथाशास्त्रं नृपाज्ञया। वध्यवासांसि गृह्णीयुः शय्याश् च-अभरणानि च॥ १०-५६

वर्णापेतम् अविज्ञातं नरं कलुषयोनिजम्। आर्य-रूपम् इव-अनार्यं कर्मभिः स्वैर् विभावयेत्॥ १०-५७

अनार्यता निष्ठुरता क्रूरता निष्क्रियात्मता। पुरुषं व्यञ्जयन्ति-इह लोके कलुषयोनिजम्॥ १०-५८

पित्र्यं वा भजते शीलं मातुर् वा-उभयम् एव वा। न कथं चन दुर्योनिः प्रकृतिं स्वां नियच्छति॥ १०-५९

कुले मुख्ये अपि जातस्य यस्य स्याद् योनिसंकरः। संश्रयत्येव तत् - शीलं नरो अल्पम् अपि वा बहु॥ १०-६०

यत्र त्व् एते परिध्वंसाज् जायन्ते वर्णदूषकाः। राष्ट्रिकैः सह तद् राष्ट्रं क्षिप्रम् एव विनश्यति॥ १०-६१

ब्राह्मणार्थे गवार्थे वा देहत्यागो अन् - उपस्कृतः। स्त्री-बालाभ्युपपत्तौ च बाह्यानां सिद्धिकारणम्॥ १०-६२

अहिंसा सत्यम् अस्तेयं शौचम् इन्द्रियनिग्रहः। एतं सामासिकं धर्मं चातुर्वर्ण्ये अब्रवीन् मनुः॥ १०-६३

शूद्रायां ब्राह्मणाज् जातः श्रेयसा चेत् प्रजायते। अश्रेयान् श्रेयसीं जातिं गच्छत्या सप्तमाद् युगात्॥ १०-६४

शूद्रो ब्राह्मणताम् एति ब्राह्मणश् च-एति शूद्रताम्। क्षत्रियाज् जातम् एवं तु विद्याद् वैश्यात् तथा-एव च॥ १०-६५

अनार्यायां समुत्पन्नो ब्राह्मणात् तु यदृच्छया। ब्राह्मण्याम् अप्यनार्यात् तु श्रेयस्त्वं क्व-इति चेद् भवेत॥ १०-६६

जातो नार्याम् अनार्यायाम् आर्याद् आर्यो भवेद् गुणैः। जातो अप्यनार्याद् आर्यायाम् अनार्य इति निश्चयः॥ १०-६७

ताव् उभाव् अप्यसंस्कार्याव् इति धर्मो व्यवस्थितः। वैगुण्याज् जन्मनः पूर्व उत्तरः प्रतिलोमतः॥ १०-६८

सुबीजं च-एव सुक्षेत्रे जातं संपद्यते यथा। तथा-अर्याज् जात आर्यायां सर्वं संस्कारम् अर्हति॥ १०-६९

बीजम् एके प्रशंसन्ति क्षेत्रम् अन्ये मनीषिणः। बीज-क्षेत्रे तथा-एव-अन्ये तत्र-इयं तु व्यवस्थितिः॥ १०-७०

अक्षेत्रे बीजम् उत्सृष्टम् अन्तरा-एव विनश्यति। अबीजकम् अपि क्षेत्रं केवलं स्थण्डिलं भवेत्।१०-७१

यस्माद् बीजप्रभावेण तिर्यग्जा ऋषयो अभवन्। पूजिताश् च प्रशस्ताश् च तस्माद् बीजं प्रशस्यते॥ १०-७२

अनार्यम् आर्य-कर्माणम् आर्यं च-अनार्यकर्मिणम्। संप्रधार्य-अब्रवीद् धाता न समौ न-असमाव् इति॥ १०-७३

ब्राह्मणा ब्रह्मयोनिस्था ये स्वकर्मण्यवस्थिताः। ते सम्यग् उपजीवेयुः षट् कर्माणि यथाक्रमम्॥ १०-७४

अध्यापनम् अध्ययनं यजनं याजनं तथा। दानं प्रतिग्रहश् च-एव षट् कर्माण्यग्रजन्मनः॥ १०-७५

षण्णां तु कर्मणाम् अस्य त्रीणि कर्माणि जीविका। याजन-अध्यापने च-एव विशुद्धाच् च प्रतिग्रहः॥ १०-७६

त्रयो धर्मा निवर्तन्ते ब्राह्मणात् क्षत्रियं प्रति । अध्यापनं याजनं च तृतीयश् च प्रतिग्रहः ॥ १०-७७

वैश्यं प्रति तथा-एव-एते निवर्तेरन्न् इति स्थितिः । न तौ प्रति हि तान् धर्मान् मनुर् आह प्रजापतिः ॥ १०-७८

शस्त्र-अस्त्रभृत्त्वं क्षत्रस्य वणिक्-पशु-कृषिर् विषः । आजीवनार्थं धर्मस् तु दानम् अध्ययनं यजिः ॥ १०-७९

वेदाभ्यासो ब्राह्मणस्य क्षत्रियस्य च रक्षणम् । वार्ताकर्म-एव वैश्यस्य विशिष्टानि स्वकर्मसु ॥ १०-८०

अजीवंस् तु यथा-उक्तेन ब्राह्मणः स्वेन कर्मणा । जीवेत् क्षत्रियधर्मेण स ह्यस्य प्रत्यनन्तरः ॥ १०-८१

उभाभ्याम् अप्यजीवंस् तु कथं स्याद् इति चेद् भवेत् । कृषि-गोरक्षम् आस्थाय जीवेद् वैश्यस्य जीविकाम् ॥ १०-८२

वैश्यवृत्त्या-अपि जीवंस् तु ब्राह्मणः क्सत्रियो अपि वा । हिंसा-प्रायां पराधीनां कृषिं यत्नेन वर्जयेत् ॥ १०-८३

कृषिं साधु-इति मन्यन्ते सा वृत्तिः सद्विगर्हिताः । भूमिं भूमिशयांश् च-एव हन्ति काष्ठम् अयो-मुखम् ॥ १०-८४

इदं तु वृत्तिवैकल्यात् त्यजतो धर्मनैपुणं । विश्-पण्यम् उद्धृत-उद्धारं विक्रेयं वित्तवर्धनम् ॥ १०-८५

सर्वान् रसान् अपोहेत कृतान्नं च तिलैः सह । अश्मनो लवणं च-एव पशवो ये च मानुषाः ॥ १०-८६

सर्वं च तान्तवं रक्तं शाण-क्षौम-अविकानि च । अपि चेत् स्युर् अरक्तानि फल-मूले तथा-ओषधीः ॥ १०-८७

अपः शस्त्रं विषं मांसं सोमं गन्धांश् च सर्वशः । क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान् ॥ १०-८८

आरण्यांश् च पशून् सर्वान् दंष्ट्रिणश् च वयांसि च । मद्यं नीलिं च लाक्षां च सर्वांश् च-एक-शफांस् तथा ॥ १०-८९

कामम् उत्पाद्य कृष्यां तु स्वयम् एव कृषीवलः । विक्रीणीत तिलान् - शूद्रान् धर्मार्थम् अचिरस्थितान् ॥ १०-९०

भोजन-अभ्यञ्जनाद् दानाद् यद् अन्यत् कुरुते तिलैः । कृमिभूतः श्वविष्ठायां पितृभिः सह मज्जति ॥ १०-९१

सद्यः पतति मांसेन लाक्षया लवणेन च । त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् ॥ १०-९२

इतरेषां तु पण्यानां विक्रयाद् इह कामतः । ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्चति ॥ १०-९३

रसा रसैर् निमातव्या न त्व् एव लवणं रसैः । कृतान्नं च कृतान्नेन  तिला धान्येन तत्समाः ॥ १०-९४

जीवेद् एतेन राजन्यः सर्वेण-अप्यनयं गतः । न त्व् एव ज्यायसीं वृत्तिम् अभिमन्येत कर्हि चित् ॥ १०-९५

यो लोभाद् अधमो जात्या जीवेद् उत्कृष्ट-कर्मभिः । तं राजा निर्धनं कृत्वा क्षिप्रम् एव प्रवासयेत् ॥ १०-९६

वरं स्वधर्मो विगुणो न पारक्यः स्वनुष्ठितः । परधर्मेण जीवन् हि सद्यः पतति जातितः ॥ १०-९७

वैश्यो अ-जीवन् स्वधर्मेण शूद्रवृत्त्या-अपि वर्तयेत् । अनाचरन्न् अकार्याणि निवर्तेत च शक्तिमान् ॥ १०-९८

अशक्नुवंस् तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनाम्। पुत्र-दारात्ययं प्राप्तो जीवेत् कारुक-कर्मभिः॥ १०-९९

यैः कर्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः। तानि कारुक-कर्माणि शिल्पानि विविधानि च॥ १०-१००

वैश्यवृत्तिम् अनातिष्ठन् ब्राह्मणः स्वे पथि स्थितः। अवृत्तिकर्षितः सीदन्न् इमं धर्मं समाचरेत्॥ १०-१०१

सर्वतः प्रतिगृह्णीयाद् ब्राह्मणस् त्व् अनयं गतः। पवित्रं दुष्यति-इत्येतद् धर्मतो न-उपपद्यते॥ १०-१०२

न-अध्यापनाद् याजनाद् वा गर्हिताद् वा प्रतिग्रहात्। दोषो भवति विप्राणां ज्वलन-अम्बु-समा हि ते॥ १०-१०३

जीवितात्ययम् आपन्नो यो अन्नम् अत्ति ततस् ततः। आकाशम् इव पङ्केन न स पापेन लिप्यते॥ १०-१०४

अजीगर्तः सुतं हन्तुम् उपासर्पद् बुभुक्षितः। न च-अलिप्यत पापेन क्षुत्प्रतीकारम् आचरन्॥ १०-१०५

श्वमांसम् इच्छन् आर्तो अत्तुं धर्म-अधर्मविचक्षणः। प्राणानां परिरक्षार्थं वामदेवो न लिप्तवान्॥ १०-१०६

भरद्वाजः क्षुधार्तस् तु स-पुत्रो विजने वने। बह्वीर् गाः प्रतिजग्राह वृधोस् तक्ष्णो महातपाः॥ १०-१०७

क्षुधार्तश् च-अत्तुम् अभ्यागाद् विश्वामित्रः श्वजाघनीम्। चण्डालहस्ताद् आदाय धर्म-अधर्मविचक्षणः॥ १०-१०८

प्रतिग्रहाद् याजनाद् वा तथा-एव-अध्यापनाद् अपि। प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः॥ १०-१०९

याजन-अध्यापने नित्यं क्रियेते संस्कृत-अत्मनाम्। प्रतिग्रहस् तु क्रियते शूद्राद् अप्यन्त्य-जन्मनः॥ १०-११०

जप-होमैर् अपैत्येनो याजन-अध्यापनैः कृतम्। प्रतिग्रहनिमित्तं तु त्यागेन तपसा-एव च॥ १०-१११

शिल-उञ्छम् अप्याददीत विप्रो अ-जीवन् यतस् ततः। प्रतिग्रहात्- शिलः श्रेयांस् ततो अप्युञ्छः प्रशस्यते॥
१०-११२

सीदद्भिः कुप्यम् इच्छद्भिर् धने वा पृथिवीपतिः। याच्यः स्यात् स्नातकैर् विप्रैर् अदित्संस् त्यागम् अर्हति॥ १०-११३

अकृतं च कृतात् क्षेत्राद् गौर् अजाविकम् एव च। हिरण्यं धान्यम् अन्नं च पूर्वं पूर्वम् अदोषवत्॥ १०-११४

सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः। प्रयोगः कर्मयोगश् च सत्प्रतिग्रह एव च॥ १०-११५

विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः। धृतिर् भैक्षं कुसीदं च दश जीवनहेतवः॥ १०-११६

ब्राह्मणः क्षत्रियो वा-अपि वृद्धिं न-एव प्रयोजयेत्। कामं तु खलु धर्मार्थं दद्यात् पापीयसे अल्पिकाम्॥ १०-११७

चतुर्थम् आददानो अपि क्षत्रियो भागम् आपदि। प्रजा रक्षन् परं शक्त्या किल्बिषात् प्रतिमुच्यते॥ १०-११८

स्वधर्मो विजयस् तस्य न-अहवे स्यात् पराङ्-मुखः। शस्त्रेण वैश्यान् रक्षित्वा धर्म्यम् आहारयेद् बलिम्॥ १०-११९

धान्ये अष्टमं विशां शुल्कं विंशं कार्षापण-अवरम्। कर्म-उपकरणाः शूद्राः कारवः शिल्पिनस् तथा ॥ १०-१२०

शूद्रस् तु वृत्तिम् आकाङ्क्षन् क्षत्रम् आराधयेद् यदि। धनिनं वा-अप्युपाराध्य वैश्यं शूद्रो जिजीविषेत्॥ १०-१२१

स्वर्गार्थम् उभयार्थं वा विप्रान् आराधयेत् तु सः। जातब्राह्मण-शब्दस्य सा ह्यस्य कृतकृत्यता॥ १०-१२२

विप्रसेवा-एव शूद्रस्य विशिष्टं कर्म कीर्त्यते। यद् अतो अन्यद् हि कुरुते तद् भवत्यस्य निष्फलम्॥ १०-१२३

प्रकल्प्या तस्य तैर् वृत्तिः स्वकुटुम्बाद् यथार्हतः। शक्तिं च-अवेक्ष्य दाक्ष्यं च भृत्यानां च परिग्रहम्॥ १०-१२४

उच्छिष्टम् अन्नं दातव्यं जीर्णानि वसनानि च। पुलाकाश् च-एव धान्यानां जीर्णाश् च-एव परिच्छदाः॥ १०-१२५

न शूद्रे पातकं किं चिन् न च संस्कारम् अर्हति। न-अस्य-अधिकारो धर्मे अस्ति न धर्मात् प्रतिषेधनम्॥ १०-१२६

धर्म-इप्सवस् तु धर्मज्ञाः सतां वृत्तम् अनुष्ठिताः। मन्त्रवर्ज्यं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च॥ १०-१२७

यथा यथा हि सद्वृत्तम् आतिष्ठत्यनसूयकः। तथा तथा-इमं च-अमुं च लोकं प्राप्नोत्यनिन्दितः॥ १०-१२८

शक्तेन-अपि हि शूद्रेण न कार्यो धनसंचयः। शूद्रो हि धनम् आसाद्य ब्राह्मणान् एव बाधते॥ १०-१२९

एते चतुर्णां वर्णानाम् आपद्धर्माः प्रकीर्तिताः। यान् सम्यग् अनुतिष्ठन्तो व्रजन्ति परमं गतिम्॥ १०-१३०

एष धर्मविधिः कृत्स्नश् चातुर्वर्ण्यस्य कीर्तितः। अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम्॥ १०-१३१

सान्तानिकं यक्ष्यमाणम् अध्वगं सार्ववेदसम्। गुरु-अर्थं पितृ-मातृ-अर्थं स्वाध्यायार्थ्युपतापिनः॥ ११-०१

न वै तान् स्नातकान् विद्याद् ब्राह्मणान् धर्मभिक्षुकान्। निःस्वेभ्यो देयम् एतेभ्यो दानं विद्याविशेषतः॥ ११-०२

एतेभ्यो हि द्विजाग्र्येभ्यो देयम् अन्नं स-दक्षिणम्। इतरेभ्यो बहिर्वेदि कृतान्नं देयम् उच्यते॥ ११-०३

सर्वरत्नानि राजा तु यथार्हं प्रतिपादयेत्। ब्राह्मणान् वेदविदुषो यज्ञार्थं च-एव दक्षिणाम्॥ ११-०४

कृत-दारो अपरान् दारान् भिक्षित्वा यो अधिगच्छति। रति-मात्रं फलं तस्य द्रव्यदातुस् तु संततिः॥ ११-०५

धनानि तु यथाशक्ति विप्रेषु प्रतिपादयेत्। वेदवित्सु विविक्तेषु प्रेत्य स्वर्गं समश्नुते ११-०६

यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये। अधिकं वा-अपि विद्येत स सोमं पातुम् अर्हति॥ ११-०७

अतः स्वल्पीयसि द्रव्ये यः सोमं पिबति द्विजः। स पीतसोम-पूर्वो अपि न तस्य-अप्नोति तत्फलम्॥ ११-०८

शक्तः परजने दाता स्वजने दुःखजीविनि। मध्व-अपातो विष-अस्वादः स धर्म-प्रतिरूपकः॥ ११-०९

भृत्यानाम् उपरोधेन यत् करोत्यौर्ध्वदेहिकम्। तद् भवत्यसुख-उदर्कं जीवतश् च मृतस्य च॥ ११-१०

यज्ञश् चेत् प्रतिरुद्धः स्याद् एकेन-अङ्गेन यज्वनः। ब्राह्मणस्य विशेषेन धार्मिके सति राजनि॥ ११-११

यो वैश्यः स्याद् बहुपशुर् हीन-क्रतुर् असोमपः। कुटुम्बात् तस्य तद् द्रव्यम् आहरेद् यज्ञसिद्धये॥ ११-१२

आहरेत् त्रीणि वा द्वे वा कामं शूद्रस्य वेश्मनः। न हि शूद्रस्य यज्ञेषु कश् चिद् अस्ति परिग्रहः॥ ११-१३

यो अनाहित-अग्निः शतगुर् अयज्वा च सहस्रगुः। तयोर् अपि कुटुम्बाभ्याम् आहरेद् अविचारयन्॥ ११-१४

आदान-नित्याच् च-अदातुर् आहरेद् अप्रयच्चतः। तथा यशो अस्य प्रथते धर्मश् च-एव प्रवर्धते॥ ११-१५

तथा-एव सप्तमे भक्ते भक्तानि षड् अनश्नता। अश्वस्तनविधानेन हर्तव्यं हीन-कर्मणः॥ ११-१६

खलात् क्षेत्राद् अगाराद् वा यतो वा-अप्युपलभ्यते। आख्यातव्यं तु तत् तस्मै पृच्चते यदि पृच्चति॥ ११-१७

ब्राह्मणस्वं न हर्तव्यं क्षत्रियेण कदा चन। दस्यु-निष्क्रिययोस् तु स्वम् अजीवन् हर्तुम् अर्हति॥ ११-१८

यो असाधुभ्यो अर्थम् आदाय साधुभ्यः संप्रयच्चति। स कृत्वा प्लवम् आत्मानं संतारयति ताव् उभौ॥ ११-१९

यद् धनं यज्ञशीलानां देवस्वं तद् विदुर् बुधाः। अयज्वनां तु यद् वित्तम् आसुरस्वं तद् उच्यते॥ ११-२०

न तस्मिन् धारयेद् दण्डं धार्मिकः पृथिवीपतिः। क्षत्रियस्य हि बालिश्याद् ब्राह्मणः सीदति क्षुधा॥ ११-२१

तस्य भृत्यजनं ज्ञात्वा स्वकुटुम्बान् महीपतिः। श्रुत-शीले च विज्ञाय वृत्तिं धर्म्यां प्रकल्पयेत्॥ ११-२२

कल्पयित्वा-अस्य वृत्तिं च रक्षेद् एनं समन्ततः। राजा हि धर्मषड्भागं तस्मात् प्राप्नोति रक्षितात्॥ ११-२३

न यज्ञार्थं धनं शूद्राद् विप्रो भिक्षेत कर्हिं चित्। यजमानो हि भिक्षित्वा चण्डालः प्रेत्य जायते॥ ११-२४

याज्ञार्थम् अर्थं भिक्षित्वा यो न सर्वं प्रयच्चति। स याति भासतां विप्रः काकतां वा शतं समाः॥ ११-२५

देवस्वं ब्राह्मणस्वं वा लोभेन-उपहिनस्ति यः। स पाप-अत्मा परे लोके गृध्र-उच्छिष्टेन जीवति॥ ११-२६

इष्टिं वैश्वानरीं नित्यं निर्वपेद् अब्दपर्यये। क्लृप्तानां पशु-सोमानां निष्कृत्यर्थम् असंभवे॥ ११-२७

आपत्कल्पेन यो धर्मं कुरुते अनापदि द्विजः। स न-अप्नोति फलं तस्य परत्र-इति विचारितम्॥ ११-२८

विश्वैश् च देवैः साध्यैश् च ब्राह्मणैश् च महर्षिभिः। आपत्सु मरणाद् भीतैर् विधेः प्रतिनिधिः कृतः॥ ११-२९

प्रभुः प्रथमकल्पस्य यो अनुकल्पेन वर्तते। न सांपरायिकं तस्य दु-र्मतेर् विद्यते फलम्॥ ११-३०

न ब्राह्मणो वेदयेत किं चिद् राजनि धर्मवित्। स्ववीर्येण-एव तान् - शिष्यान् मानवान् अपकारिणः॥ ११-३१

स्ववीर्याद् राजवीर्याच् च स्ववीर्यं बलवत्तरम्। तस्मात् स्वेन-एव वीर्येण निगृह्णीयाद् अरीन् द्विजः॥ ११-३२

श्रुतीर् अथर्वाङ्गिरसीः कुर्याद् इत्यविचारयन् । वाक्शस्त्रं वै ब्राह्मणस्य तेन हन्याद् अरीन् द्विजः ॥ ११-३३

क्षत्रियो बाहुवीर्येण तरेद् आपदम् आत्मनः । धनेन वैश्य-शूद्रौ तु जप-होमैर् द्विजोत्तमः ॥ ११-३४

विधाता शासिता वक्ता मैत्रो ब्राह्मण उच्यते । तस्मै न-अकुशलं ब्रूयान् न शुष्कां गिरम् ईरयेत् ॥ ११-३५

न वै कन्या न युवतिर् न-अल्प-विद्यो न बालिशः । होता स्याद् अग्निहोत्रस्य न-अर्तो न-असंस्कृतस् तथा ॥ ११-३६

नरके हि पतन्त्येते जुह्वन्तः स च यस्य तत् । तस्माद् वैतानकुशलो होता स्याद् वेदपारगः ॥ ११-३७

प्राजापत्यम् अदत्त्वा-अश्वम् अग्न्याधेयस्य दक्षिणाम् । अनाहिताग्निर् भवति ब्राह्मणो विभवे सति ॥ ११-३८

पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जित-इन्द्रियः । न त्व् अल्प-दक्षिणैर् यज्ञैर् यजेत-इह कथं चन ॥ ११-३९

इन्द्रियाणि यशः स्वर्गम् आयुः कीर्तिं प्रजाः पशून् । हन्त्यल्प-दक्षिणो यज्ञस् तस्मान् न-अल्प-धनो यजेत् ॥ ११-४०

अग्निहोत्र्यपविध्य-अग्नीन् ब्राह्मणः कामकारतः । चान्द्रायणं चरेन् मासं वीरहत्यासमं हि तत् ॥ ११-४१

ये शूद्राद् अधिगम्य-अर्थम् अग्निहोत्रम् उपासते । ऋत्विजस् ते हि शूद्राणां ब्रह्मवादिषु गर्हिताः ॥ ११-४२

तेषां सततम् अज्ञानां वृषलाग्न्युपसेविनाम् । पदा मस्तकम् आक्रम्य दाता दुर्गाणि संतरेत् ॥ ११-४३

अकुर्वन् विहितं कर्म निन्दितं च समाचरन् । प्रसक्तश् च-इन्द्रियार्थेषु प्रायश्चित्तीयते नरः ॥ ११-४४

अकामतः कृते पापे प्रायश्चित्तं विदुर् बुधाः । कामकारकृते अप्याहुर् एके श्रुतिनिदर्शनात् ॥ ११-४५

अकामतः कृतं पापं वेदाभ्यासेन शुध्यति । कामतस् तु कृतं मोहात् प्रायश्चित्तैः पृथग्विधैः ॥ ११-४६

प्रायश्चित्तीयतां प्राप्य दैवात् पूर्वकृतेन वा । न संसर्गं व्रजेत् सद्भिः प्रायश्चित्ते अकृते द्विजः ॥ ११-४७

इह दुश्चरितैः के चित् के चित् पूर्वकृतैस् तथा । प्राप्नुवन्ति दु-अत्मानो नरा रूपविपर्ययम् ॥ ११-४८

सुवर्णचौरः कौनख्यं सुरापः श्यावदन्तताम् । ब्रह्महा क्षयरोगित्वं दौश्चर्म्यं गुरुतल्पगः ॥ ११-४९

पिशुनः पौतिनासिक्यं सूचकः पूतिवक्त्रताम् । धान्यचौरो अङ्गहीनत्वम् आतिरैक्यं तु मिश्रकः ॥ ११-५०

अन्नहर्ता-अमयावित्वं मौक्यं वागपहारकः । वस्त्रापहारकः श्वैत्र्यं पङ्गुताम् अश्वहारकः ॥ ११-५१

एवं कर्मविशेषेण जायन्ते सद्विगर्हिताः । जड-मूक-अन्ध-बधिरा विकृत-अकृतयस् तथा ॥ ११-५२

चरितव्यम् अतो नित्यं प्रायश्चित्तं विशुद्धये । निन्द्यैर् हि लक्षणैर् युक्ता जायन्ते अनिष्कृत-एनसः ॥ ११-५३

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः । महान्ति पातकान्याहुः संसर्गश् च-अपि तैः सह ॥ ११-५४

अनृतं च समुत्कर्षे राजगामि च पैशुनम् । गुरोश् चालीक-निर्बन्धः समानि ब्रह्महत्यया ॥ ११-५५

ब्रह्म-उज्झता वेदनिन्दा कौटसाक्ष्यं सुहृद्वधः । गर्हित-अनाद्ययोर् जग्धिः सुरापानसमानि षट् ॥ ११-५६

निक्षेपस्य-अपहरणं नर-अश्व-रजतस्य च । भूमि-वज्र-मणीनां च रुक्मस्तेयसमं स्मृतम् ॥ ११-५७

रेतःसेकः स्वयोनीषु कुमारीष्व् अन्त्यजासु च । सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुः ॥ ११-५८

गोवधो अयाज्य-संयाज्यं पारदार्य-अत्मविक्रयः । गुरु-मातृ-पितृ-त्यागः स्वाध्याय-अग्न्योः सुतस्य च ॥ ११-५९

परिवित्तिता-अनुजे अनूढे परिवेदनम् एव च । तयोर् दानं च कन्यायास् तयोर् एव च याजनम् ॥ ११-६०

कन्याया दूषणं च-एव वार्धुष्यं व्रतलोपनम् । तडाग-अराम-दाराणाम् अपत्यस्य च विक्रयः ॥ ११-६१

व्रात्यता बान्धवत्यागो भृत्याध्यापनम् एव च । भृत्या च-अध्ययनादानम् अपण्यानां च विक्रयः ॥ ११-६२

सर्वाकारेष्व् अधीकारो महायन्त्रप्रवर्तनम् । हिंसा-ओषधीनां स्त्रि-अजीवो अभिचारो मूलकर्म च ॥ ११-६३

इन्धनार्थम् अशुष्काणां द्रुमाणाम् अवपातनम् । आत्मार्थं च क्रियारम्भो निन्दितान्नादनं तथा ॥ ११-६४

अनाहिताग्निता स्तेयम् ऋणानाम् अनपक्रिया । असत् - शाष्त्राधिगमनं कौशीलव्यस्य च क्रिया ॥ ११-६५

धान्य-कुप्य-पशुस्तेयं मद्यपस्त्रीनिषेवणम् । स्त्री-शूद्र-विश-क्षत्रवधो नास्तिक्यं च-उपपातकम् ॥ ११-६६

ब्राह्मणस्य रुजः कृत्वा घ्रातिर् अघ्रेय-मद्ययोः । जैह्मयं च मैथुनं पुंसि जातिभ्रंशकरं स्मृतम् ॥ ११-६७

खर-अश्व-उष्ट्र-मृग-इभानाम् अज-अविकवधस् तथा । संकरीकरणं ज्ञेयं मीन-अहि-महिषस्य च ॥ ११-६८

निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् । अपात्रीकरणं ज्ञेयम् असत्यस्य च भाषणम् ॥ ११-६९

कृमि-कीट-वयो-हत्या मद्यानुगतभोजनम् । फल-एधः-कुसुम-स्तेयम् अधैर्यं च मलावहम् ॥ ११-७०

एतान्येनांसि सर्वाणि यथा-उक्तानि पृथक् पृथक् । यैर् यैर् व्रतैर् अपोह्यन्ते तानि सम्यङ् निबोधत ॥ ११-७१

ब्रह्महा द्वादश समाः कुटीं कृत्वा वने वसेत् । भैक्षाश्यात्मविशुद्ध्यर्थं कृत्वा शवशिरो ध्वजम् ॥ ११-७२

लक्ष्यं शस्त्रभृतां वा स्याद् विदुषाम् इच्चया-अत्मनः । प्रास्येद् आत्मानम् अग्नौ वा समिद्धे त्रिर् अवाक्-शिराः ॥ ११-७३

यजेत वा-अश्वमेधेन स्वर्जिता गोसवेन वा । अभिजिद्-विश्वजिद्भ्यां वा त्रिवृता-अग्निष्टुता-अपि वा ॥ ११-७४

जपन् वा-अन्यतमं वेदं योजनानां शतं व्रजेत् । ब्रह्महत्यापनोदाय मितभुज्- नियत-इन्द्रियः ॥ ११-७५

सर्वस्वं वेदविदुषे ब्राह्मणाय-उपपादयेत् । धनं हि जीवनाय-अलं गृहं वा स-परिच्चदम् ॥ ११-७६

हविष्यभुग् वा-अनुसरेत् प्रतिस्रोतः सरस्वतीम्। जपेद् वा नियत-अहारस् त्रिर् वै वेदस्य संहिताम्॥ ११-७७

कृत-वापनो निवसेद् ग्रामान्ते गोव्रजे अपि वा। आश्रमे वृक्षमूले वा गो-ब्राह्मणहिते रतः॥ ११-७८

ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान् परित्यजेत्। मुच्यते ब्रह्महत्याया गोप्ता गोर् ब्राह्मणस्य च॥ ११-७९

त्रिवारं प्रतिरोद्धा वा सर्वस्वम् अवजित्य वा। विप्रस्य तन्निमित्ते वा प्राणालाभे विमुच्यते॥ ११-८०

एवं दृढ-व्रतो नित्यं ब्रह्मचारी समाहितः। समाप्ते द्वादशे वर्षे ब्रह्महत्याम् व्यपोहति॥ ११-८१

शिष्ट्वा वा भूमिदेवानां नरदेवसमागमे। स्वम् एनो अवभृथस्नातो हयमेधे विमुच्यते॥ ११-८२

धर्मस्य ब्राह्मणो मूलम् अग्रं राजन्य उच्यते। तस्मात् समागमे तेषाम् एनो विख्याप्य शुध्यति॥ ११-८३

ब्रह्मणः संभवेन-एव देवानाम् अपि दैवतम्। प्रमाणं च-एव लोकस्य ब्रह्मात्र-एव हि कारणम्॥ ११-८४

तेषां वेदविदो ब्रूयुस् त्रयो अप्येनः सुनिष्कृतिम्। सा तेषां पावनाय स्यात् पवित्रा विदुषां हि वाक्॥ ११-८५

अतो अन्यतमम् आस्थाय विधिं विप्रः समाहितः। ब्रह्महत्याकृतं पापं व्यपोहत्यात्मवत्तया॥ ११-८६

हत्वा गर्भम् अविज्ञातम् एतद् एव व्रतं चरेत्। राजन्य-वैश्यौ च-ईजानाव् आत्रेयीम् एव च स्त्रियम्॥ ११-८७

उक्त्वा च-एव-अनृतं साक्ष्ये प्रतिरुध्य गुरुं तथा। अपहृत्य च निःक्षेपं कृत्वा च स्त्री-सुहृत् - वधम्॥ ११-८८

इयं विशुद्धिर् उदिता प्रमाप्य-अकामतो द्विजम्। कामतो ब्राह्मणवधे निष्कृतिर् न विधीयते॥ ११-८९

सुरां पीत्वा द्विजो मोहाद् अग्नि-वर्णां सुरां पिबेत्। तया स काये निर्दग्धे मुच्यते किल्बिषात् ततः॥ ११-९०

गोमूत्रम् अग्नि-वर्णं वा पिबेद् उदकम् एव वा। पयो घृतं वा-अ मरणाद् गोशकृद्रसम् एव वा॥ ११-९१

कणान् वा भक्षयेद् अब्दं पिण्याकं वा सकृत् - निशि। सुरापानापनुत्त्यर्थं वालवासा जटी ध्वजी॥ ११-९२

सुरा वै मलम् अन्नानां पाप्मा च मलम् उच्यते। तस्माद् ब्राह्मण-राजन्यौ वैश्यश् च न सुरां पिबेत्॥ ११-९३

गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा। यथा-एव-एका तथा सर्वा न पातव्या द्विजोत्तमैः॥ ११-९४

यक्ष-रक्षः-पिशाच-अन्नं मद्यं मांसं सुरासवम्। तद् ब्राह्मणेन न-अत्तव्यं देवानाम् अश्नता हविः॥ ११-९५

अमेध्ये वा पतेन् मत्तो वैदिकं वा-अप्युदाहरेत्। अकार्यम् अन्यत् कुर्याद् वा ब्राह्मणो मदमोहितः॥ ११-९६

यस्य कायगतं ब्रह्म मद्येन-अप्लाव्यते सकृत्। तस्य व्यपैति ब्राह्मण्यं शूद्रत्वं च स गच्छति॥ ११-९७

एषा विचित्राभिहिता सुरापानस्य निष्कृतिः। अत ऊर्ध्वं प्रवक्ष्यामि सुवर्णस्तेयनिष्कृतिम्॥ ११-९८

सुवर्णस्तेयकृद् विप्रो राजानम् अभिगम्य तु। स्वकर्म ख्यापयन् ब्रूयात् - मां भवान् अनुशास्त्व् इति॥ ११-९९

गृहीत्वा मुसलं राजा सकृद् हन्यात् तु तं स्वयम् । वधेन शुध्यति स्तेनो ब्राह्मणस् तपसा-एव तु॥ ११-१००

तपसापनुनुत्सुस् तु सुवर्णस्तेयजं मलम्। चीरवासा द्विजो अरण्ये चरेद् ब्रह्महणो व्रतम्॥ ११-१०१

एतैर् व्रतैर् अपोहेत पापं स्तेयकृतं द्विजः। गुरुस्त्रीगमनी-इयं तु व्रतैर् एभिर् अपानुदेत्॥ ११-१०२

गुरुतल्प्यभिभाष्य-एनस् तप्ते स्वप्याद् अयोमये। सूर्मीं ज्वलन्तीं स्वाश्लिष्येन् मृत्युना स विशुध्यति॥ ११-१०३

स्वयं वा शिष्ण-वृषणाव् उत्कृत्य-अधाय च-अञ्जलौ। नैर्ऋतीं दिशम् आतिष्ठेद् आ निपाताद् अजिह्मगः॥ ११-१०४

खट्वाङ्गी चीर-वासा वा श्मश्रुलो विजने वने। प्राजापत्यं चरेत् कृच्छ्रम् अब्दम् एकं समाहितः॥ ११-१०५

चान्द्रायणं वा त्रीन् मासान् अभ्यस्येन् नियत-इन्द्रियः। हविष्येण यवाग्वा वा गुरुतल्पापनुत्तये॥ ११-१०६

एतैर् व्रतैर् अपोहेयुर् महापातकिनो मलम्। उपपातकिनस् त्व् एवम् एभिर् नानाविधैर् व्रतैः॥ ११-१०७

उपपातकसंयुक्तो गोघ्नो मासं यवान् पिबेत्। कृत-वापो वसेद् गोष्ठे चर्मणा तेन संवृतः॥ ११-१०८

चतुर्थकालम् अश्नीयाद् अक्षार-लवणं मितम्। गोमूत्रेण-अचरेत् स्नानं द्वौ मासौ नियत-इन्द्रियः॥ ११-१०९

दिवा-अनुगच्चेद् गास् तास् तु तिष्ठन्न् ऊर्ध्वं रजः पिबेत्। शुश्रूषित्वा नमस्कृत्य रात्रौ वीरासनं वसेत्॥ ११-११०

तिष्ठन्तीष्व् अनुतिष्ठेत् तु व्रजन्तीष्व् अप्यनुव्रजेत्। आसीनासु तथा-असीनो नियतो वीत-मत्सरः॥ ११-१११

आतुराम् अभिशस्तां वा चौर-व्याघ्रादिभिर् भयैः। पतितां पङ्कलग्नं वा सर्व-उपायैर् विमोचयेत्॥ ११-११२

उष्णे वर्षति शीते वा मारुते वाति वा भृशम्। न कुर्वीत-अत्मनस् त्राणं गोर् अकृत्वा तु शक्तितः॥ ११-११३

आत्मनो यदि वा-अन्येषां गृहे क्षेत्रे अथ वा खले। भक्षयन्तीं न कथयेत् पिबन्तं च-एव वत्सकम्॥ ११-११४

अनेन विधिना यस् तु गोघ्नो गाम् अनुगच्चति। स गोहत्याकृतं पापं त्रिभिर् मासैर् व्यपोहति॥ ११-११५

वृषभ-एकादशा गाश् च दद्यात् सुचरित-व्रतः। अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेत्॥ ११-११६

एतद् एव व्रतं कुर्युर् उपपातकिनो द्विजाः। अवकीर्णिवर्ज्यं शुद्ध्यर्थं चान्द्रायणम् अथ-अपि वा॥ ११-११७

अवकीर्णी तु काणेन गर्दभेन चतुष्पथे। पाकयज्ञविधानेन यजेत निर्ऋतिं निशि॥ ११-११८

हुत्वा-अग्नौ विधिवद् होमान् अन्ततश् च सम-इत्यृचा। वात-इन्द्र-गुरु-वह्नीनां जुहुयात् सर्पिषा-अहुतीः॥ ११-११९

कामतो रेतसः सेकं व्रतस्थस्य द्विजन्मनः। अतिक्रमं व्रतस्य-अहुर् धर्मज्ञा ब्रह्मवादिनः॥ ११-१२०

मारुतं पुरुहूतं च गुरुं पावकम् एव च। चतुरो व्रतिनो अभ्येति ब्राह्मं तेजो अवकीर्णिनः॥ ११-१२१

एतस्मिन्न् एनसि प्राप्ते वसित्वा गर्दभाजिनम्। सप्तागारांश् चरेद् भैक्षं स्वकर्म परिकीर्तयन्॥ ११-१२२

तेभ्यो लब्धेन भैक्षेण वर्तयन्न् एककालिकम्। उपस्पृशंस् त्रिषवणं त्व् अब्देन स विशुध्यति॥ ११-१२३

जातिभ्रंशकरं कर्म कृत्वा-अन्यतमम् इच्छया। चरेत् सांतपनं कृच्छ्रं प्राजापत्यम् अनिच्छया॥ ११-१२४

संकर-अपात्रकृत्यासु मासं शोधनम् ऐन्दवम्। मलिनीकरणीयेषु तप्तः स्याद् यावकैस् त्र्यहम्॥ ११-१२५

तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः। वैश्ये अष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस् तु षोडशः॥ ११-१२६

अकामतस् तु राजन्यं विनिपात्य द्विजोत्तमः। वृषभ-एकसहस्रा गा दद्यात् सुचरित-व्रतः॥ ११-१२७

त्र्यब्दं चरेद् वा नियतो जटी ब्रह्महणो व्रतम्। वसन् दूरतरे ग्रामाद् वृक्षमूल-निकेतनः॥ ११-१२८

एतद् एव चरेद् अब्दं प्रायश्चित्तं द्विजोत्तमः। प्रमाप्य वैश्यं वृत्तस्थं दद्याच् च-एकशतं॥ ११-१२९

एतद् एव व्रतं कृत्स्नं षण्मासान् - शूद्रहा चरेत्। वृषभ-एकादशा वा-अपि दद्याद् विप्राय गाः सिताः॥ ११-१३०

मार्जार-नकुलौ हत्वा चाषं मण्डूकम् एव च। श्व-गोधा-उलूक-काकांश् च शूद्रहत्याव्रतं चरेत्॥ ११-१३१

पयः पिबेत् त्रिरात्रं वा योजनं वा-अध्वनो व्रजेत्। उपस्पृशेत् स्रवन्त्यां वा सूक्तं वा-अब्-दैवतं जपेत्॥ ११-१३२

अभ्रिं कार्ष्णायसीं दद्यात् सर्पं हत्वा द्विजोत्तमः। पलालभारकं षण्ढे सैसकं च-एकमाषकम्॥ ११-१३३

घृतकुम्भं वराहे तु तिलद्रोणं तु तित्तिरौ। शुके द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनम्॥ ११-१३४

हत्वा हंसं बलाकां च बकं बर्हिणम् एव च। वानरं श्येन-भासौ च स्पर्शयेद् ब्राह्मणाय गाम्॥ ११-१३५

वासो दद्याद् हयं हत्वा पञ्च नीलान् वृषान् गजम्। अज-मेषाव् अनड्वाहं खरं हत्वा-एकहायनम्॥ ११-१३६

क्रव्यादांस् तु मृगान् हत्वा धेनुं दद्यात् पयस्विनीम्। अक्रव्यादान् वत्सतरीम् उष्ट्रं हत्वा तु कृष्णलम्॥ ११-१३७

जीन-कार्मुक-बस्त-अवीन् पृथग् दद्याद् विशुद्धये। चतुर्णाम् अपि वर्णानां नारीर् हत्वा-अन् - अवस्थिताः॥ ११-१३८

दानेन वधनिर्णेकं सर्पादीनाम् अशक्नुवन्। एकैकशश् चरेत् कृच्छ्रं द्विजः पापापनुत्तये॥ ११-१३९

अस्थिमतां तु सत्त्वानां सहस्रस्य प्रमापणे। पूर्णे च-अनस्यनस्थ्नां तु शूद्रहत्याव्रतं चरेत्॥ ११-१४०

किं चिद् एव तु विप्राय दद्याद् अस्थिमतां वधे। अनस्थ्नां च-एव हिंसायां प्राणायामेन शुध्यति॥ ११-१४१

फलदानां तु वृक्षाणां चेदने जप्यम् ऋच-शतम्। गुल्म-वल्ली-लतानां च पुष्पितानां च वीरुधाम्॥ ११-१४२

अन्नाद्यजानां सत्त्वानां रसजानां च सर्वशः। फल-पुष्प-उद्भवानां च घृतप्राशो विशोधनम्॥ ११-१४३

कृष्तजानाम् ओषधीनां जातानां च स्वयं वने। वृथालम्भे अनुगच्छेद् गां दिनम् एकं पयो-व्रतः॥ ११-१४४

एतैर् व्रतैर् अपोह्यं स्याद् एनो हिंसा-समुद्भवम्। ज्ञान-अज्ञानकृतं कृत्स्नं शृणुत-अनाद्यभक्षणे॥ ११-१४५

अज्ञानाद् वारुणीं पीत्वा संस्कारेण-एव शुध्यति। मतिपूर्वम् अनिर्देश्यं प्राणान्तिकम् इति स्थितिः॥ ११-१४६

अपः सुराभाजनस्था मद्यभाण्डस्थितास् तथा। पञ्चरात्रं पिबेत् पीत्वा शङ्खपुष्पीशृतं पयः॥ ११-१४७

स्पृष्ट्व दत्त्वा च मदिरां विधिवत् प्रतिगृह्य च। शूद्र-उच्छिष्टाश् च पीत्वा-अपः कुशवारि पिबेत् त्र्यहम्॥ ११-१४८

ब्राह्मणस् तु सुरापस्य गन्धम् आघ्राय सोमपः। प्राणान् अप्सु त्रिर् आयम्य घृतं प्राश्य विशुध्यति॥ ११-१४९

अज्ञानात् प्राश्य विष्-मूत्रं सुरासंस्पृष्टम् एव च। पुनः संस्कारम् अर्हन्ति त्रयो वर्णा द्विजातयः॥ ११-१५०

वपनं मेखला दण्डो भैक्षचर्या व्रतानि च। निवर्तन्ते द्विजातीनां पुनःसंस्कारकर्मणि॥ ११-१५१

अभोज्यानां तु भुक्त्वा-अन्नं स्त्री-शूद्र-उच्छिष्टम् एव च। ११-१५२ जग्ध्वा मांसम् अभक्ष्यं च सप्तरात्रं यवान् पिबेत्॥

१शुक्तानि च कषायांश् च पीत्वा मेध्यान्यपि द्विजः। तावद् भवत्यप्रयतो यावत् तन् न व्रजत्यधः॥ ११-१५३

विड्वराह-खर-उष्ट्राणां गोमायोः कपि-काकयोः। प्राश्य मूत्र-पुरीषाणि द्विजश् चान्द्रायणं चरेत्॥ ११-१५४

शुष्काणि भुक्त्वा मांसानि भौमानि कवकानि च। अज्ञातं च-एव सूनास्थम् एतद् एव व्रतं चरेत्॥ ११-१५५

क्रव्याद-सूकर-उष्ट्राणां कुक्कुटानां च भक्षणे। नर-काक-खराणां च तप्तकृच्छ्रं विशोधनम्॥ ११-१५६

मासिकान्नं तु यो अश्नीयाद् असमावर्तको द्विजः। स त्रीण्यहान्युपवसेद् एकाहं च-उदके वसेत्॥ ११-१५७

ब्रह्मचारी तु यो अश्नीयान् मधु मांसं कथं चन। स कृत्वा प्राकृतं कृच्छ्रं व्रतशेषं समापयेत्॥ ११-१५८

बिडाल-काक-अखु-उच्छिष्टं जग्ध्वा श्व-नकुलस्य च। केश-कीटावपन्नं च पिबेद् ब्रह्मसुवर्चलाम्॥ ११-१५९

अभोज्यम् अन्नं न-अत्तव्यम् आत्मनः शुद्धिम् इच्छता। अज्ञानभुक्तं तु-उत्तार्यं शोध्यं वा-अप्याशु शोधनैः॥ ११-१६०

एषो अनाद्य-अदनस्य-उक्तो व्रतानां विविधो विधिः। स्तेयदोषापहर्तॄणां व्रतानां श्रूयतां विधिः॥ ११-१६१

धान्य-अन्न-धनचौर्याणि कृत्वा कामाद् द्विजोत्तमः। स्वजातीयगृहाद् एव कृच्छ्राब्देन विशुध्यति॥ ११-१६२

मनुष्याणां तु हरणे स्त्रीणां क्षेत्र-गृहस्य च। कूप-वापीजलानां च शुद्धिश् चान्द्रायणं स्मृतम्॥ ११-१६३

द्रव्याणाम् अल्प-साराणां स्तेयं  कृत्वा-अन्यवेश्मतः । चरेत् सांतपनं कृच्छ्रं तन् निर्यात्यात्मशुद्धये॥ ११-१६४

भक्ष्य-भोज्यापहरणे यान-शय्या-असनस्य च। पुष्प-मूल-फलानां च पञ्चगव्यं विशोधनम्॥ ११-१६५

तृण-काष्ठ-द्रुमाणां च शुष्कान्नस्य गुडस्य च। चेल-चर्म-अमिषाणां च त्रिरात्रं स्याद् अभोजनम्॥ ११-१६६

मणि-मुक्ता-प्रवालानां ताम्रस्य रजतस्य च। अयः-कांस्य-उपलानां च द्वादशाहं कणान्नता॥ ११-१६७

कार्पास-कीटज-ऊर्णानां द्विशफ-एकशफस्य च। पक्षि-गन्ध-ओषधीनां च रज्ज्वाश् च-एव त्र्यहं पयः॥ ११-१६८

एतैर् व्रतैर् अपोहेत पापं स्तेयकृतं द्विजः। अगम्यागमनीयं तु व्रतैर् एभिर् अपानुदेत्॥ ११-१६९

गुरुतल्पव्रतं कुर्याद् रेतः सिक्त्वा स्वयोनिषु। सख्युः पुत्रस्य च स्त्रीषु कुमारीष्व् अन्त्यजासु च॥ ११-१७०

पैतृस्वसेयीं भगिनीं स्वस्त्रीयां मातुर् एव च। मातुश् च भ्रातुस् तनयां गत्वा चान्द्रायणं चरेत्॥ ११-१७१

एतास् तिस्रस् तु भार्यार्थे न-उपयच्चेत् तु बुद्धिमान्। ज्ञातित्वेन-अन् - उपेयास् ताः पतति ह्युपयन्न् अधः॥ ११-१७२

अमानुषीषू पुरुष उदक्यायाम् अयोनिषु। रेतः सिक्त्वा जले च-एव कृच्छ्रं सांतपनं चरेत्॥ ११-१७३

मैथुनं तु समासेव्य पुंसि योषिति वा द्विजः। गो-याने अप्सु दिवा च-एव स-वासाः स्नानम् आचरेत्॥ ११-१७४

चण्डाल-अन्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात् साम्यं तु गच्चति॥ ११-१७५

विप्रदुष्टां स्त्रियं भर्ता निरुन्ध्याद् एकवेश्मनि। यत् पुंसः परदारेषु तच् च-एनां चारयेद् व्रतम्॥ ११-१७६

सा चेत् पुनः प्रदुष्येत् तु सदृशेन-उपमन्त्रिता। कृच्छ्रं चान्द्रायणं च-एव तद् अस्याः पावनं स्मृतम्॥ ११-१७७

यत् करोत्येकरात्रेण वृषलीसेवनाद् द्विजः। तद् भैक्षभुग्-जपन् नित्यं त्रिभिर् वर्षैर् व्यपोहति॥ ११-१७८

एषा पापकृताम् उक्ता चतुर्णाम् अपि निष्कृतिः। पतितैः संप्रयुक्तानाम् इमाः शृणुत निष्कृतीः॥ ११-१७९

संवत्सरेण पतति पतितेन सह-अचरन्। याजन-अध्यापनाद् यौनात् - न तु यान-असन-अशनात्॥ ११-१८०

यो येन पतितेन-एषां संसर्गं याति मानवः। स तस्य-एव व्रतं कुर्यात् तत्संसर्गविशुद्धये॥ ११-१८१

पतितस्य-उदकं कार्यं सपिण्डैर् बान्धवैर् बहिः। निन्दिते अहनि सायाह्ने ज्ञाति-ऋत्विज्-गुरुसंनिधौ॥ ११-१८२

दासी घटम् अपां पूर्णं पर्यस्येत् प्रेतवत् पदा। अहोरात्रम् उपासीरन्न् अशौचं बान्धवैः सह॥ ११-१८३

निवर्तेरंश् च तस्मात् तु संभाषण-सहासने। दायाद्यस्य प्रदानं च यात्रा च-एव हि लौकिकी॥ ११-१८४

ज्येष्ठता च निवर्तेत ज्येष्ठावाप्यं च यद् धनम्। ज्येष्ठांशं प्राप्नुयाच् च-अस्य यवीयान् गुणतो अधिकः॥ ११-१८५

प्रायश्चित्ते तु चरिते पूर्णकुम्भम् अपां नवम्। तेन-एव सार्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये॥ ११-१८६

स त्व् अप्सु तं घटं प्रास्य प्रविश्य भवनं स्वकम्। सर्वाणि ज्ञातिकार्याणि यथापूर्वं समाचरेत्॥ ११-१८७

एतद् एव विधिं कुर्याद् योषित्सु पतितास्व् अपि। वस्त्र-अन्न-पानं देयं तु वसेयुश् च गृहान्तिके॥ ११-१८८

एनस्विभिर् अनिर्णिक्तैर् न-अर्थं किं चित् सह-अचरेत्। कृतनिर्णेजनांश् च-एव न जुगुप्सेत कर्हि चित्॥ ११-१८९

बालघ्नांश् च कृतघ्नांश् च विशुद्धान् अपि धर्मतः। शरणागतहन्तॄंश् च स्त्रीहन्तॄंश् च न संवसेत्॥ ११-१९०

येषां द्विजानां सावित्री न-अनूच्येत यथाविधि। तांश् चारयित्वा त्रीन् कृच्छ्रान् यथाविधि-उपनाययेत्॥ ११-१९१

प्रायश्चित्तं चिकीर्षन्ति विकर्मस्थास् तु ये द्विजाः। ब्रह्मणा च परित्यक्तास् तेषाम् अप्येतद् आदिशेत्॥ ११-१९२

यद् गर्हितेन-अर्जयन्ति कर्मणा ब्राह्मणा धनम्। तस्य-उत्सर्गेण शुध्यन्ति जप्येन तपसा-एव च॥ ११-१९३

जपित्वा त्रीणि सावित्र्याः सहस्राणि समाहितः। मासं गोष्ठे पयः पीत्वा मुच्यते असत्प्रतिग्रहात्॥ ११-१९४

उपवासकृशं तं तु गोव्रजात् पुनर् आगतम्। प्रणतं प्रति पृच्छेयुः साम्यं सौम्य-इच्छसि-इति किम्॥ ११-१९५

सत्यम् उक्त्वा तु विप्रेषु विकिरेद् यवसं गवाम्। गोभिः प्रवर्तिते तीर्थे कुर्युस् तस्य परिग्रहम्॥ ११-१९६

व्रात्यानां याजनं कृत्वा परेषाम् अन्त्यकर्म च। अभिचारम् अहीनं च त्रिभिः कृच्छ्रैर् व्यपोहति॥ ११-१९७

शरणागतं परित्यज्य वेदं विप्लाव्य च द्विजः। संवत्सरं यवाहारस् तत् पापम् अपसेधति॥ ११-१९८

श्व-शृगाल-खरैर् दष्टो ग्राम्यैः क्रव्याद्भिर् एव च। नर-अश्व-उष्ट्र-वराहैश् च प्राणायामेन शुध्यति॥ ११-१९९

षष्ठान्नकालता मासं संहिताजप एव वा। होमाश् च सकला नित्यम् अपाङ्क्त्यानां विशोधनम्॥ ११-२००

उष्ट्रयानं समारुह्य खरयानं तु कामतः। स्नात्वा तु विप्रो दिग्-वासाः प्राणायामेन शुध्यति॥ ११-२०१

विना-अद्भिर् अप्सु वा-अप्यार्तः शारीरं संनिषेव्य च। स-चैलो बहिर् आप्लुत्य गाम् आलभ्य विशुध्यति॥ ११-२०२

वेद-उदितानां नित्यानां कर्मणां समतिक्रमे। स्नातकव्रतलोपे च प्रायश्चित्तम् अभोजनम्॥ ११-२०३

हुङ्कारं ब्राह्मणस्य-उक्त्वा त्वम्कारं च गरीयसः। स्नात्वा-अन् - अश्नन्न् अहः शेषम् अभिवाद्य प्रसादयेत्॥ ११-२०४

ताडयित्वा तृणेन-अपि कण्ठे वा-अबध्य वाससा। विवादे वा विनिर्जित्य प्रणिपत्य प्रसादयेत्॥ ११-२०५

अवगूर्य त्व् अब्दशतं सहस्रम् अभिहत्य च। जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते॥ ११-२०६

शोणितं यावतः पांसून् संगृह्णाति महीतले। तावन्त्यब्दसहस्राणि तत्कर्ता नरके वसेत्॥ ११-२०७

अवगूर्य चरेत् कृच्छ्रम् अतिकृच्छ्रं निपातने। कृच्छ्र-अतिकृच्छ्रौ कुर्वीत विप्रस्य-उत्पाद्य शोणितम्॥ ११-२०८

अनुक्तनिष्कृतीनां तु पापानाम् अपनुत्तये। शक्तिं च-अवेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत्॥ ११-२०९
यैर् अभ्युपायैर् एनांसि मानवो व्यपकर्षति। तान् वो अभ्युपायान् वक्ष्यामि देव-ऋषि-पितृसेवितान्॥ ११-२१०
त्र्यहं प्रातस् त्र्यहं सायं त्र्यहम् अद्याद् अयाचितम्। त्र्यहं परं च न-अश्नीयात् प्राजापत्यं चरन् द्विजः॥ ११-२११
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुश-उदकम्। एकरात्र-उपवासश् च कृच्छ्रं सांतपनं स्मृतम्॥ ११-२१२
एकैकं ग्रासम् अश्नीयात् त्र्यहाणि त्रीणि पूर्ववत्। त्र्यहं च-उपवसेद् अन्त्यम् अतिकृच्छ्रं चरन् द्विजः॥ ११-२१३
तप्तकृच्छ्रं चरन् विप्रो जल-क्षीर-घृत-अनिलान्। प्रति-त्र्यहं पिबेद् उष्णान् सकृत्स्नायी समाहितः॥ ११-२१४
यत-अत्मनो अप्रमत्तस्य द्वादशाहम् अभोजनम्। पराको नाम कृच्छ्रो अयं सर्वपाप-अपनोदनः॥ ११-२१५
एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्धयेत्। उपस्पृशंस् त्रिषवणम् एतत् - चाण्द्रायणं स्मृतम्॥ ११-२१६
एतम् एव विधिं कृत्स्नम् आचरेद् यवमध्यमे। शुक्लपक्षादिनियतश् चरंश् चान्द्रायणं व्रतम्॥ ११-२१७
अष्टाव् अष्टौ समश्नीयात् पिण्डान् मध्यंदिने स्थिते। नियत-अत्मा हविष्याशी यतिचान्द्रायणं चरन्॥ ११-२१८
चतुरः प्रातर् अश्नीयात् पिण्डान् विप्रः समाहितः। चतुरो अस्तम् इते सूर्ये शिशुचान्द्रायणं स्मृतम्॥ ११-२१९
यथा कथं चित् पिण्डानां तिस्रो अशीतीः समाहितः। मासेन-अश्नन् हविष्यस्य चन्द्रस्य-एति सलोकताम्॥ ११-२२०
एतद् रुद्रास् तथा-अदित्या वसवश् च-अचरन् व्रतम्। सर्वाकुशलमोक्षाय मरुतश् च महर्षिभिः॥ ११-२२१
महाव्याहृतिभिर् होमः कर्तव्यः स्वयम् अन्वहम्। अहिंसा सत्यम् अक्रोधम् आर्जवं च समाचरेत्॥ ११-२२२
त्रिर् अह्नस् त्रिर् निशायां च स-वासा जलम् आविशेत्। स्त्री-शूद्र-पतितांश् च-एव न-अभिभाषेत कर्हि चित्॥
११-२२३
स्थान-असनाभ्यां विहरेद् अशक्तो अधः शयीत वा। ब्रह्मचारी व्रती च स्याद् गुरु-देव-द्विज-अर्चकः॥ ११-२२४
सावित्रीं च जपेन् नित्यं पवित्राणि च शक्तितः। सर्वेष्व् एव व्रतेष्व् एवं प्रायश्चित्तार्थम् आदृतः॥ ११-२२५
एतैर् द्विजातयः शोध्या व्रतैर् आविष्कृत-एनसः। अनाविष्कृत-पापांस् तु मन्त्रैर् होमैश् च शोधयेत्॥ ११-२२६
ख्यापनेन-अनुतापेन तपसा-अध्ययनेन च। पापकृत् - मुच्यते पापात् तथा दानेन च-अपदि॥ ११-२२७
यथा यथा नरो अधर्मं स्वयं कृत्वा-अनुभाषते। तथा तथा त्वचा-इव-अहिस् तेन-अधर्मेण मुच्यते॥ ११-२२८
यथा यथा मनस् तस्य दुष्कृतं कर्म गर्हति। तथा तथा शरीरं तत् तेन-अधर्मेण मुच्यते॥ ११-२२९

कृत्वा पापं हि संतप्य तस्मात् पापात् प्रमुच्यते। न-एवं कुर्यां पुनर् इति निवृत्त्या पूयते तु सः॥ ११-२३०
एवं संचिन्त्य मनसा प्रेत्य कर्मफल-उदयम्। मनो-वाच्-मूर्तिभिर् नित्यं शुभं कर्म समाचरेत्॥ ११-२३१
अज्ञानाद् यदि वा ज्ञानात् कृत्वा कर्म विगर्हितम्। तस्माद् विमुक्तिम् अन्विच्छन् द्वितीयं न समाचरेत्॥ ११-२३२
यस्मिन् कर्मण्यस्य कृते मनसः स्याद् अलाघवम्। तस्मिंस् तावत् तपः कुर्याद् यावत् तुष्टिकरं भवेत्॥ ११-२३३
तपोमूलम् इदं सर्वं दैव-मानुषकं सुखम्। तपोमध्यं बुधैः प्रोक्तं तपो-अन्तं वेददर्शिभिः॥ ११-२३४
ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम्। वैश्यस्य तु तपो वार्ता तपः शूद्रस्य सेवनम्॥ ११-२३५
ऋषयः संयत-अत्मानः फल-मूल-अनिल-अशनाः। तपसा-एव प्रपश्यन्ति त्रैलोक्यं स-चराचरम्॥ ११-२३६
औषधान्यगदो विद्या दैवी च विविधा स्थितिः। तपसा-एव प्रसिध्यन्ति तपस् तेषां हि साधनम्॥ ११-२३७
यद् दुस्तरं यद् दुरापं यद् दुर्गं यच् च दुष्करम्। सर्वं तु तपसा साध्यं तपो हि दुरतिक्रमम्॥ ११-२३८
महापातकिनश् च-एव शेषाश् च-अकार्यकारिणः। तपसा-एव सुतप्तेन मुच्यन्ते किल्बिषात् ततः॥ ११-२३९
कीताश् च-अहि-पतंगाश् च पशवश् च वयांसि च। स्थावराणि च भूतानि दिवं यान्ति तपोबलात्॥ ११-२४०
यत् किं चिद् एनः कुर्वन्ति मनो-वाच्-मूर्तिभिर् जनाः। तत् सर्वं निर्दहन्त्याशु तपसा-एव तपो-धनाः॥ ११-२४१
तपसा-एव विशुद्धस्य ब्राह्मणस्य दिव-ओकसः। इज्याश् च प्रतिगृह्णन्ति कामान् संवर्धयन्ति च॥ ११-२४२
प्रजापतिर् इदं शास्त्रं तपसा-एव-असृजत् प्रभुः। तथा-एव वेदान् ऋषयस् तपसा प्रतिपेदिरे॥ ११-२४३
इत्येतत् तपसो देवा महाभाग्यं प्रचक्षते। सर्वस्य-अस्य प्रपश्यन्तस् तपसः पुण्यम् उत्तमम्॥ ११-२४४
वेदाभ्यासो अन्वहं शक्त्या महायज्ञक्रिया क्षमा। नाशयन्त्याशु पापानि महापातकजान्यपि॥ ११-२४५
यथा-एधस् तेजसा वह्निः प्राप्तं निर्दहति क्षणात्। तथा ज्ञानाग्निना पापं सर्वं दहति वेदवित्॥ ११-२४६
इत्येतद् एनसाम् उक्तं प्रायश्चित्तं यथाविधि। अत ऊर्ध्वं रहस्य-अनां प्रायश्चित्तं निबोधत॥ ११-२४७
स-व्याहृति-प्रणवकाः प्राणायामास् तु षोडश। अपि भ्रूणहनं मासात् पुनन्त्यहर् अहः कृताः॥ ११-२४८
कौत्सं जप्त्वा-अप इत्येतद् वसिष्ठं च प्रति-इत्यृचम्। माहित्रं शुद्धवत्यश् च सुरापो अपि विशुध्यति॥ ११-२४९
सकृत् - जप्त्वा-अस्यवामीयं शिवसंकल्पम् एव च। अपहृत्य सुवर्णं तु क्षणाद् भवति नि-र्मलः॥ ११-२५०
हविष्पान्तीयम् अभ्यस्य न तमं ह इति-इति च। जपित्वा पौरुषं सूक्तं मुच्यते गुरुतल्पगः।११-२५१

एनसां स्थूल-सूक्ष्माणां चिकीर्षन्न् अपनोदनम्। अव-इत्यृचं जपेद् अब्दं यत् किं च-इदम् इति-इति वा॥ ११-२५२

प्रतिगृह्य-अप्रतिग्राह्यं भुक्त्वा च-अन्नं विगर्हितम्। जपंस् तरत्समन्दीयं पूयते मानवस् त्र्यहात्॥ ११-२५३

सोमारौद्रम् तु बह्व्-एनाः मासम् अभ्यस्य शुध्यति। स्रवन्त्याम् आचरन् स्नानम् अर्यम्णाम् इति च तृचम्॥ ११-२५४

अब्दार्धम् इन्द्रम् इत्येतद् एनस्वी सप्तकं जपेत्। अप्रशस्तं तु कृत्वा-अप्सु मासम् आसीत भैक्षभुक्॥ ११-२५५

मन्त्रैः शाकलहोमीयैर् अब्दं हुत्वा घृतं द्विजः। सुगुर्व् अप्यपहन्त्येनो जप्त्वा वा नम इत्यृचम्॥ ११-२५६

महापातकसंयुक्तो अनुगच्चेद् गाः समाहितः। अभ्यस्य-अब्दं पावमानीर् भैक्ष-अहारो विशुध्यति॥ ११-२५७

अरण्ये वा त्रिर् अभ्यस्य प्रयतो वेदसंहिताम्। मुच्यते पातकैः सर्वैः पराकैः शोधितस् त्रिभिः॥ ११-२५८

त्र्यहं तु-उपवसेद् युक्तस् त्रिर् अह्नो अभ्युपयन्न् अपः। मुच्यते पातकैः सर्वैस् त्रिर् जपित्वा-अघमर्षणम्॥ ११-२५९

यथा-अश्वमेधः क्रतुराज्-सर्वपापाप-नोदनः। तथा-अघमर्षणं सूक्तं सर्वपापाप-नोदनम्॥ ११-२६०

हत्वा लोकान् अपि-इमांस् त्रीन् अश्नन्न् अपि यतस् ततः। ऋग्वेदं धारयन् विप्रो न-एनः प्राप्नोति किं चन॥ ११-२६१

ऋक्संहितां त्रिर् अभ्यस्य यजुषां वा समाहितः। साम्नां वा स-रहस्यानां सर्वपापैः प्रमुच्यते॥ ११-२६२

यथा महाह्रदं प्राप्य क्षिप्तं लोष्टं विनश्यति। तथा दुश्चरितं सर्वं वेदे त्रिवृति मज्जति॥ ११-२६३

ऋचो यजूंषि च-अन्यानि सामानि विविधानि च। एष ज्ञेयस् त्रिवृद्वेदो यो वेद-एनं स वेदवित्॥ ११-२६४

आद्यं यत् त्र्यक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता। स गुह्यो अन्यस् त्रिवृद्वेदो यस् तं वेद स वेदवित्॥ ११-२६५

चातुर्वर्ण्यस्य कृत्स्नो अयम् उक्तो धर्मस् त्वया-अनघः। कर्मणां फलनिर्वृत्तिं शंस नस् तत्त्वतः पराम्॥ १२-०१

स तान् उवाच धर्म-अत्मा महर्षीन् मानवो भृगुः। अस्य सर्वस्य शृणुत कर्मयोगस्य निर्णयम्॥ १२-०२

शुभ-अशुभ-फलं कर्म मनो-वाच्-देह-संभवम्। कर्मजा गतयो नृणाम् उत्तम-अधम-मध्यमः॥ १२-०३

तस्य-इह त्रिविधस्य-अपि त्र्यधिष्ठानस्य देहिनः। दशलक्षणयुक्तस्य मनो विद्यात् प्रवर्तकम्॥ १२-०४

परद्रव्येष्व् अभिध्यानं मनसा-अनिष्टचिन्तनम्। वितथाभिनिवेशश् च त्रिविधं कर्म मानसम्॥ १२-०५

पारुष्यम् अनृतं च-एव पैशुन्यं च-अपि सर्वशः। असंबद्धप्रलापश् च वाच्-मयं स्याच् चतुर्विधम्॥ १२-०६

अदत्तानाम् उपादानं हिंसा च-एव-अविधानतः। परदार-उपसेवा च शारीरं त्रिविधं स्मृतम्॥ १२-०७

मानसं मनसा-एव-अयम् उपभुङ्क्ते शुभ-अशुभम्। वाचा वाचा कृतं कर्म कायेन-एव च कायिकम्॥ १२-०८

शरीरजैः कर्मदोषैर् याति स्थावरतां नरः। वाचिकैः पक्षि-मृगतां मानसैर् अन्त्यजातिताम्॥ १२-०९

वाग्दण्डो अथ मनोदण्डः कायदण्डस् तथा-एव च। यस्य-एते निहिता बुद्धौ त्रिदण्डी-इति स उच्यते॥ १२-१०

त्रिदण्डम् एतन् निक्षिप्य सर्वभूतेषु मानवः। काम-क्रोधौ तु संयम्य ततः सिद्धिं नियच्छति॥ १२-११

यो अस्य-अत्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते। यः करोति तु कर्माणि स भूतात्मा-उच्यते बुधैः॥ १२-१२

जीवसंज्ञो अन्तरात्मा-अन्यः सहजः सर्वदेहिनाम्। येन वेदयते सर्वं सुखं दुःखं च जन्मसु॥ १२-१३

ताव् उभौ भूतसंपृक्तौ महान् क्षेत्रज्ञ एव च। उच्चावचेषु भूतेषु स्थितं तं व्याप्य तिष्ठतः॥ १२-१४

असंख्या मूर्तयस् तस्य निष्पतन्ति शरीरतः। उच्चावचानि भूतानि सततं चेष्टयन्ति याः॥ १२-१५

पञ्चभ्य एव मात्राभ्यः प्रेत्य दुष्कृतिनां नृणाम्। शरीरं यातनार्थीयम् अन्यद् उत्पद्यते ध्रुवम्॥ १२-१६

तेन-अनुभूय ता यामीः शरीरेण-इह यातनाः। तास्व् एव भूतमात्रासु प्रलीयन्ते विभागशः॥ १२-१७

सो अनुभूय-असुख-उदर्कान् दोषान् विषयसङ्गजान्। व्यपेत-कल्मषो अभ्येति ताव् एव-उभौ महा-ओजसौ॥ १२-१८

तौ धर्मं पश्यतस् तस्य पापं च-अतन्द्रितौ सह। याभ्यां प्राप्नोति संपृक्तः प्रेत्य-इह च सुख-असुखम्॥ १२-१९

यद्याचरति धर्मं स प्रायशो अधर्मम् अल्पशः। तैर् एव च-अवृतो भूतैः स्वर्गे सुखम् उपाश्नुते॥ १२-२०

यदि तु प्रायशो अधर्मं सेवते धर्मम् अल्पशः। तैर् भूतैः स परित्यक्तो यामीः प्राप्नोति यातनाः॥ १२-२१

यामीस् ता यातनाः प्राप्य स जीवो वीत-कल्मषः। तान्येव पञ्च भूतानि पुनर् अप्येति भागशः॥ १२-२२

एता दृष्ट्वा-अस्य जीवस्य गतीः स्वेन-एव चेतसा। धर्मतो अधर्मतश् च-एव धर्मे दध्यात् सदा मनः॥ १२-२३

सत्त्वं रजस् तमस्-च-एव त्रीन् विद्याद् आत्मनो गुणान्। यैर् व्याप्य-इमान् स्थितो भावान् महान् सर्वान् अशेषतः॥
१२-२४

यो यदा-एषां गुणो देहे साकल्येन-अतिरिच्यते। स तदा तद्गुणप्रायं तं करोति शरीरिणम्॥ १२-२५

सत्त्वं ज्ञानं तमो अज्ञानं राग-द्वेषौ रजः स्मृतम्। एतद् व्याप्तिमद् एतेषां सर्वभूताश्रितं वपुः॥ १२-२६

तत्र यत् प्रीतिसंयुक्तं किं चिद् आत्मनि लक्षयेत्। प्रशान्तम् इव शुद्धाभं सत्त्वं तद् उपधारयेत्॥ १२-२७

यत् तु दुःखसमायुक्तम् अप्रीतिकरम् आत्मनः। तद् रजो प्रतीपं विद्यात् सततं हारि देहिनाम्॥ १२-२८

यत् तु स्यान् मोहसंयुक्तम् अव्यक्तं विषयात्मकम्। अप्रतर्क्यम् अविज्ञेयं तमस् तद् उपधारयेत्॥ १२-२९

त्रयाणाम् अपि च-एतेषां गुणानां यः फल-उदयः। अग्र्यो मध्यो जघन्यश् च तं प्रवक्ष्याम्यशेषतः॥ १२-३०

वेदाभ्यासस् तपो ज्ञानं शौचम् इन्द्रियनिग्रहः। धर्मक्रिया-अत्मचिन्ता च सात्त्विकं गुणलक्षणम्॥ १२-३१

आरम्भरुचिता-अधैर्यम् असत्कार्य-परिग्रहः। विषय-उपसेवा च-अजस्रं राजसं गुणलक्षणम्॥ १२-३२

लोभः स्वप्नो अधृतिः क्रौर्यं नास्तिक्यं भिन्नवृत्तिता। याचिष्णुता प्रमादश् च तामसं गुणलक्षणम्॥ १२-३३

त्रयाणाम् अपि च-एतेषां गुणानां त्रिषु तिष्ठताम्। इदं सामासिकं ज्ञेयं क्रमशो गुणलक्षणम्॥ १२-३४

यत् कर्म कृत्वा कुर्वंश् च करिष्यंश् च-एव लज्जति। तज् ज्ञेयं विदुषा सर्वं तामसं गुणलक्षणम्॥ १२-३५

येन-अस्मिन् कर्मना लोके ख्यातिम् इच्चति पुष्कलाम्। न च शोचत्यसंपत्तौ तद् विज्ञेयं तु राजसम्॥ १२-३६

यत् सर्वेण-इच्चति ज्ञातुं यन् न लज्जति च-अचरन्। येन तुष्यति च-अत्मा-अस्य तत् सत्त्वगुणलक्षणम्॥ १२-३७

तमसो लक्षणं कामो रजसस् त्व् अर्थ उच्यते। सत्त्वस्य लक्षणं धर्मः श्रैष्ठ्यम् एषां यथा-उत्तरम्॥ १२-३८

येन यस् तु गुणेन-एषां संसरान् प्रतिपद्यते। तान् समासेन वक्ष्यामि सर्वस्य-अस्य यथाक्रमम्॥ १२-३९

देवत्वं सात्त्विका यान्ति मनुष्यत्वं च राजसाः। तिर्यक्त्वं तामसा नित्यम् इत्येषा त्रिविधा गतिः॥ १२-४०

त्रिविधा त्रिविधा-एषा तु विज्ञेया गौणिकी गतिः। अधमा मध्यम-अग्र्या च कर्म-विद्या-विशेषतः॥ १२-४१

स्थावराः कृमि-कीटाश् च मत्स्याः सर्पाः स-कच्चपाः। पशवश् च मृगाश् च-एव जघन्या तामसी गतिः॥ १२-४२

हस्तिनश् च तुरङ्गाश् च शूद्रा म्लेच्चाश् च गर्हिताः। सिंहा व्याघ्रा वराहाश् च मध्यमा तामसी गतिः॥ १२-४३

चारणाश् च सुपर्णाश् च पुरुषाश् च-एव दाम्भिकाः। रक्षांसि च पिशाचाश् च तामसीषु-उत्तमा गतिः॥ १२-४४

झल्ला मल्ला नटाश् च-एव पुरुषाः शस्त्र-वृत्तयः। द्यूत-पान-प्रसक्ताश् च जघन्या राजसी गतिः॥ १२-४५

राजानः क्षत्रियाश् च-एव राज्ञां च-एव पुरोहिताः। वाद-युद्ध-प्रधानाश् च मध्यमा राजसी गतिः॥ १२-४६

गन्धर्वा गुह्यका यक्षा विबुधानुचराश् च ये। तथा-एव-अप्सरसः सर्वा राजसीषु-उत्तमा गतिः॥ १२-४७

तापसा यतयो विप्रा ये च वैमानिका गणाः। नक्षत्राणि च दैत्याश् च प्रथमा सात्त्विकी गतिः॥ १२-४८

यज्वान ऋषयो देवा वेदा ज्योतींषि वत्सराः। पितरश् च-एव साध्याश् च द्वितीया सात्त्विकी गतिः॥ १२-४९

ब्रह्मा विश्वसृजो धर्मो महान् अव्यक्तम् एव च। उत्तमां सात्त्विकीम् एतां गतिम् आहुर् मनीषिणः॥ १२-५०

एष सर्वः समुद्दिष्टस् त्रि-प्रकारस्य कर्मणः। त्रिविधस् त्रिविधः कृत्स्नः संसारः सार्वभौतिकः॥ १२-५१

इन्द्रियाणां प्रसङ्गेन धर्मस्य-असेवनेन च। पापान् संयान्ति संसारान् अविद्वांसो नराधमाः॥ १२-५२

यां यां योनिं तु जीवो अयं येन येन-इह कर्मणा। क्रमशो याति लोके अस्मिंस् तत् तत् सर्वं निबोधत॥ १२-५३

बहून् वर्षगणान् घोरान् नरकान् प्राप्य तत्क्षयात्। संसारान् प्रतिपद्यन्ते महापातकिनस् त्व् इमान्॥ १२-५४

श्व-सूकर-खर-उष्ट्राणां गो-अज-अवि-मृग-पक्षिणां। चण्डाल-पुक्कसानां च ब्रह्महा योनिम् ऋच्छति॥ १२-५५

कृमि-कीट-पतङ्गानां विष्-भुजां च-एव पक्षिणाम्। हिंस्राणां च-एव सत्त्वानां सुरापो ब्राह्मणो व्रजेत्॥ १२-५६

लूता-अहि-सरटानां च तिरश्चां च-अम्बुचारिणाम्। हिंस्राणां च पिशाचानां स्तेनो विप्रः सहस्रशः॥ १२-५७

तृण-गुल्म-लतानां च क्रव्यादां दंष्ट्रिणाम् अपि। क्रूरकर्मकृतां च-एव शतशो गुरुतल्पगः॥ १२-५८

हिंस्रा भवन्ति क्रव्यादाः कृमयो अमेध्यभक्षिणः। परस्परादिनः स्तेनाः प्रेत्य-अन्त्यस्त्रीनिषेविणः॥ १२-५९

संयोगं पतितैर् गत्वा परस्य-एव च योषितम्। अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः॥ १२-६०

मणि-मुक्ता-प्रवालानि हृत्वा लोभेन मानवः। विविधाणि च रत्नानि जायते हेमकर्तृषु॥ १२-६१

धान्यं हृत्वा भवत्याखुः कांस्यं हंसो जलं प्लवः। मधु दंशः पयः काको रसं श्वा नकुलो घृतम्॥ १२-६२

मांसं गृध्रो वपां मद्गुस् तैलं तैलपकः खगः। चीरीवाकस् तु लवणं बलाका शकुनिर् दधि॥ १२-६३

कौशेयं तित्तिरिर् हृत्वा क्षौमं हृत्वा तु दर्दुरः। कार्पासतान्तवं क्रौञ्चो गोधा गां वाग्गुदो गुडम्॥ १२-६४

चुच्चुन्दरिः शुभान् गन्धान् पत्रशाकं तु बर्हिणः। श्वावित् कृतान्नं विविधम् अकृतान्नं तु शल्यकः॥ १२-६५

बको भवति हृत्वा-अग्निं गृहकारी ह्युपस्करम्। रक्तानि हृत्वा वासांसि जायते जीवजीवकः॥ १२-६६

वृको मृग-इभं व्याघ्रो अश्वं फल-मूलं तु मर्कटः। स्त्रीम् ऋक्षः स्तोकको वारि यानान्युष्ट्रः पशून् अजः॥ १२-६७

यद् वा तद् वा परद्रव्यम् अपहृत्य बलात् - नरः। अवश्यं याति तिर्यक्त्वं जग्ध्वा च-एव-अहुतं हविः॥ १२-६८

स्त्रियो अप्येतेन कल्पेन हृत्वा दोषम् अवाप्नुयुः। एतेषाम् एव जन्तूनां भार्यात्वम् उपयान्ति ताः॥ १२-६९

स्वेभ्यः स्वेभ्यस् तु कर्मभ्यश् च्युता वर्णा ह्यनापदि। पापान् संसृत्य संसारान् प्रेष्यतां यान्ति शत्रुषु॥ १२-७०

वान्ताश्युल्कामुखः प्रेतो विप्रो धर्मात् स्वकाच् च्युतः। अमेध्य-कुणपाशी च क्षत्रियः कटपूतनः॥ १२-७१

मैत्राक्षज्योतिकः प्रेतो वैश्यो भवति पूयभुक्। चैलाशकश् च भवति शूद्रो धर्मात् स्वकाच् च्युतः॥ १२-७२

यथा यथा निषेवन्ते विषयान् विषय-अत्मकाः। तथा तथा कुशलता तेषां तेषु-उपजायते॥ १२-७३

ते अभ्यासात् कर्मणां तेषां पापानाम् अल्प-बुद्धयः। संप्राप्नुवन्ति दुःखानि तासु तास्व् इह योनिषु॥ १२-७४

तामिस्रादिषु च-उग्रेषु नरकेषु विवर्तनम्। असिपत्रवनादीनि बन्धन-चेदनानि च॥ १२-७५

विविधाश् च-एव संपीडाः काक-उलूकैश् च भक्षणम्। करम्भवालुकातापान् कुम्भीपाकांश् च दारुणान्॥ १२-७६

संभवांश् च वियोनीषु दुःख-प्रायासु नित्यशः। शीत-अतप-अभिघातांश् च विविधानि भयानि च॥ १२-७७

असकृद् गर्भवासेषु वासं जन्म च दारुणम्। बन्धनानि च काष्ठानि परप्रेष्यत्वम् एव च॥ १२-७८

बन्धु-प्रिय-वियोगांश् च संवासं च-एव दुर्जनैः। द्रव्यार्जनं च नाशं च मित्र-अमित्रस्य च-अर्जनम्॥ १२-७९

जरां च-एव-अ-प्रतीकारां व्याधिभिश् च-उपपीडनम्। क्लेशांश् च विविधांस् तांस् तान् मृत्युम् एव च दु-र्जयम्॥ १२-८०

यादृशेन तु भावेन यद् यत् कर्म निषेवते। तादृशेन शरीरेण तत् तत् फलम् उपाश्नुते॥ १२-८१

एष सर्वः समुद्दिष्टः कर्मणां वः फल-उदयः। नैःश्रेयसकरं कर्म विप्रस्य-इदं निबोधत॥ १२-८२

वेदाभ्यासस् तपो ज्ञानम् इन्द्रियाणां च संयमः। अहिंसा गुरुसेवा च निःश्रेयसकरं परम्॥ १२-८३

सर्वेषाम् अपि च-एतेषां शुभानाम् इह कर्मणाम्। किं चित् - श्रेयस्करतरं कर्म-उक्तं पुरुषं प्रति।१२-८४

सर्वेषाम् अपि च-एतेषाम् आत्मज्ञानं परं स्मृतम्। तद् ह्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः॥ १२-८५

षण्णाम् एषां तु सर्वेषां कर्मणां प्रेत्य च-इह च। श्रेयस्करतरं ज्ञेयं सर्वदा कर्म वैदिकम्॥ १२-८६

वैदिके कर्मयोगे तु सर्वाण्येतान्यशेषतः। अन्तर्भवन्ति क्रमशस् तस्मिंस् तस्मिन् क्रियाविधौ॥ १२-८७

सुखाभ्युदयिकं च-एव नैःश्रेयसिकम् एव च। प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम्॥ १२-८८

इह च-अमुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते। निष्-कामं ज्ञातपूर्वं तु निवृत्तम् उपदिश्यते॥ १२-८९

प्रवृत्तं कर्म संसेव्यं देवानाम् एति साम्यताम्। निवृत्तं सेवमानस् तु भूतान्यत्येति पञ्च वै॥ १२-९०

सर्वभूतेषु च-अत्मानं सर्वभूतानि च-अत्मनि। समं पश्यन्न् आत्मयाजी स्वाराज्यम् अधिगच्चति॥ १२-९१

यथा-उक्तान्यपि कर्माणि परिहाय द्विजोत्तमः। आत्मज्ञाने शमे च स्याद् वेदाभ्यासे च यत्नवान्॥ १२-९२

एतद् हि जन्मसाफल्यं ब्राह्मणस्य विशेषतः। प्राप्य-एतत् कृत-कृत्यो हि द्विजो भवति न-अन्यथा॥ १२-९३

पितृ-देव-मनुष्याणां वेदश् चक्षुः सनातनम्। अशक्यं च-अप्रमेयं च वेदशास्त्रम् इति स्थितिः॥ १२-९४

या वेदबाह्याः स्मृतयो याश् च काश् च कुदृष्टयः। सर्वास् ता निष्-फलाः प्रेत्य तमो-निष्ठा हि ताः स्मृताः॥ १२-९५

उत्पद्यन्ते च्यवन्ते च यान्यतो अन्यानि कानि चित्। तान्यर्वाक्कालिकतया निष्-फलान्यनृतानि च॥ १२-९६

चातुर्वर्ण्यं त्रयो लोकाश् चत्वारश् च-अश्रमाः पृथक्। भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिध्यति॥ १२-९७

शब्दः स्पर्शश् च रूपं च रसो गन्धश् च पञ्चमः। वेदाद् एव प्रसूयन्ते प्रसूतिर् गुण-कर्मतः॥ १२-९८

बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्। तस्माद् एतत् परं मन्ये यत् - जन्तोर् अस्य साधनम्॥ १२-९९

सेनापत्यं च राज्यं च दण्डनेतृत्वम् एव च। सर्वलोकाधिपत्यं च वेदशास्त्रविद् अर्हति॥ १२-१००

यथा जात-बलो वह्निर् दहत्यार्द्रान् अपि द्रुमान्। तथा दहति वेदज्ञः कर्मजं दोषम् आत्मनः॥ १२-१०१

वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्र-अश्रमे वसन्। इह-एव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते॥ १२-१०२

अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः। धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः॥ १२-१०३

तपो विद्या च विप्रस्य निःश्रेयसकरं परम्। तपसा किल्बिषं हन्ति विद्यया-अमृतम् अश्नुते॥ १२-१०४

प्रत्यक्षं च-अनुमानं च शास्त्रं च विविधा-अगमम्। त्रयं सुविदितं कार्यं धर्मशुद्धिम् अभीप्सता॥ १२-१०५

आर्षं धर्म-उपदेशं च वेदशास्त्र-अविरोधिना। यस् तर्केण-अनुसंधत्ते स धर्मं वेद न-इतरः॥ १२-१०६

नैःश्रेयसम् इदं कर्म यथा-उदितम् अशेषतः। मानवस्य-अस्य शास्त्रस्य रहस्यम् उपदिश्यते॥ १२-१०७

अन् - आम्नातेषु धर्मेषु कथं स्याद् इति चेद् भवेत्। यं शिष्टा ब्राह्मणा ब्रूयुः स धर्मः स्याद् अशङ्कितः॥ १२-१०८

धर्मेण-अधिगतो यैस् तु वेदः स-परिबृंहणः। ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुति-प्रत्यक्षहेतवः॥ १२-१०९

दश-अवरा वा परिषद्यं धर्मं परिकल्पयेत्। त्र्य्-अवरा वा-अपि वृत्तस्था तं धर्मं न विचालयेत्॥ १२-११०

त्रैविद्यो हेतुकस् तर्की नैरुक्तो धर्मपाठकः। त्रयश् च-अश्रमिणः पूर्वे परिषत् स्याद् दश-अवरा॥ १२-१११

ऋग्वेदविद् यजुर्विद्- च सामवेदविद् एव च। त्र्य्-अवरा परिषद्- ज्ञेया धर्मसंशयनिर्णये॥ १२-११२

एको अपि वेदविद् धर्मं यं व्यवस्येद् द्विजोत्तमः। स विज्ञेयः परो धर्मो न-अज्ञानाम् उदितो अयुतैः॥ १२-११३

अव्रतानाम् अमन्त्राणां जातिमात्र-उपजीविनाम्। सहस्रशः समेतानां परिषत्त्वं न विद्यते॥ १२-११४

यं वदन्ति तमोभूता मूर्खा धर्मम् अतद्विदः। तत्पापं शतधा भूत्वा तद्वक्तॄन् अनुगच्छति॥ १२-११५

एतद् वो अभिहितं सर्वं निःश्रेयसकरं परम्। अस्माद् अप्रच्युतो विप्रः प्राप्नोति परमां गतिम्॥ १२-११६

एवं स भगवान् देवो लोकानां हितकाम्यया। धर्मस्य परमं गुह्यं मम-इदं सर्वम् उक्तवान्॥ १२-११७

सर्वम् आत्मनि संपश्येत् सत् - च-असत् - च समाहितः। सर्वं ह्यात्मनि संपश्यन् न-अधर्मे कुरुते मनः॥ १२-११८

आत्मा-एव देवताः सर्वाः सर्वम् आत्मन्यवस्थितम्। आत्मा हि जनयत्येषां कर्मयोगं शरीरिणाम्॥ १२-११९

खं संनिवेशयेत् खेषु चेष्टन-स्पर्शने अनिलम्। पक्ति-दृष्ट्योः परं तेजः स्नेहे अपो गां च मूर्तिषु॥ १२-१२०

मनसि-इन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम्। वाच्यग्निं मित्रम् उत्सर्गे प्रजने च प्रजापतिम्॥ १२-१२१

प्रशासितारं सर्वेषाम् अणीयांसम् अणोर् अपि। रुक्म-अभं स्वप्नधीगम्यं विद्यात् तं पुरुषं परम्॥ १२-१२२

एतम् एके वदन्त्यग्निं मनुम् अन्ये प्रजापतिम्। इन्द्रम् एके परे प्राणम् अपरे ब्रह्म शाश्वतम्॥ १२-१२३

एष सर्वाणि भूतानि पञ्चभिर् व्याप्य मूर्तिभिः। जन्म-वृद्धि-क्षयैर् नित्यं संसारयति चक्रवत्॥ १२-१२४

एवं यः सर्वभूतेषु पश्यत्यात्मानम् आत्मना। स सर्वसमताम् एत्य ब्रह्म-अभ्येति परं पदम्।१२-१२५

इत्येतन् मानवं शास्त्रं भृगुप्रोक्तं पठन् द्विजः। भवत्याचारवान् नित्यं यथा-इष्टां प्राप्नुयाद् गतिम्॥ १२-१२६

समाप्तं मानवं धर्मशास्त्रम्